CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

50 P.13

Coll. No. 497

Title Smriti Nirnaya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 497 Subject : Dharmaśāstra

Title : Smriti Nirnaya

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 10.4" by 4.6" Extent : 51 to 166 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : Incomplete.

विष्णुधर्मे। एकादश्यष्टमीषष्ठीद्वितीया च चतुर्दशी। त्रयोदशी अमावास्या उपोष्याः स्युः परान्विताः। स्कंदः। नाग
विद्धा तु या षष्ठी सप्तम्या च तथाष्टमी। भूतविद्धाप्यमावास्या न ग्राह्या मुनिसत्तम। भूतश्चतुर्दशी। नागः पंचमी। निगमः।
नागविद्धा तु या षष्ठी दशम्येकादशी तथा। भूतविद्धाप्यमावास्या निःफलं स्याद्दिनत्रयं। तथा। एकादश्यष्टमीषष्ठी अ
मावास्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः। एवमादिवचनेषु प्रतिपदमावास्ययोरितरेतरसंबं
धोपवादस्य कंठोक्तत्वात्सावित्रीव्रतव्यतिरिक्तेष्वमावास्या रद्युता ग्राह्येति सिद्धांतः। अथ वटसावित्रीव्रतेऽमा
वास्या चतुर्दशीयुक्ता ग्राह्येति तदुक्तं सावि- अमापौर्णमासी चतुर्थी गणसंज्ञिता रंभातृतीयान्वैवैता उपोष्या पूर्वसंयु
ताः। सावि अमावास्या सावित्रीव्रतयुक्ता मावास्या। ब्रह्मवैवर्ते। भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा। व
र्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमं। स्कंदः। कृष्णाष्टमी तथा रंभातृतीया वटपैतृकी। इष्टिहव्यपातपात्रं न कर्तव्या
सन्मुखा तिथिः। सन्मुखा सायाह्नव्यापिनी पूर्वविद्धेति यावत्। इष्टिहव्यपास्तोर्णिकर्णिकामालोप्रव्रतविधिषु विशेषः। गौरतोऽइति प्र
सिद्धः। तथा च वचनांतरं। कृष्णाष्टमी इष्टिहव्यपासावित्रीवटपैतृकी। अनंगत्रयोदशी रंभा उपोष्याः पूर्वसंयुता। इति।

एभिर्वचनैरमावास्या वटसावित्रीव्रते चतुर्दशीयुता कार्येति। ननु नागविद्धा तु या षष्ठी दशम्येकादशी त
था। भूतविद्धा सिनीवाली न तु तत्र व्रती चरेदिति भूतविद्धानिषेधात्कथं तत्र व्रतं स्यादिति चेत्। शृणु नि
षेधस्तु सावित्रीव्रतमतिरिक्तमावास्याविषयः। ज्येष्ठमासत्रयोदशीमारभ्यामावास्यायां त्रिरात्रं सा
वित्रीव्रतं क्रियते॥ तत्र प्रशस्ततविधायकं वचनं। यदाहु जाबालिः। तुलायां मकरे मीने कन्यायां मिथुने तथा॥
भूतविद्धा प्रयोक्तव्या शेषेषु प्रतिपद्युता। मिथुने ज्येष्ठमास इति प्रसिद्धिः। तस्मात्सावित्रीव्रतेऽमावास्या भूतविद्धे
ति सिद्धं। इत्युपवासव्रते मावास्यानिर्णयः। वटसावित्रीव्रतविधिस्तु भविष्योत्तरात्। अमावास्यायां
तथा ज्येष्ठे वटमूले महासती। त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत्। अशक्तौ तु त्रयोदश्यां नक्तं कु
र्याज्जितेन्द्रिया। अयाचितं चतुर्दश्याममायां समुपोषणमिति। वंशपात्रं स्वर्णसावित्रीमूर्तिं संपूज्य कुंकुम
२ कं कं जलस्थं सप्तधान्यं विरूढं नालिकेरादिनानाफलानि मुक्त्वा वटमूले स्थापयित्वा वटं सावित्रीं संपूज्य त्रि ५१
रात्रं सावित्र्याख्यानकं शृणुयात्। ततो नाम्नीं ब्राह्मणाय दत्वा गत्वैव धुनिः सह हविष्यं भुंजीत। व्रतेनानेन

राजेन्द्र वैधव्यं न वाप्नुयात्। इत्यादि सावित्रीव्रतविधिः। वारनक्षत्रादियोगतो दर्शविशेषाः पूर्वमुक्ताः।
कार्तिकादिअमावास्याविशेषो दीपावल्यानिर्णये वक्ष्यते॥ एकनक्तादिव्रते मावास्या व्रतकालव्यापि
नी ग्राह्येति। तदुक्तं। एकभक्तदिवानक्तनिशिचंद्रोदयव्रते। तिथिस्तात्कालिकी ग्राह्या पारणे त्वपरा तिथिः।
एकनक्तं प्रदोषव्यापिन्यां क्रियतां इत्यग्रौतिधास्यता इत्युपदेशः॥ अथ वटहस्तपात्रव्रतं॥ तत्तु गुरुतारबाल्योकत्र
सिद्धं। तत्प्राप्तिवर्षातिथिवृद्ध्या क्रियमाणेति थिः पूर्वविद्धोपवासेप्यग्राह्या। तदुक्तं। तस्मात्स्मृती वटहस्तपंस
वित्रीवटपेटकं। अनंगत्रयोदशीरंभाउपोष्याः पूर्वसंयुताः। व्रतानि यैव तत्। तस्मात्स्मृतीत थारंभात्तृतीमा
वटपेटकौ। वटहस्तपात्रथा ब्रह्मन्कर्तव्या सन्मुखा तिथिः॥ पूर्वतिथियुक्तासन्मुखेति। तद्व्रतारंभे षोडशातं
तु दीपवर्तिकाप्रतिवर्षे एकैकं तंतुवृद्ध्या कार्यो। स्तुप्रजिते प्रदेशे अपदूपदधिवरना रूतादीपार्चितं पात्रं ग
हीत्वा मावास्यातः प्रतिपदं प्रतिपदे [redacted] मित्येवं तिथिवृद्ध्या गुरुकृपया तत एवं षोडशवर्षपर्यंतं कर्तव्यमिति
स्मृत्यर्थ [redacted] करुणात्। तदप्युक्तं ईश्वरेण पार्वतीं प्रति। मार्गशीर्षे शुक्लपक्षे तु कुर्याद्व्रतमनुत्तमं। अमा पूर्वसमा
द्वितीया

रभ्य यावत् षोडशी उक्तातिथिः। वर्षवृद्ध्याप्यकर्तव्या यावन्निः षोडश तं उक्ता। संरव्यार्थे वर्द्धये देकीयथा व्रतमखं
डनं। महेश्वरं च संपूज्य पुष्पधूपान्नवारिभिः। गृहीत्वा श्रपदं वा दियुतं पात्रं गुरुं ऽर्पयेत्। गवेत्रिंशतिथिं धिं २
चेत गुरुं वा व्याख्यातुं ऽदरि। वर्षे वर्षे प्रकर्तव्यं यावत् पूर्णं समाप्यते। पूर्णे षोडशवर्षेतु कुर्याद्यजन
मुत्तमं। यजनमुद्यापनमित्यर्थः। आरोग्यं पुत्रपौत्रत्वं अवैधव्यं तथैव च। इत्यादि फलं तत्पाद्रतं॥ छ॥ छ॥
अथ प्रतिपन्निर्णयः। प्रतिपद्यप्यमावास्येति युग्मश्रुतेः प्रतिपदोऽमावास्याविद्धत्वं उपवासे विहितं। त
थाकात्यायनः दर्शे प्रतिपत्पंचमी तु स्याद्रष्टमी तु तृतीया सप्तमी। नवमी दशमी शुक्ले त्रयोदश्यथ कृति हरिः। रंभा
रव्यातृतीया चैत्येताः पौष्याः पूर्वसंयुताः भूतं च तुर्दशी॥ भूतं चाष्टमी चेति विग्रहे पूर्वेणा चिति थिलवे
नाभ्यर्हितत्वाद्दष्टमीशद्बस्य पूर्वनिपातः। अक्रातिर्हरिः। श्रवण द्यतिरिक्ता द्वादशी। बलं वै वर्त्रे प्रति ५२
पत्पंचमी भूतं सावित्री वटपूर्णिमा। पूर्वविद्धेति पैठीनसिः। पंचमी सप्तमी चैव दशमी च त्रयोदशी। प्र
तिपन्नवमीमिकर्तव्या संमुखा तिथिः। संमुखा पूर्वविद्धेत्यर्थः। एतानि वचनानि विधिमुखेन पूर्वविद्धापरा
ता।

हितयतु। प्रतिपत्सु द्वितीया प्रतिपद्धतैत्यावस्ताब्ववचनं। प्रतिपद्वितीययोः परस्परं व्रतसंबंधाविधायकं तद्व्रत
विशेषाभिप्रायेण। युग्मश्रुतः प्रतिपदः उपवासे पूर्वविद्धाभिनाधात्। यद्वितीयापंचमी दशमी त्रयोदशी
चतुर्दश्यः स्वचेद्याद्युपवासविषये स्वस्मात्पूर्वामुत्तरां च तिथिं चढ्ढंत्यकरितिं एतदुक्तं वृद्धवसिष्ठेन। द्विती
यापंचमी विद्धा दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी। एतदपि शुक्ले तु द्वितीयाष्ट
तीययोश्चतुर्थी पंचम्योर्युग्मवाक्ये साहचर्यं श्रवणात्ते निषेधात्तत्तिथि। निर्णये व्यवस्थया प्रदृश्यते। ए
तेनोपवासविषये द्वितीया पूर्वां प्रतिपदमुत्तरां तृतीयां हंतीति स्चवेधात्। अतः प्रतिद्वितीयायुक्तानोपोष्ये पत्र६
ति तात्पर्यार्थः। उपवासे तु शस्तवतिथिः पूर्वविद्धेवपैठीनसिवचनादित्यनंतनद्दे प्रतिपादितं। यत्प्र
तिपत्सद्वितीयास्याद्वितीया प्रतिपद्युते त्यावस्तं ववचनं प्रतिपदो द्वितीयायुक्त चाभिधायकं तत्रोपवास
शब्दः श्रवणात्त्रिंशत्का शोकक रवीरादि व्रतविषये व्यवस्थाप्यते। तानि हि व्रतारव्ये डे शुक्ले प्रतिपद्युक्तो
निपूर्वाह्न एव विधीयंते इति व्यवस्थायां न कश्चिद्दोषः। एवमन्यपि विरुद्धवाक्यानि चरस्य स्वविषये
न्या१

व्यवस्थाप्यते।द्वितीयायाःप्रतिपद्विद्धत्वमशून्यकौशयनादिव्रतविषयं।नैकनक्तादिव्रतविषयंतेषांस्व
कालव्यापिन्यांनियतत्वादितिप्रतिपत्सामान्यनिर्णयः॥निर्णयामृतेप्रतिपक्षद्वितीयेत्येतद्वाक्यंतत्त
पक्षयुग्ममित्युक्ताशोककरवीरादिशुक्लप्रतिपद्व्रतेयोजितंतदस्मीस्याभिर्धानंस्तं॥आश्विन
शुक्लप्रतिपदिअशोकव्रतंकार्यं॥तेनशोकंनप्राप्नोतीत्युक्तंभविष्यत्पुराणे।श्रीकृष्णेनयुधिष्ठिरं
प्रति॥यथा॥आश्वयुक्शुक्लपक्षस्यप्रथमेह्निदिनोदये॥अशोकंपूजयेद्धृष्टसंप्ररूढस्तनजलहणे॥प्र
रूढैःसप्तधान्यैश्चगुणकैर्मोदकैःशुभैः॥फलैःकालोद्भवैर्हृद्यैर्नालिकेरैःसदाडिमैः॥पुष्पधूपादिना
तत्पूजयेत्तंनगोत्तमं॥अशोकपांडवश्रेष्ठशोकंनाप्नोतिकुत्रचित्।अशोकशोकशमनोभवसर्वत्रनः
कुले।इत्युच्चार्यततोदद्यार्दर्घंफलैःसमन्वितं॥पताकाभिरलंकृत्यप्रधानघंटावस्त्रवाससा।दमयंतीतीयया 43
प्यासीत्तथादेवीचजानकी॥तथाशोकव्रतादस्माज्जायतेपतिवल्लभा॥दृष्ट्वाशोकंवनेपार्थपल्लवाले
कृतंतनु॥तस्यासमीपेसंकारंदेवरंचतिलाक्षतैः॥दीपालक्तकनैवेद्यंधूपदीपफलार्चनैः॥अर्चयि

त्वाप्रार्थितोसौरक्तशोकोयुधिष्ठिर॥मैथिल्याप्रांजलिंस्तुत्वाप्रत्यतोराघवस्यच।चिरंजीवतुमेवृ
द्धःश्वशुरःकौशलेश्वरः।भ्रातरोमेदेवराश्चैवजीवंतुजनकादयः॥कौशल्यामपिजीवंतीपश्येयमिति
तिमैथिली॥यथाचैवमहाभागाद्रौपदीवनविभूषितं॥प्रदक्षिणमुपादायततःसाप्रययौगृहं।ए
वमन्यापियानारीपूजयेदवनीगतं।तिलतंदुलसंमिश्रैर्यवगोधूमसर्षपैः।पूजनाप्यर्धंदयेत्मूलेपा
दपंरक्तपल्लवं।तदभावेपसौवर्णंराजतंवास्वशक्तितः।वणकैर्वास्त्रतालिख्यपूजयेद्विधि
वत्ततः।मंत्रेणानेनकौंतेयप्रणम्यस्त्रीपतिव्रता॥महावृक्षमहाशाखमकरध्वजमंदिर।प्रार्थये
त्वांमहाभागसर्वकामप्रदोभव॥एवमाराध्यतंदद्यादद्वाद्विप्रायदक्षिणां।एतद्व्रतंचयाकुर्या
तंचवृद्धत्वंतत्तद्यादस्त्रयुग्मसमन्वितं॥सखीभिःसहितासाध्वीकृजीतव्रतचारिणी॥एतद्व्रतंचया
कुर्यात्साशोकंनउपश्यति॥अंतेगौरीपदंयातिनष्टसौख्यंचविंदति॥इत्यशोकव्रतं॥ ॥अथप्र
तिपदेग्निर्देवता।अतःसर्वासुप्रतिपत्स्वग्निव्रतंकार्यं॥तदुक्तंपद्मपुराणे॥ ॥प्रतिपद्येकनक्ताशी

समंतेकपिलाप्रदः॥ वैश्वानरपुरंयातिघृतंवैश्वानरं त्विदं॥ तथा तत्रैव॥ ॥पृथिवीनाजनं स्त्वा योतुं
क्तेपरुसंधिषु॥ अहोरात्रेणचैकेन त्रिरात्रफलमश्नुते॥ इतिपरुसंधिघृतं॥ ॥एवमुपवासरूपां
ण्यपिप्रतिपद्दतानिसंतितानिप्रतरवंडाल्लज्ञेयानि॥ अथ कार्त्तिकशुक्लप्रतिपदि गोक्रीडारव्यं कर्म
विहितं॥ तत्रप्रतिपत्पूर्वविद्धापरविद्धावेत्यनयथावचनानि॥ तावत्पूर्वविद्धावचनानि॥ प्रतिपद्दर्श
योयोगेक्रीडनेतुगवांमतं॥ परविद्धेषुयः कुर्यात्पुत्रदारधनक्षयः॥ तथा॥ याकुहूः प्रतिप
न्मिश्रातत्रगाः पूजयेन्नृप॥ पूजनीयास्त्रीणिवर्धंते प्रजागावोमहीपतिः॥ परविद्धानिषेध
निप्रायेणदार्शिकंकर्म चतुर्दश्यांविहितं परतः सोमदर्शनात्॥ एतदभिप्रेत्यगोक्रीडादिक
र्मणिद्वितीयानिषेधवचनानि॥ गवांक्रीडादिनेयत्रराात्रौदृश्येतचंद्रमाः॥ सोमोराजापशु
न्हंतिसुरभिपूजकोस्तथा॥ नंदायांदर्शनेरक्षाबलिदानेदशासुच॥ नंद्रायांगोकुल
क्रीडासदेशोवैविनश्यति॥ नंद्राद्वितीया॥ तथा॥ प्रतिपद्यग्निकरणंद्वितीयायांतुयगो ५४

र्धनं॥ छत्रछेदंकरिष्येते वित्तनाशंतथासुखे॥ इत्यादिवाक्यैः प्रतिपत्कालेअग्निकरणंदी
पान्मुक्तद्वितीयायांगोपूजने॥ निषिद्धंतथापि॥ त्रियामगादर्शतिथिर्नविद्धेतरसाईत्रियामाप्र
तिपद्विवृध्या॥ दीपोत्सवेतेमुनिभिः प्रदिष्टे अतोन्यथापूर्वयुतेविधेये॥ इत्यादिवाक्यानियां
मैत्रयमात्रेदर्शेसायंप्रतिपदिउल्मुकादिकंविदधाति॥ इतिपरविद्धावाक्यसंग्रहावश्य
स्तचनेनेमानिपूर्वविद्धाप्रतिपादकानिति॥ अथ परविद्धावाक्यानिस्कंदे॥ अमावास्यायां
क्रीडंतेगावोलोकस्यमातरः॥ अश्वव्याधिर्नवेत्तत्रराजांशस्त्रंनयेन्नवेत्॥ कुरूपयेत्रास ङ्गा६
येत्रासयेच्चगोमहिष्यादिकंनरः॥ एतत्क्रीडनंकार्यंप्रातर्नंदादिनेनरैः॥ नंदाप्रतिपत्॥
तथा॥ प्रतिपत्सद्वितीयास्याद्गवांचैवप्रपूजने॥ आयुर्वृद्धिप्रजावृद्धीराज्यवृद्धिस्तथैवच॥ तथा॥
कार्त्तिकेशुक्लपक्षादौ अमावास्याघटीद्वयं॥ देशभंगभयान्नैवकुर्यान्मंगलमालिकां॥ घटीद्व
यमितिकुतपादिकालव्यापिनीत्यादि॥ अतएव॥ आश्विनेमासिदर्शादितिथयकीर्त्ति

त्रि२ क्रो४ वेन५

तास्त्रयः॥ दीपदानादिकार्येषु याह्या मध्याह्नकालिका इत्यादि॥ विधिनिषेधस्तु स्वेनैव परा
र्थप्रतिपादका नीति॥ एवं परस्परं विरुद्धार्थप्रतिपादकानी वाक्यानी विचारमंतरेण निर्ण
यः कर्तुं न शक्यत इति दीपोत्सवकर्मांगभूतास्तिथयस्तत्र तिथिविहितकर्म विचारपूर्वं निर्णे
तव्या इति॥ यैः कार्त्तिककृष्णप्रतिपन्निर्णये परविद्धावाक्यानादरेण पूर्वविद्धामात्रवा
क्यानि लिखितानि तैस्तु साग्निकविषयत्वं वा स्वमनीषाविजृंभितमात्रं वा प्रकटीकृतं॥ नि
र्णयास्तु विश्वजनीनाः सर्वैर्न वृश्चयो न वींतीति॥ अथ द्वादशी प्रभृति द्वितीयापर्यंतमिति
कर्त्तव्यता प्रदर्शनपूर्वकं दीपावलीनिर्णयः क्रियते॥ ॥ तत्र गोवत्सद्वादशी॥ श्री॥ कृष्णः
वाच॥ गोवत्सद्वादशी वाच्या कार्त्तिके कृष्णपक्षगा॥ गोवत्ससहिता सज्यासु शीला दोषवर्जिता॥ न ५५
रुणा च सुरूपा च सुप्रसूता पयस्विनी॥ विशेषोऽत्र प्रकर्त्तव्यो गोवत्सद्वादशी व्रते॥ स्नानादि विधानं तत
प्रातःकाले विशेषतः॥ अर्चनविधिः॥ अथ ताम्रमये पात्रे कृत्वा पुष्पाक्षतैः शुभैः॥ फलैर्नानाविधैरर्घ्यं

दधि दूर्वा समन्वितैः॥ पादमूले तु दातव्यो मंत्रेणानेन पांडव॥ मातारुद्राणामित्येष मंत्रो यं तु द्विजन्मनी
यस्तु॥ पुराणपि कार्त्तिके मासि द्वादशी कृष्णपक्षगा॥ पूर्वविद्धा प्रकर्त्तव्या न कुर्यादपरे दिने॥ द्वादशीमि
श्रिनानंदा ह्यजयेद्वत्समातरं॥ आयुर्वृद्धि प्रजाश्चैव पांडवं वचनं यथा॥ नंदा विष्णूत्तरोक्तसाय कार
लीनगोवत्सद्वादशी विषयं॥ अथ त्रयोदशी॥ तैलाभ्यस्नानं न कर्त्तव्यं द्वितीयायां सदैव हि॥ दशम्यां च त्रयो
दश्यां वर्जयित्वा तथाष्टमीं॥ एतस्माद्वचनाद्दशम्येवं द्वितीयायां दश्यां च स्नानं न कर्त्तव्यं तदुक्तं स्मृत्यं
तरे॥ गोयात्रिपते पंचस्नानं यदि विधिर्दिनरैः॥ तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु॥ अथ चतुर्दशी प्र
वास्याप्रतिपन्निर्णयः॥ विष्णुः॥ आश्विने कृष्णपक्षे तु दर्शायां विधूदये॥ तिलतैलेन कर्त्तव्यं स्नानं
नरकभीरुभिः॥ गार्ग्यः॥ पूर्वविद्धा चतुर्दश्यां कार्त्तिकस्य सितेतरे॥ प्रत्यूषस्य समये स्नानं कुर्याद्दंतं डिनः॥
अपामार्गपल्लवांश्च भ्रामयेन्मस्तकोपरि॥ मंत्रः॥ सीतालोष्ठसमायुक्त सकंटकदलान्वित॥ हर पापमपा
पामार्ग भ्राम्यमाणः पुनः पुनः॥ ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ ततः प्रदोषसमये दीपान्दद्या

मनोहरान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च। नरकाय प्रदातव्यो दीपः संपूज्य देवताः। एवं प्रभाते स-
मये घमायां तु नराधिप॥ स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च। कृत्वा च पार्वणश्राद्धं द-
धि क्षीर घृतादिभिः॥ ततोऽपराह्णसमये घोषयेन्नगरे नृपः। अद्य राज्यं बलेर्लोका यथेष्टं चेष्टता-
मिति॥ लोकश्चापि गृहे हर्म्ये सुधाधवलिताजिरे। कुंकुमचंदनमाल्याद्यैरर्चिते च गृहे गृहे। दी-
पमालाकुले रम्ये विधवस्त्रसौ तसी चयैं प्रदोषे दोषरहिते शाको दोषागमेषु सा। ज्याशीः पूर्वमुख्या
निरूकन्या निःछिशतं हुतैः॥ नीराजनं प्रकर्तव्यं रसशास्त्रविद्दीपकैः॥ अमावास्या प्रदो-
षे च पौदकः पितृदीपकैः। तेषामेवात्मनो न पश्यंति पितरो ध्रुवं। इयं च कौमुदी रात्रिर्विचेष्टापि
महोत्सवा खलु॥ कर्तव्या गीतवादित्रयुक्तानि द्यावि वर्जिता॥ अतः प्रभूतनारीभिः पूर्वाद्धिमवा- ५८
दनैः॥ निष्क्राम्य ते गृहं दृष्ट्वा निरलक्ष्मीः स्वगृहांगणात्॥ राजा च प्रजातस्तमयेयथार्हं मानयेज्जना-
न्॥ कुद्दापयेत्तायेसं शृंगो महिषादिकांस्तत॥ एवं क्रीडनं कार्यं प्रातर्नंदादिने नरैः॥ ततो

ब्रह्मणां हि द्वितीयायां संपूज्य ब्रह्मचारिणः॥ भोजयित्वा च विद्यानां सर्वासां पारगो भवेत्॥ सुवर्ण-
निर्मितो ब्रह्मा कर्तव्यश्चतिथीश्वरः॥ समिदाज्य दधि क्षीरमाह्निकानि च होमयेत्॥ तेन संतोषि-
तो ब्रह्मा सर्वविद्याप्रदो भवेदिति ब्रह्मव्रतं॥ अगस्त्यपुराणे॥ श्रावणस्य द्वितीयायां कृष्णायां मधुसू-
दन॥ क्षीरार्णवे सलक्ष्मीकः सदा वसति केशवः॥ तस्यां द्वितीयायां अशून्यशयनं नाम व्रतं कार्यं॥
कृष्णपक्षादि मासान्तिप्रायेणारंभः॥ चैत्र शुक्ल द्वितीयायां तत्रोमाशिवाग्नीनां पूजा कार्या॥ तदुक्तं॥
चैत्र शुक्ल द्वितीयायां उमा पूज्या फलार्थिभिः॥ शिवपूजा चाग्निपूजा कर्तव्या मुनिसत्तमेति॥ दे-
वीपुराणे॥ उमां शिवं हुताशं च द्वितीयायां प्रपूजयेत्॥ हविष्यमन्नं नैवेद्यं देयं गंधार्चनान्विते॥
फलमाप्नोति विप्रेंद्र सर्वक्रतुसमुद्भवं॥ इति चैत्र द्वितीया॥ ॥ अथाशून्यशयन द्वितीया॥ श्रावणा-
दिषु चतुर्षु मासेषु कृष्ण द्वितीयायामशून्यशयनव्रतं कार्यमिति दुक्तं भविष्यत्पुराणे॥ युधिष्ठिर उवाच॥ अ-
शून्यशयनं नाम द्वितीया श्रूयते त्वया। यामुपोष्य न वैधव्यं स्त्री प्रयाति नराधिप। पत्नी वियुक्त-

अनरोन कदाचिन्प्रजायते। उपोष्येति नक्तं भुंजीतेति मैथीतरे॥ शेते जगत्पतिः कृष्णः श्रियासार्द्धम
दानृप॥ अशून्यशयनानामतदा भाद्या उत्साति थिःकृष्णपक्षद्वितीयाश्रावणे मासि भारत। इदमुच्चा
रयेत्प्रातःप्रणम्य च जगत्पतिं। नागरखंडे॥ ॥सूत उवाच। आषाढ्यां समतीतायां द्वितीयादिवसे स्थिते।
प्रातरुत्थाय विप्रेंद्र नकृते विष्णुदैवते। पापिष्ठैः पतितैर्म्लेच्छैः संभाषं नैव कारयेत्। ततो यदि
वर्मद्दिमध्याह्नसमये स्नात्वा धौतांबरः शुचिः। जलशायिनमासाद्य मंत्रेणानेन पूजयेत्। श्रीवत्सधा
रिन् श्रीकांत वामन श्रीपते व्ययां गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामदं। लक्ष्म्या वियुज्यते देव न
कदाचिद्यथा भवान्। तथा कलत्रसंबंधो देव मा मे वियुज्यतां। विष्णुरहस्ये॥ ॥यत्नी नहि वि
योगं च नरत्वं भार्या समुद्भवं। नाप्नुवंति यथा दुःखं दंपत्यानि तथा कुरु। यथा स्त्रिया वियुक्तस्त्वं ५३
लक्ष्मी देवत्वया सह। प्रसादात्तव देव शस्त्रितिरस्कृत तथावयोः। मासमस्तुत्रयाः प्रणश्यं तु माध
नं मा कुरु केशव। अस्मयो मा प्रणश्यं तु गृहं गोस्तु मावयोः। एवं प्रसाद्य पूजां च कृत्वा लक्ष्म्याम्न

ध्याहारः फलानि दद्यात् छय्यायाम् नीष्टानि जगत्पतेः। नक्तं प्रणम्यायतने हरिं भुंजीत वाग्यतः। नक्तं
भुंजीत तत्पर्यः। हरिं प्रणम्य संपूज्य तीर्थैः। अशून्यशयनं हि चांद्राह्वे ये क्रियते इत्युक्तं प्राक् ब्राह्मणाय द्वित
यायां शय्या देया सदक्षिणा। यानि तत्र महाबाहो काले संति फलानि च। अमुष्मा फलानि शय्यायां स्त्री
लिंगानि विवर्तयेत्। द्वितीये क्षिप्रदेयानि भक्त्या शक्त्या च भारत। वासो दानं तथा धान्यं कलधौ
त्यसमन्वितं। एवं करोति यः सम्यक् नरो मासचतुष्टयं तस्य जन्मशतं वीर गृहभंगो न जायते। मा
सचतुष्टयं कृष्णद्वितीया तिथिरिति शेषः। यम पुराणे। एतन्मंत्रा। दिक्कमपक्रम्य शंकरश्राद्ध जी
तवाघा नावे॥ घंटानवे दशाक्षस्य सर्वाघसमीपतः। एवं संपूज्य गोविंदमश्रीयात् लवद्विर्नं। नक्त
महारलवर्णी या वर्त्ते मा स्व चतुष्टयं। ततः प्रभाते संजाते लक्ष्मीपति समन्वितं। दीपं प्रजोजनेयु
क्तं शय्यां दद्यात् सूलरूपणं॥ पादुको पानहौ छत्रचामरासनसंयुतं॥ अभ्यंगां गायविप्राय वे लवा
कुटंबिने। दातव्या पैदविदुषेन तु क ब्रतिने कचित्॥ तत्रोपवेश्य दंपत्यमलंकृत्य यथाविधिप
दे १ दे १ दा ४

स्वास्तु भोजनं दद्याद्रक्तोज्यसमन्वितं। ब्राह्मणस्यापि सैवं विष्णुमुपस्कारसमन्वितं॥ प्रतिमां देवदे
वस्य सोदकुंभां निवेदयेत्॥ एवं यस्तु नरः कुर्यादशून्यशयनं हरेः। न तस्य वित्तविरहः कदाचिद
पि जायते॥ नारी वा विधवा राजन् यावच्चंद्रार्कतारकं॥ न विरूपं न शोकार्त्तं दंपत्यं जायते क
चित॥ न पुत्रविरहादिकमिति। सप्तकल्पसहस्राणि सप्तकल्पशतानि च॥ कृत्वाशून्यशयनं १४
विष्णुकैलोके महीयते॥ इत्यशून्यशयनद्वितीयाव्रतविधिः॥ निर्णयोऽपि॥ चैत्रशुक्लद्वितीयाया
मश्विंप्रकृतिं पुरुषं संपूजयेत् मुक्तिकाम इति॥ मार्कंडेयः॥ प्रकृतिः पुरुषश्चोभौ जगत्सर्वं प्रका
र्त्तितं॥ अग्नीषोमात्मकंमिति॥ वासुदेवश्च सर्वं लक्ष्मीश्चैतावेव प्रकीर्त्तितौ॥ चैत्रशुक्लद्वितीया
यां सोपवासो जितेंद्रियः॥ पौरुषेण च सूक्तेन। वह्निं संपूजयेत्ततः॥ सोपवास इति प्रतिपदि कृतो ६४
पवासो द्वितीयायां वह्निं संपूजयेत्। द्वितीयादिनद्वये चेत्पूर्वाह्निकी ग्राह्या॥ उपरिष्टात्क्षीरदु कृ
कृतभोजनस्य विहितत्वात्॥ सर्वेषांचोपवासानां पूर्वाह्ने पारणं स्मृतंमिति॥ गंधमाल्यधूप

सर्व४

दीपान्नसंपदा पूजयेत॥ लक्ष्मीश्च वरदं देवं पूजयेदुदके हरिः॥ श्रीसूक्तेन च धर्मज्ञो यथावन्मंत्रजो
त्तमा॥ कांचनं राजतं चोभे दिधात विप्रेषु दक्षिणं॥ ततः क्षीरघृतभोजनं॥ संवत्सरमिदं कृत्वा व्रतं
सम्यगुपोषितः। मुच्यते पातकैः सर्वैर्मोक्षोपायं च विंदति॥ इति विष्णुधर्मे प्रकृतिपुरुषाव्र
तं॥ ७॥ अन्यद्वितीयाव्रतविशेषाव्रतसमुच्चयादवगंतव्या॥ नक्तादिव्रतविशेषेत्तु तत्कालव्या
पिन्यामेवेति निर्णयः॥ तथा धनार्थिना द्वितीयादिवसे महालक्ष्मीपूजनीयेति। तदुक्तं। नागरखंडे
महालक्ष्मीप्रति ब्रह्मोवाच। महालक्ष्मीति ते नाम तस्माद्दत्तं भविष्यति। अत्रेति हाटकेश्वरक्षे
त्रे॥ गजवक्त्रांतरो यस्त्वां पूजयिष्यति भक्तितः। स गजाधिपतिर्भूपो भविष्यति चू भूतले॥ द्वितीया
दिवसे यास्त्वां महालक्ष्मीरिति ब्रुवन्। रश्रीसूक्तेन सुभक्त्याथ यस्त्वां संपूजयिष्यति। स पूजनंभो
तराण्यवनं भविष्यति सोऽधनः॥ इति द्वितीयानिर्णयः॥ अथ तृतीया ॥ तत्र रंभावर्ज्यविद्धाऽन्या।
सर्वापि द्वितीयायानुया युक्तैवोपोष्या। तदुक्तं। षष्ठी रंभा तृतीयैकादशी कृष्णत्रयोऽमावा

१३१

दृ॰
स्यात्कृतीया च नाडपोष्याः परान्विताः। यत्तु युग्माग्नीत्यादि वाक्यं तृतीया या द्वितीयोपहिताया
उपादेयत्वमुक्तं तद्रंभाव्रते चोपतिष्ठते॥ यथा॥ अनंगत्रयोदशी रंभा वाडपोष्या पूर्वसंयु
ता॥ कालादर्शे॥ सावित्र्यमावस्या पौर्णमासी चतुर्थी गणसंज्ञिता॥ रंभा तृतीया चैते ताडपोष्याः
पूर्वसंयुताः॥ गणसंज्ञिता गणेशचतुर्थी॥ ब्रह्मवैवर्ते॥ रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम। अन्येषु
सर्वकार्येषु गणयुक्ता प्रशस्यते। स्कंदपुराणे। कृष्णाष्टमी चतुर्थी च सावित्री वटपैतृकी। अनंग
त्रयोदशी रंभा ताडपोष्याः पूर्वसंयुता। एवं रंभायाः पूर्वविद्धावचनदर्शनेन द्वितीयायुक्तैः तृतीययो
र्युक्तौ रंभाव्रते स्थाप्यौ ते॥ रंभाव्रतादन्यत्र पूर्वविद्धा निषिद्धा॥ तदाह॥ द्वितीया पंचमी वेधाद्दशमी
च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी॥ द्वितीया पूर्वं प्रतिपदा उत्तरां चात्र तृतीयां हंतीति
द्वितीयोपहिता निषिद्धा। ननु एतद्रंभाव्रतेपि निषेधकं कस्मान्न स्यादिति चेत्॥ शृणु॥ रंभाव्रते पू ९५
र्वविद्धविधानस्य बाधकत्वात् कल्पादिति ब्रूमः॥ आग्नेयपुराणे। शचतुर्दशिका रंभाप्रवदिति॥ मत एव द्विती
दृ॰

पायुक्तां यां प्रकुर्वाणोपि श्रूयते॥ पुराणसमुच्चये॥ द्वितीया शेषसंयुक्तां तृतीयां कुरुते तु यः। स
याति नरकं घोरं कालसूत्रं भयंकरं॥ ब्रह्मवैवर्ते॥ तृतीया तु न कर्तव्या द्वितीयोपहिता द्विजा॥ द्वितीयो
पहिती तातयः करोति नराधमः। सैव संवत्सरकृतेनेह नरो धर्मेण मुच्यते॥ द्वितीया शेषसंयुक्तां या क
४ दि रोति मोहिता। सा वैधव्यमवाप्नोति प्रवदंति मनीषिणः॥ एवं द्वितीयायुक्ता तृतीया प्र[illegible]निषिद्धा॥
तत्रैव चतुर्थीयुक्ता प्रशस्यते। चतुर्थीसहिता या च सा तृतीया फलप्रदा॥ अवैधव्यकरी स्त्रीणां
पुत्रपौत्रप्रदायिनी॥ परदिने तिथ्यभावे निषिद्धापि पूर्वविद्धा ग्राह्या इति गमे॥ एकादशी तृतीया च षष्ठी
चैव त्रयोदशी॥ पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेहनि॥ एतदुपलक्षणं॥ एतद्विषये सर्वा अपि
परविद्धाः पूर्वा ग्राह्या इत्यर्थः॥ एवं रंभा पूर्वविद्धा न्यायात् परविद्धेति सिद्धांतः॥ उपवासस्य प्रसाम्नासे
विहितान्येकभक्तादीन्युपवासविहिततिथ्यौ कर्तव्यानि॥ अन्यान्ययेकभक्तादीनि तत्कालव्या
पिन्यामेवेति॥ इति सामान्यतृतीया॥ अथ तृतीयाविशेषाः॥ वैशाखे शुक्लतृतीयाक्षयतृती

या॥ तद्युक्तं व्रतखंडे। वैशाखस्य सिता मे कांत तृतीया मत्कृयां शुभ॥ यस्यां स्नानं जपो होमः स्वाध्यायः
पितृतर्पणं। दानं च क्रियते सम्यक्सर्वं स्यादितिचाक्षयं॥ आदिः कृतयुगस्येयं युगादिस्तेन कथ्य
ते। पुराणांतरे॥ वैशाखमासि शुक्लायां तृतीयायां जनार्दन॥ यवानुत्पादयामास युगं चा वा रब्धं
कृतं॥ अतोऽयं कृतयुगादिः॥ भविष्योत्तरे॥ त्रेतासिततृतीयायां वैशाखे समपद्यतेति॥ त्रेता
युगादिरित्यर्थः॥ तत्कल्पत्वेनैव व्यवस्थापनीयं॥ भविष्योत्तरे॥ आद्या पूर्वं तृतीयायां यद्दत्तं विभवं
विना॥ सर्वं तदक्षयं याति श्रूयतामत्र यो विधिः॥ तृतीयां तामथासाद्य स्नात्वा संतर्प्य देवताः॥
एकचित्तेन दातव्या हास्तु देवं प्रपूजयेत्। उदकुंभान्सकरकान् सान्नान्सर्वरसैः सह॥ ग्रैष्म
ष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते॥ तथा तत्रैवोक्तं॥ गोधूमचणकादीनि सक्तुदध्यो ५५
दनं तथा॥ इक्षुक्षीरविकारांश्च सहिरण्यान्स्वशक्तितः। छत्रं वस्त्रमुपानच्च यदिष्टं तत्प्रदा
पयेत्॥ अस्यां सह विष्णुः पूज्य इति॥ पुराणांतरे॥ वैशाखस्य तृतीयायां श्रीसमेतं जगत्पतिं॥
लक्ष्म्या

नारायणं पूजयेद्धाः पुष्पधूपविलेपनैः॥ पराशरः॥ वैशाखमासस्य तु या तृतीया नवम्यसौ कार्तिक
शुक्लपक्षे। नभस्यमासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे॥ मत्स्यपुराणे॥ वैशाखस्य तृती
याथो नवमी कार्तिकस्य च॥ अमावास्या च माघस्य नभस्यस्य त्रयोदशी॥ एता युगादयः प्रोक्ताः पितॄ
णां मुक्तिहेतवे॥ आसु कृत्यमस्मिन्पुराणे। पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतन्मुनयो वदंति॥ तथा॥ कृते श्राद्धे विधानेन मन्वादिषु युगादि
षु॥ हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत्॥ माहाभारते॥ मन्वाद्याश्च युगाद्याश्च तिथयस्तासु स
मानवः॥ स्नात्वा दत्वा जपित्वा च अनंतफलमश्नुवेत्॥ तथा नक्षत्रवारयोगेन विशेषो नारदीये॥
वैशाखशुक्लपक्षे तु तृतीया रोहिणीयुता॥ दुर्लभा बुधवारेण सोमेनापि युता तथा॥ अत्र सु विहि
तविष्णुपूजनादौ श्राद्धकर्मणि च भविष्यत्पुराणे कालविशेषो प्युक्तो॥ यथा॥ द्वे शुक्ले द्वे तथा कृष्णे यु
गादीकवयो विदुः। शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके॥ इदं शुक्लयोः पौर्वाह्णिकग्रहणं

नष्टं द्विहितदानपूजनादि त्रिप्रायेण॥ वसिष्ठः॥ गौरीविनायकोपेता रोहिणीबुधसंयुता। विनापि रोहि
णीयोगात्कोटिपुण्यफलप्रदा॥ गौरी तृतीया विनायकश्चतुर्थी॥ तथा॥ रोहिणीबुधयुक्तापि पूर्ववि
द्धा विवर्जिता॥ मैत्र्या कृतापि मांधातः पुण्यं हंति पुराकृतं। अतो विष्णुपूजनादौ परयुताग्राह्येति
सिद्धं श्राद्धविषये तु॥ एवं मन्वंतरादीनां युगादीनां विनिर्णयः॥ महालयस्य पक्षस्य अष्टकानाम
पि स्मृतं इति दर्शश्राद्धनिर्णयप्रकरणे कालादर्शोदाहृतवचनेन सर्वासां युगादीनामापराह्णिकेन
प्राशस्त्याभिधानात्। युगादिप्रयुक्तश्राद्धविषये अमावास्यावदापराह्णिकी तृतीया ग्राह्येति सिद्धां
तः॥ अत्र विशेषः॥ मासद्वयेपि श्राद्धं स्यात्कालहाद्वौ युगादिषु आयतु वचनं॥ दशहरासु नोत्कर्षः श्रा
द्धं पि युगादिषु॥ इदं तु नक्षत्रवारादिभिश्चायुत्यत्र विशेषव्रतदानपरमित्यपाकमीनिर्णये वि
शेषतो निर्णेष्यते॥ तथाक्षयतृतीयायां गंगास्नानं कुर्यादित्युक्तं॥ वैशाखे शुक्लपक्षे तु तृतीयायां ६१
उपोष्य तथैव च॥ गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः॥ देवीपुराणे॥ गौरीपूजनमुपक्र

दि५ त्रि३

म्य॥ तृतीयायां तु वैशाखे रोहिण्यर्क्षे प्रपूजनं॥ उदकुंभप्रदानेन शिवलोके महीयते॥ इत्यक्षयतृ
तीया॥ अथ रंभातृतीया मार्गशीर्षशुक्लतृतीयातः समारभ्य रात्रौ गौरीसंरे पूज्योक्तद्रव्यं च प्रदि॥ य
जागरणानंतरं प्रभाते विप्रान्भोजयेत्तेषां दक्षिणां दत्वा पारणं कुर्यादेवं वर्षं यावद्व्रतं कुर्यादु
द्यापनमिति॥ तदुक्तं कृष्णेन युधिष्ठिरं प्रति॥ रंभातृतीयां वक्ष्यामि सर्वपापप्रणाशनीं॥ सु
खसौभाग्यफलदां पुत्रपौत्रप्रदां तथा॥ सपत्न्दर्पदलनां पार्वत्यै प्रियकाम्यया॥ शंकरेण पुरा
प्रोक्तां तामिमां भरतर्षभ॥ मार्गशीर्षे शुभे मासि तृतीयायां नराधिप॥ शुक्लायां प्रातरुत्थाय दं
तधावनपूर्वकं॥ उपवासस्य नियमं गृह्णीयाद्भक्तिभाविता॥ देवि संवत्सरं यावत्तृतीयायामुपोषिता॥
प्रतिमासं करिष्यामि पारणं चापरेहनि॥ तदविघ्नेन मे यातु समाप्तिं व्रतमुत्तमं॥ शरणं त्वां प्रपन्नास्मि
दौर्भाग्याद्धुद्धरेस्व मां॥ एवं संकल्पविधिवत्कौंतेय कृतनिश्चया॥ नारी धर्मपरा स्नानं कृत्वा
जितेंद्रिया॥ पूजायेत्पार्वतीनाम्ना रात्रौ प्राश्येत् कुशोदकं॥ प्रभाते भोजयेद्विप्रान् शिवभक्तान् वि

शेषतः॥ सहिरण्यं च जवर्णं दद्यात्तेषां च दक्षिणां। अनेन विधिना राजन् कुर्यात्तस्या व्रती व्रतं॥ सकुला
नां शतं सार्द्धं तारयेन्नात्र संशयः। गोमूत्रं प्राशयेत् पौषे माघे चैव तु गोमयं। फाल्गुने प्राश्य गोमूत्रं चैत्रे
दधि घृतं परे॥ लवणं प्राश्यते ज्येष्ठे आषाढे च तिलोदकं। श्रावणे तु प्रियं पूज्य पिबेत् गोशृंगजं जलं॥ बि
ल्वपत्रं तथा भाद्रे अर्धिने तंदुलोदकं। कार्त्तिके पंचगव्यं हि प्राश्य कुर्याच्च जागरं॥ प्रभाते भोजयेद्वि
श्रा५ प्रान् सपत्नीकान् मनोश्यान्। माल्यैर्वस्त्रैर्भूषयेच्च गोरणीं भोजयेत्ततः॥ वर्षं यावत्तृतीयासु व्रतं च
त्वा विधानतः। उमामहेश्वरं हैमं समाप्ते कारयेद्बुधः॥ उमामहेश्वरं रूपं विष्णुधर्मे॥ वामोत्संगे पार्व दे५
ती कार्या शिवः कार्यश्चतुर्भुजः॥ अक्षमालां त्रिशूलं च दर्पणं चीवरे दधेत्। एकवक्त्रस्त्रिनेत्रश्च व
मे च दयिता तनुः। शय्या चात्र विनिर्दिष्टा सर्वोपस्कर संयुता॥ सवत्सां शीलसंपन्नां गां दद्यात्पयस्विनीं॥ पा ५८
दुकोपानहौ वस्त्रं छत्रं चोपवीतकं। भाम महेश्वरं स्थाप्यार्थे आसने ताम्रजे नृप। पूजयेद्देवदेवेशीं नानापु
ष्पैः पाल्लैस्तथा॥ नैवेद्यैर्विविधैस्सद्गीतवाद्यैरनेकधा। ततो द्विजं समाहूय वेदवेदांगपारगं। सप

त्नीकं सुरश्रेष्ठ दिव्यचंदनचर्चितं॥ परिधाप्य च अंजलीकृत्य तस्यैतत्सर्वं निवेदयेत्॥ एवं कृते फलं यत्स्यात्तन्मय
क्यं मयेरितं। पुरुषो वाथवा नारी अतः शिवपुरं व्रजेत्॥ शोभनार्थं परया चीर्णं रंभया राजसत्तम
तेन रंभातृतीयेयं परं सौभाग्यदायिनी॥ योहं सर्वभूतेषु शो गौरी सैव न संशयः॥ इति मत्वा महा
भाग शरणं व्रज पार्वतीं॥ सा एव लक्ष्मी॥ इति रंभातृतीया। अथ ज्येष्ठशुक्लतृतीयायां पंचाग्निसाधने
नाम रंभातृतीयाव्रतमस्ति॥ गार्हपत्यं दक्षिणाग्निं सभ्यं चाहवनीयं पंच मंत्रास्करैतेज इति॥ एते पंचाग्नयः॥
तन्मध्ये दिवा विष्णुपरा तिष्ठेत्॥ एतद्व्रतविधिस्तु ग्रंथांतरप्रसिद्धत्वात् न लिखितः॥ अथ चैत्रशुक्लतृतीया
तथा भाद्रपदे च तृतीया मन्वादिः॥ तदुक्तं गार्ग्येण॥ आश्वयुक्शुक्लनवमी द्वादशी कार्त्तिके सिता॥ तृतीया चै
त्रमासस्य तथा भाद्रपदस्य च॥ अत्र सिता शब्दस्तृतीयाया चान्वेति॥ तथा॥ मन्वाद्यासु युगाद्यासु प्रदत्तः सलि
लांजलिः। सहस्रवार्षिकीं तृप्तिं पितृणां जनयत्यरं॥ द्विसाहस्राब्दिकीं तृप्तिं कृतं श्राद्धं यथाविधि॥ स्नानं दानं
जपो होमस्तदानंत्याय कल्पते। सर्वास्वपि तृतीयासु पतिस्त्वेन गिरिजा पूजनीया॥ तदुक्तं॥ प्रतिपत्प्रभृतिदे

वृं १ प ३ दिनत्रय

व्रताक्रमः। वह्निकिंकिरं चैणि रिजा गणेशाः फल्गुनी विशाखा वो पिंचतं नमहे शाइनि॥ तथा तृतीयायां त्रिवि
षत्पुरः लोलाभादिकां धनदं पूजयेदित्युक्तं॥ तृतीयायां च विहितं शंसं पूज्य धनमाप्नुयात्॥ क्रयादिव्यमहा
रेखजा। भादि च गुणो भवेत्। सौवर्ण्यपि प्रपुत्रस्त्वं कर्तव्य श्चतिथीश्वरः॥ इति सामान्यतस्तृतीया॥ अथ
माघशुक्लतृतीया॥ तत्रोमामाहेश्वरप्रीतये गुडलवणदानमुक्तं भविष्योत्तरे॥ माघशुक्लतृतीयायां
गुडस्य लवणस्य च॥ दानं श्रेयस्करं राजन्स्त्रीणां च पुरुषस्य च॥ गुडेन तुष्यते देवी लवणेन तु
शंकरः॥ तथा तीर्थविशेषे तृतीया नीष्टदोक्ता॥ नागरखंडे॥ पार्वतीतिलोत्तमासंवादे॥ माघशुक्ल
तृतीयायां स्नानार्थं विमलोदके॥ हाटकेश्वरजे क्षेत्रे रूपतीर्थमिति स्मृतं॥ या नारी प्रातरुत्थाय तत्र
स्नानं समाचरेत्॥ सा स्याद्रूपवती नूनं दृष्टे रविमंडले॥ सदा माघतृतीयायां तत्र स्नानं करोम्य ५८
हं॥ अद्य सा तत्र यास्यामि स्नानाय कृतनिश्चयेति पार्वतीवचनात्तत्र स्नानं महाफलदमिति॥ तथा त
त्र पंचपिंडिकापूजनं वांछितप्रदं॥ तदुक्तं॥ हाटकेश्वरजे क्षेत्रे पंच पिंडा यवच्छिंस्थिता॥ गौरीगौर्यस्त्व

ध्रु दे

यं तत्र स्थापिता परमेश्वरी॥ तामेषा वत्सरं या ध्रुवं श्रद्धया परया युता॥ सदा पूजयते प्रीत्या तृतीयायां विशेषतः
इत्येतिनारदस्य शांडिलीप्रतिवचनं॥ इति माघतृतीया॥ अन्यानि तृतीयाव्रतानि व्रतखंडादवगंतव्या
नि॥ इति तृतीयानिर्णयः॥ अथ चतुर्थी॥ चतुर्थी पंचमीविद्धा ग्राह्या॥ विष्णुधर्मोत्तरे॥ एकादशी तथा षष्ठी
अमावास्या चतुर्थिका॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः॥ युग्मवाक्येनापि पंचमीविद्धत्वं प्र
तीयते॥ युग्माग्नियुग्मभूतानामित्यादि॥ एतद्व्रतसिद्धवचनमेतद्विरुद्धं दृश्यते॥ द्वितीया पंचमी वेधा
द्दशमी च त्रयोदशी॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी॥ अत्र वचने पंचम्युपवासविषये स्ववे
धात्पूर्वोत्तरे तिथी पूर्वा चतुर्थीमुत्तरां षष्ठीं हंतीत्यतश्चतुर्थी षष्ठी च पंचमीविद्धा नोपोष्या॥ तदेवं विरो
धे सति यद्यपि केचिद्यवस्था क्रियते॥ चतुर्थ्याः पंचमीविद्धोपवासनिषेधः। कृष्णपक्षविषयः। पंचमी
विद्धोपवासविधानं च शुक्लपक्षविषयं॥ तथापि व्रतविशेषविषयो निर्णयो नोपलभ्यत इत्यभिप्रेत्य शु
क्ला वा कृष्णा वा या गणपतिव्रतोपयोगिनी सा पूर्वविद्धा॥ यान्यदेवताव्रतोपयोगिनी सोत्तरेति स्पष्टं

मुक्तं दीपिकाकारेण॥ अथ विघ्नपयजितित्वा चतुर्थी परेति॥ बृहस्पतिः॥ चतुर्थी गणनाथस्य मातृविद्धा
प्रशस्यते॥ मातृविद्धा तृतीयाविद्धा॥ कालादर्शे॥ सावित्र्यमापौर्णमासी चतुर्थी गणसंज्ञिता। रंभा तृतीया
चेत्येता उपोष्याः पूर्वसंयुताः॥ गणसंज्ञिता गणेशचतुर्थी॥ ब्रह्मवैवर्ते॥ चतुर्थी संयुता च सा तृतीया फ
लप्रदा। चतुर्थीयुक्तृतीयायां महापुण्यफलप्रदा॥ कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी॥ गणनाथं
सुनरां तोषयति गणेश्वरसंबंधेन तृतीयायुक्ता या चतुर्थ्या विधनात्। अन्यदेवताव्रते हि गणनाथस्तु
तोषिणीत्यसंगतं स्यात्। तस्माद्विनायकचतुर्थी तृतीयायुक्तैवोपोष्येति सिद्धं गणपतीव्रतव्यतिरिक्ते
व्रतेतु। भरण्यां च चतुर्थ्यां च [illegible] छनैश्चरदिने यमं। पूजयेत्सप्तजन्मोत्थैर्मुच्यते पातकैर्नर इति कूर्म
पुराणे॥ तथा। आहिताग्निर्द्विजो यश्च विधिते [illegible] चतुर्थ्यां सोपवासश्चतुर्थ्यां शुक्लपक्षस्य कार्तिके। 10
अभ्यर्च्य चतुरात्मानं वासुदेवमतंद्रितः। सर्वकामसमृद्धस्य स्वर्गस्य फलमश्नुते। ततो व्रतसिद्ध्य
र्थिना [illegible] त्वाग्निं देवः प्रपूजयेयत्। विष्णुधर्मीये त्वव्ययो वै चतुरः प्रदिष्टो वासुदेवः कथितश्चतु

चतुर्थीनिर्णयः॥ इति श्रीचल्लद्विवेदेन ग्रंथे निर्णयदीपके। हेरंबतुष्टये प्रोक्तश्चतुर्थ्यास्तु विनिर्णयः॥
अथ पंचमी तिथिः॥ स्कंदपूजनां गोपुर्यवासव्यतिरिक्तोपवासादिव्रते पूर्वतिथियुता ग्राह्या॥ तदुक्तं॥ अ ५२
पत्पंचमी तथाष्टमी भूतेच सप्तमी। रंभा तृतीया चेत्येतान्युपोष्याः पूर्वसंयुताः॥ पंचमी तथाष्टमीत्युक्ता
तु युग्मवाक्ये पूर्वविद्धा प्राप्तत्वात्॥ भूतं च अष्टमी चेति विग्रहे अष्टम्याः पूर्वनिपातिति थित्वेनाभ्यर्हि
तत्वादष्टमीशब्दस्य पूर्वनिपातः॥ अष्टमी भूते इति तु न अपि तु लक्षणेन तु पंचमी कर्तव्या॥ षष्ठ्या युक्ता
तु नारद॥ न हि [illegible] दीर्घे नागविद्धा कर्तव्या [illegible] कदाचन। तेन नवेव तत्र वचनेन पंचम्याः षष्ठ्यायु
विधानात् पूर्वयुतेति विरुद्धं॥ सत्यं पंचम्याः षष्ठ्यैता विधानमिदं नागपूजाविषयं। तदुद्देशेने
कनक्ते ब्राह्मणभोजनादि विषयं च। तदुक्तं। अनयोः पक्षयोर्नागान् पंचमीषु प्रपूजयेत्। इ
ति। वचनादविरोधः। किंच। अत्रोपवासग्राह्या श्रवणादुपवासव्यतिरिक्तव्रतविषये शुक्लकृष्ण
लपक्षसामान्येनास्य प्रवृत्तिः रितिस्तेयं। कारणं विना संकोचाभावात् नेमिषष्टी नागविद्धत्येन द

पिस्कंधषष्ठीव्यतिरिक्तविषयं। स्कंदषष्ठीतु पूर्वयुता निहिता सम्य स्मृतं नरैः। सप्तम्यष्टमी स्कंदषष्ठी शिव
रात्रिश्चतुर्दशी॥ एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेत्॥ पूर्वेद्युरुपवासं च कृत्वा षष्ठ्यां स्कंद
पूजयेदित्यपि चोक्तं॥ तदभिप्रायेणोपवासे पंचमी परयुता ग्राह्येत्युक्तं ब्रह्मवैवर्ते। स्कंदोपवा
से स्त्री कार्या पंचमी तु परान्विता॥ त्रिमुहूर्त्तापि तु षष्ठ्यां स्यात् परा पूर्वयुतान्यथा॥ पूर्वोपवासं व
चनं तु वाराहपुराणे॥ आषाढे शुक्लपक्षे तु तिथिः कौमारी वा स्मृता॥ पूर्वेद्युरुपोष्य विधिवत्त कः ५
स्यामभ्यर्चयेद्गुहं इति वचनात् पंचम्यां परविद्धोपवासस्तदंगत्वेन विहितः तथा॥ शुक्लाया
मथ कृष्णायां षष्ठ्यां संपूजयेद्गुहमिति स्कंदपुराणवचनात् षष्ठ्यां विहितस्य कार्त्तिकेयपूज
नस्य तदंगोपवासे शुक्ला वा कृष्णा वा पंचमी परयुतोपोष्येति सिद्धं॥ अथ पंचमी स्वविषयो
पवासे चतुर्थियुता ग्राह्या॥ पैठीनसिः पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नव १४
मी चैव कर्त्तव्या संमुखा तिथिः। सन्मुखा सायाह्नव्यापिनी पूर्वयुतेत्यर्थः। जाबालिः। प्रतिप

१ श्रावणशुक्लपंचमी नागपंचमी सा मध्याह्नव्यापिनी ग्राह्या [illegible] सर्वेषु मध्याह्नव्यापिनी तिथिरिति [illegible]
[illegible] चतुर्थी त्रिमुहूर्त्ता परं पंचमी द्वितीयदिने पंचमी त्रिमुहूर्त्ता परं षष्ठी तदा नागपंचमी चतुर्थीविद्धा

त पंचमी चैव न पोष्या पूर्वसंयुता॥ एकादशी च षष्ठी च अमावास्या चतुर्थिका॥ उपोष्याः परसंयुक्ताः परा
पूर्वेण संयुताः। आन्यपराः द्वादशी सप्तमी प्रतिपत् पंचम्यः एताः पूर्वयुताः। इत्यतः पंचमी चतुर्थीयुतेत्य
र्थः॥ स्कंदपुराणे॥ पंचमी तु तथा कार्या चतुर्थीसहिता विभो॥ एतानि विधिमुखेन पूज्यतापराणि
। प्रतिपत्पंचमी पूर्वा सावित्री वटपूर्णिमा॥ नवमी तात दशमी नोपोष्या परसंयुता॥ इति ब्रह्मवै
वर्त्तवचनं तु परविद्धानिषेधमुखेन पूर्वविद्धाप्रतिपादनपरं॥ अतः परं पूजांगोपवासव्यतिरिक्तो
पवासादिव्रते पंचमी पूर्वयुतेति सिद्धांतः। स्कंदस्य षष्ठ्या अधिपतित्वात्तेन तत्कृत्यादि तत्का
लव्यापिनी सर्वैरंगीक्रियते। इति पंचमी सामान्य॥ अथ पंचमी विशेषाः॥ श्रावणशुक्लपंचम्यां
द्वारस्योभयतो नागानालिख्य पूजयेत् तेन सर्पतो भयं न जायत इत्युक्तं भविष्यत्पुराणे॥
श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः॥ तथा
भाद्रपदे मासि पंचम्यां श्रद्धयान्वितः। यस्त्वालिख्य नरो राजन् कृष्णवर्णादिवर्णकैः इति॥ तेषां

स्वरूपं मनसा पुरा शृणु ॥ नागाश्चैव चक्रन्तर्मा खड्गखेटकधारिणः ॥ अथः सर्पाः जातिस्तेषां नाम्ने रू ईदृशोऽरूपि ॥
फणाश्च मुद्रिकन्तम्याद्विजिह्वा बाहवो समाः विषमा इत्यर्थः ॥ पूजयेद्दधिवद्धीरदधि दूर्वाक्षतैश्चन्दनैः गं
धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ॥ नागानां पूजयेत्तस्यां न भयं सर्पतो भवेत् ॥ क्षीरं च सर्पिस्तु नैवे
द्यं देयं सर्पिस्सुखावहमिति । तथा तस्मिन्नेव मासि तीर्थविशेषेणाप्यमितं फलमभिहितं । स्कंदपु
राणे ॥ च्यवनेनोक्तं ककर्कोटकं प्रति । अत्रापि स्त्रुश्चैतो यं हाटकेश्वरसंज्ञिकतो ॥ हेत्रैतत्र समी मा
वासः पुत्रकार्यस्त्वया सदा ॥ श्रावणे रुद्ररूपहेतु संप्राप्ते पंचमी दिने । संप्राप्स्यति परां पूजां
पृथिव्यां नवमं कुलं ॥ अद्यप्रभृति तत्तोयं नागतीर्थमिति स्मृतं ॥ ख्यातिं यास्यति त्वत्पृष्ठे स
र्पपातकनाशनं । यत्र स्नानं करिष्यंति संप्राप्ते पंचमीदिने ॥ न तेषां वत्सरं यावद्भविष्यत्य
हिजं भयं । विषार्दितस्तु यो मर्त्यस्तत्र स्नानं करिष्यति । तत्क्षणान्निर्विषो भूत्वा संप्राप्स्यति प ७५
रं सुखं ॥ पुत्रकामा तु या नारी पंचम्यां भास्करोदये ॥ करिष्यति तथा स्नानं फलहस्ता प्रभक्ति

तः ॥ भविष्यति च सा शीघ्रं वंध्यापि च सुपुत्रिणी ॥ नराणामपि स्नानमात्रेण वांछितप्रदमि
त्युक्तं तत्रैवं ॥ इति श्रावणपंचमी ॥ अथ पुत्रकामपंचमी ॥ ब्रह्मोवाच ॥ अथातः संप्रवक्ष्या
मि संक्षेपात्तु च विस्तरात् ॥ येनानुष्ठानमात्रेण पुत्रोत्पत्तिः प्रदृश्यते ॥ अष्टौ दोषाः स्मृता नारीणां
पुरुषस्य चतुर्दश ॥ तस्य दोषस्य शुद्ध्यर्थं पंचमीश्राद्धमाचरेत् ॥ गरुडपुराणे ॥ पुंनाम
नरकं घोरं पुत्रं दृष्ट्वा न पश्यति ॥ पौत्रेण स्वर्गमित्याद्युक्तैरित्येवं वैदिकी श्रुतिः ॥ अपुत्रस्य ग
तिर्नास्ति स्वर्गेत्यादि ॥ स्कंदपुराणे मार्गशीर्षे तथा माघे वैशाखे कार्तिके तथा ॥ पुत्रकाम
नरैः कार्या प्रकृष्टा कृष्णपंचमी ॥ पुत्रकाममनुष्याणां मन्योपायो न विद्यते ॥ इत्यु
क्तां कृष्णपंचमी श्राद्ध इति कृतं प्रायश्चित्ता पूर्वमादौ तु रुद्रैकादशकं जपेत् ॥ गायत्र
म्र्यष्टसहस्राणि दशांशेन तु होमयेत् ॥ कृष्णपक्षे चतुर्थ्यां तु होमं कुर्यात्स्वशक्ति
तः ॥ अहा देवालस मच्यव्य गणनाथं प्रपूजयेत् ॥ पक्षे तु पंचमी श्रेष्ठा श्राद्धे वै पुत्रदा

न्र्णं॥ वैश्वदेवादिकं श्राद्धं षड्भिः पिंडैः प्रकल्पयेत्॥ इच्छं पार्वणवत्कुर्यात्काम्ये श्राद्धे विधा
नतः॥ मध्यमं तु ततः पिंडं नमस्कुर्यात्पितामहं॥ गृहीत्वा घ्राय दातव्यो धर्मपत्नीस्तु
तार्थिना। पत्नी तं पिंडमादाय प्राश्नाति विधिवन्मुदा। आश्वलायनकारिकायां। पंक्तौ २२
सामान्यतो पि प्राशनं तेन मंत्रेण विहितं। त [illegible] त सह त्रेचा॥ [illegible] यं क्तौ॥ श्राद्धकल्पे पि
आरभ्य पर्यंतं॥ आ[illegible] धत्तं पितरो गर्भमायं तु नो जयेत्पतिं॥ दक्षिणं दिशिमाश्रित्य
ततो भुंजीत वाग्यतौ एवं द्वादश मासेषु स्वशक्त्या श्राद्धमाचरेत्॥ इति। पुत्रकाम पंच
मी श्राद्धप्रारंभं तु शमघानरण्यां योः पुसति। मघायुक्ता दे [illegible] नरण्यां श्राद्धं कुर्यात्
यत्नतः। पिंडदानं न कुर्वीत यदि छिं [illegible] जीवतः सुतः। नित्यनेन पिंडदाननिषेधो नाशंक
नो यः॥ स्मृत्यंतरे। कुर्या हे पुत्र पंचम्यां च [illegible] दश्यां महालये। पिंडदानं प्रकु[illegible] त पैत्र्य १८
याम्यं न दुष्यति। प्रारंभे कृष्णवासांसि कृष्णा गौर्दक्षिणा तथा। ततो ऽसंवत्सरस्यांते [illegible] लदानं
४ श्री

प्रदापयेत्। यत्तु स्कंदपुराणे। येत्त्वकं ब्रह्मणे दद्यात्त्यैतामहं तु वैष्णवे। रुद्राय प्रपितामहं दे
वानुद्दिश्य दीयत इति पिंडत्रयाभिधानं तदेतद्विष्णुरूप मध्यम श्राद्धं षड्भिः पिंडैः प्रकल्पयेदि
ति स्कंदपुराणवचनविरोधः॥ किं चापि पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्त्त
व्यं विशेषान्नरकं व्रजेदिति सर्वस्मृतिपुराणसंमते नरकपातमधिकं फलं स्यात्॥ तस्मा
त्पार्वणद्वयविधिना श्राद्धमिति स्तुयारुणे। कृष्णपक्षस्य पंचम्यां पंचभूतानि चार्चयेत्। नाग
येन पयसा सिद्धैर्मुख्यन्नैः श्राद्धमाचरेत्। पितृमातामहानां च सपत्नीकौ जितेंद्रिय इति
पार्वणद्वये नोक्तं। अथ तत्रेति कर्त्तव्यता पुराणेन। वसिष्ठः। प्रारंभे सितपंचम्यां कुर्या
च्छांतिं विनायकीं। शांतिकं विधिवत्पूर्वं कुर्यान्मातुः प्रपूजनं। शय्यां वा रतिसंयुक्तां कामं सं
पूजयेत्सुधीः। ततोऽधः स्थापयेत्कुंभं सजलं तां [illegible] नवं। तस्योपरि न्यसेत्पात्रं नागपूज
नं तो ततः। मंडलास्थं सुरांस्तत्र पूजयेद्विधिवद्द्विजः। नमस्ते कामदेवाय नमस्ते विश्वमो

हनारवीतीशायनमस्तुभ्यंपुत्रंदेहिममार्चितः। काममंत्रः नमस्तेसितनागायनमस्ते
श्वेतरूपिणे। शेषरूपविष्णुरूपेणममपुत्रंप्रयच्छहि॥ नागमंत्रः॥ पायसंअपविखादुश्रा
द्धंकुर्वीतपार्वणं॥ तत्रपूर्वंप्रकुर्वीतवैश्वदेवप्रपूजनं॥ ध्वनिरोचननामानौकाम्यश्राद्धे
प्रपूजयेत्॥ पैतृकंब्राह्मणेपिंडंपैतामहंतुवैष्णवं॥ रुद्रायप्रपितामह्यंदेवानुद्दिश्यदी
यते॥ शतपत्रैश्चंपकैश्चपूजानेव्यायथाक्रमं॥ नमस्तौपितृरूपायसोमरूपनमोस्तु
ते॥ आज्यपायनमस्तेस्तुसौम्यत्वंसंततिंकुरु॥ पितामहनमस्तेस्तुबर्हिषद्पुषेनमः
कव्यवाडायनीलायपुत्रदायनमोनमः॥ प्रपितामहरूपायपूज्यस्त्वंममपूर्वजा
पिंडंगृहाणपूजांचप्रसन्नःसुतदोभव॥ इतिसंपूज्यविधिवद्ब्राह्मणान्भोजयेत्ततः
मंत्रेणमध्यमंपिंडंपत्नीप्राश्नातिवाग्यताकव्यवाडोनलश्चैवनमःसोमायमाचौसे॥ ११
अग्निष्वात्ताबर्हिषदआज्यपाःसोमपास्तथा॥ आदित्याद्वादशश्चैवयूयंपुत्रंप्रयच्छथ॥
सू

नैव
इतिसंमंत्रितंपिंडंप्राश्नीयात्प्राशितंपयः॥ अनेनैवविधानेनकुर्यात्संवत्सरंसुधीः॥ वर्षान्ते
वटकंशय्यांनागंदद्याद्द्विजन्मने॥ प्रसादात्कामधेयाजस्यपूर्वजानांनसंशयः॥ नवि
ष्येत्येकपुत्रापिपूस्तास्मिन्संवत्सरेकृते॥ पुण्यंयशस्यमारोग्यंपुत्रदंपापनाशनं॥ गयातु
ल्यंनृपश्रेष्ठपंचम्यांबकुलेदिने॥ श्राद्धंसर्वार्थसिध्यर्थंमहापातकनाशनं॥ समाप्ते
कपिलांदद्यात्वस्त्रयुग्मंगुरोरपि॥ पितृश्राद्धत्वात्कुतपादिकालव्यापिन्यां॥ इतिपु
त्रपंचमी॥ अथऋषिपंचमी॥ तत्रकश्यपादीन्ऋषीन्संपूज्यमुन्यन्नशाकादि
ना॥ एकभक्तंव्रतंकुर्यात्तेनसर्वपापक्षयोभवेदिति उक्तंमांधातृवसिष्ठसंवादेकौ
शिकसंहितायां॥ ऋषिपंचमीतिविख्यातंकथायाःश्रवणेन नभस्यस्यतुमासस्यप
क्षेयापंचमीसिता॥ स्वातिनक्षत्रसंयुक्तामहापातकनाशनी॥ तामनुप्राप्यमुनिध
न्यैर्व्रतोत्तमं॥ ऋषिपंचमीतिविख्यातंकथायाःश्रवणेनवा॥ सपूर्वयस्तुसंपूज्यात्रऋषी

नरो वा यदि वा नारी मुच्यते स)

त्या समन्विताः॥ ऋतुकाले तु संप्राप्ते स्नानतोऽस्नानतोपि वा॥ ~~स्त्रीकं अतिक्रमं~~ नरो वा यदि वा ना
री मुच्यते स सर्वं स्मृत्य कुरुते पापं नारी संमूढमानसा॥ तत्सर्वं विलयं याति सप्तर्षीणां प्रसादतः॥
वंकिल्बिषैः॥ तस्मात्त्वमपि मां ध्यात्वा पंचमीव्रतमाचर॥ संवत्सरकृतं पापं व्रतेनानेन नश्य
तीति॥ व्रतसमुच्चये॥ मासि भाद्रपदे राजन् शुक्लपक्षे तु पंचमी॥ तदा यत्नेन संग्राह्या एक
भक्तेन वै नृप॥ इत्युपक्रम्य शाकाहारस्तु कर्तव्यो नीवारैः श्यामकैस्तथा॥ फलाहारश्च
कर्तव्यं ऋषीणां प्रीतिहेतवे॥ अस्य व्रतस्यातिप्रसिद्धत्वात् पूजादिविधिर्नोक्तोऽस्तीति॥ अ
स्य व्रतस्यैकभक्तरूपत्वात् एकभक्ततिथिनिर्णयेन निर्णयः॥ दिनद्वयेऽतिरेकभक्तका
लव्यापिनी परयुता ग्राह्या॥ पंचमी तु कर्तव्या षष्ठ्या युक्ता तु नारद इत्यनेन ब्रह्मवैवर्तवचने १८
न॥ यत्तु॥ पंचमी तु तथा कार्या चतुर्थ्या सहिता विभो॥ इति स्कंदपुराणवचनस्योपवासप्रकर
णे पाठात् कृष्णपक्षोपवासविषयत्वं स्थापितं कालनिर्णये॥ अत एव दीपिकाकारैः॥

कृष्णा पूर्वयुता सिता परयुता स्यात् पंचमीति स्थितिर्यद्वा त्वेव विनोपवाससमुच्चयीति॥
एतेनोपवासव्यतिरिक्तव्रते परयुताभिधाने स्कंदोपवासनागपूजाव्यतिरिक्ते पूर्वयु
ते कुत्रचिदुक्तं तदपि च निराकृतं विनोपवाससमुच्चयी परेति स्पष्टोक्तत्वात्॥ इति ऋषिपं
चमी॥ अथ लक्ष्मीपंचमी॥ यः पंचम्यां लक्ष्मीं संपूज्योपवासं कुर्यात्॥ स वैष्णवं पदं याति॥
पद्मपुराणे॥ लक्ष्मीं समभ्यर्च्य पंचम्यामुपवासी भवेन्नृप यः॥ स मांते हेमकमलं दद्याद्धेनु
समन्वितं॥ स वैष्णवं पदं याति लक्ष्मीः स्याज्जन्मजन्मनि॥ एतल्लक्ष्मीव्रतं नाम दुःखशोक
विनाशनं॥ इति लक्ष्मीपंचमी॥ पयोव्रतस्तु पंचम्यां दत्वा नागं द्विजातये॥ सौवर्णं सर्पजं
नितं भयं तस्य न जायते॥ एतत्सर्पव्रतं प्रोक्तं सर्पमैत्रीकरं परमित्यादीनि नानाप्रकारा
णि पंचमीव्रतानि व्रतखंडादवगंतव्यानि॥ पंचम्यां नागाः पूज्या अधिपतित्वात्॥ तीर्थ
विशेषे पंचम्यां स्नानेनापि पापक्षयो जायते॥ तदुक्तं नागरखंडे॥ कृष्णपक्षे तु पंचम्यां

६

६३ मासि चाउपदेन्नृप॥ रागवाप्यां नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ श्रद्धया परमा युक्तः सं
प्राप्ते पंचमीदिने॥ स्नात्वा करिष्यति श्राद्धं यावत्संवत्सरं नृप॥ अपुत्रः प्राप्स्यते पुत्रान्वंश
वृद्धिकरान्महीति॥ इति चलद्विवेदेन ग्रंथे निर्णयदीपके॥ व्रतोपवासविषये निर्णीता पंचमी
तिथिः॥ इति पंचमीनिर्णयः॥ अथ षष्ठी॥ स्कंदोपवासघति रिक्ता षष्ठी ~~धर्मार्थकोवि~~दैतिथि
रुपवासादिव्रते परयुता ग्राह्या॥ षण्मुन्योरिति तिथियुग्मावाक्यात् नागविद्धा न कर्त्तव्या षष्ठी आ५
चैव कदाचन॥ सप्तमीसंयुता कार्या षष्ठी धर्मार्थकोविदैरिति स्कंदपुराणे॥ तथा च निगमः॥
नागविद्धा तु या षष्ठी शिवविद्धो महेश्वरः। चतुर्दशी कामविद्धास्तिस्रः स्तामलिना स्मृताः।
नागः पंचमी ज्ञेया नुः सप्तमी कोमस्त्रयोदशी स्कंदपुराणे। नागविद्धा तु या षष्ठी सप्तम्या तु त ७९
थाष्टमी। ऋतविद्धा प्रमावास्या न ग्राह्या मुनिसत्तमेत्यादीनि यानि पूर्वविद्धानिषेधकानि
तानि स्कंदषष्ठीव्रते परषष्ठीव्रतोपवासविषये योजनियानी। नि। स्कंदषष्ठी तु पूर्वयुक्तै

वोपोष्या॥ तथा। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिः चतुर्दशी। एताः पूर्वयुताः कार्यास्तिथ्यंते पा
रणं भवेत्। अतः स्कंदषष्ठीव्रते तरषष्ठी विधिमुखेन परविद्धा वाक्यानि। विष्णुधर्मोत्तरे। एका
दश्यष्टमी षष्ठी द्वितीया च चतुर्दशी॥ अमावास्या तृतीया च उपोष्याः स्युः परान्विताः॥ द्विती
या च चतुर्दश्यष्टम्यः शुक्ला [illegible] तृतीया। रंभाव्यतिरिक्ता। बृहस्पतिः। एकादश्यष्टमी षष्ठी पौर्ण
मासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विताः। निगमे। षष्ठ्यष्टमी अमावा
स्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्याः पराः पूर्वेण संयुताः। अत एव ब्रह्मवैव
र्त्ते। न हि षष्ठी नागविद्धा कर्त्तव्येति कदाचनेति। एवं सति स्कंदव्यतिरिक्ता षष्ठी परयुतेति
सिद्धांतः। परदिने षष्ठ्यभावे परविद्धा ग्राह्येत्युक्तं। तृतीयानिर्णये। यत्तूक्तं। नागो द्वादशना
डीभिर्दिक् नाशयन्त्यक्षरां तिथिमिति। तत्र स्कंदोद्देशेन विप्रभोजनादिकं न कार्यमित्युक्तं प्राक्।
नक्तैकभक्तादीनि अन्यान्यपि च कालविशेषोक्तानि तत्कालव्याप्त्यैवेति षष्ठी सामान्यनि

र्णयः॥ अथ षष्ठीविशेषाः। भाद्रपद शुक्ल षष्ठी भौमवैधृतिनसमन्विताः विशाखा भौमयोगेन
साम चंपेति हविश्रुता॥ त्रेतायां चैव पंचाशत्यावंत शुरू कृते युगे। अवंतीचक्रलौ त्रिंशत्‌ द्वाप
रेतु दशाधिका॥ अतो देवमनुष्याणां दुर्लभा तपसत्तमा। सर्वपापहरं यं कुर्याद्भूतानामप्यखं
डतां॥ दुर्वाससाप्युक्तं। द्विदैवत्यर्क्ष भौमेन वैधृतेन समन्विता। नभस्ये षासिता षष्ठी सा चंपे
ति निगद्यते। द्विदैवत्यर्क्षं विशाखा। अथेयं चतुर्णां योगेन चंपाभिधानमभिधत्ते॥ अर्कोद
यव्रतवत्॥ अथ यां लभ्ययोगत्वात्पूर्वदिने परदिने वा यदा योग उपलभ्यते तदा व्रते ग्राह्या॥
न पूर्वविद्धापर [struck-through] विद्धादरः॥ तथापि सूर्यव्रतत्वाद्दिवा योगसंबंधिनी ग्राह्या॥ दिवैव
योगः शस्तो यं न च रात्रौ कदाचनेत्यर्कोदयव्रतोक्तमत्रापि समानं॥ अस्मिन्‌ चंपाव्रते व्रतखंडे कु १८
पंचम्यामुपवासो विहितः। यद्यपि। ततः प्रभाते विमले गत्वा गुरुगृहं प्रती। सर्वोपकरणैः सू
र्यमाचार्याय निवेदयेत्‌ इत्यनेन रात्रिसंबंध उक्तस्तथापि दिवानुतः प्रशस्त इति संतोष्टव्यं नियम

परक्षुनाम प्रतापे विशेष श्लोकः॥ अयने विषुवे चैव कपिलाषष्ठ्यादिषु। कर्कस्नानात्कालिकी शुद्धिः स्नानदानव्रतादिषु॥ ८

मुपवासनियमं॥ व्रतविधिः पुराणसमुच्चये॥ पंचम्यां नियमं कुर्यात्‌ आचार्यवचनाद्‌
व्रती॥ षष्ठ्यां स्नानं प्रकुर्वीत संतर्प्य पितृदेवताः॥ अभ्येत्य स्वगृहं मौनी सूर्यं मनसि
चिंतयेत्‌॥ स्थापयेद्व्रणं कुंभं ताम्रपात्रं च तत्पोपरि॥ तस्योपरि न्यसेत्‌ सूर्यं पलैकेन वि
निर्मितं॥ सौवर्णं यथाशक्त्या वित्तसारं तथारुणं॥ अर्चयेत्तं जगन्नाथं गृहीत्वाज्ञां गुरोः
स्वयं॥ षडक्षरेण मंत्रेण गंधपुष्पादिभिः स्रवतं॥ नमः सूर्यायेति मंत्रः॥ धेनुं पयस्वि
नीं दद्यात्‌ सूर्यो मे प्रीयतामिति॥ ततः प्रभाते विमले गत्वा गुरुगृहं प्रती॥ सर्वोपकर
णैर्युक्तमाचार्याय निवेदयेत्‌॥ गवां कोटिप्रदानेन कुरुक्षेत्रे च पर्वणि॥ चंपाव्रतस्य राजें
द्र कलां नार्हति षोडशीं॥ इति चंपाषष्ठी॥ अथ कपिलाषष्ठी॥ भाद्रपद षष्ठी रोहिणी
व्यतिपात भौम योगेन कपिला प्रोक्ता॥ तदुक्तं वाराहपुराणे॥ नभस्यस्य तु कृष्णपक्षे चेद्रोहि
णी पात सूर्यसुतैः युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता॥ व्रतोपवास नियमे ग्रा

भाद्रे लक्षे कुरोहिण्यां भानुवारे यथा कुजे। पाते [illegible]

स्कंदं तत्र पूजयेत्॥ कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेदिति। निर्णयामृते तु शुक्ला
यां रोहिण्यसंभावनया कृष्णपक्षे इति लिखितं॥ कालादर्शे नाशुक्ले त्यभाणि। व्रतसमुच्चये॥
प्रौष्ठपदासिते पक्षे षष्ठी भौमेन संयुता॥ व्यतीपातेन रोहिण्या सा षष्ठी कपिला स्मृता॥ यस्मिन्
कालेऽत्र वेदैते गुणैः षष्ठी युता तदा॥ यस्मिन्काल इति श्रावणस्यानंतरं षष्ठी यद्येतैर्योगैर्युक्ता
तदा कपिला सदैव प्रोष्ठपद इति। निर्णयामृते तु। भानौ चैव करे स्थित इति यल्लिखितं तच्चंद्र
शुक्लपक्षादियुक्तौ तत्कथिलौ मासाद्विप्रायेण तत्रापि स्यात्। इदं वचनं व्रतखंडे नास्ति अतो
विचार्यो। अलभ्ययोगाच्च न यस्मिन्काल इति श्रावण्युच्च चंपाषष्ठी निर्णयेनास्या निर्णयः॥
व्रतविधिस्तु व्रतखंडात्॥ इति। कपिलाषष्ठी। तथा च भविष्यत्पुराणे॥ यथं भाद्रपदे मासि ८१
षष्ठी स्याद्भरतर्षभ। इयं पापहरा पुण्या शिवा शांता शुभानघ। स्नानदानादिकं सर्वमस्या
मक्षयमुच्यते। अस्यां पश्यंति गांगेयं दक्षिणपथमाश्रितं। ब्रह्महत्यादिपापैस्तैर्मुच्यते

नात्र संशयः। इति स्कंददर्शनषष्ठी। षष्ठीव्रते धनप्राप्तिः स्यात्। स्कंदपुराणे। षष्ठीनाम तिथिर्या
स्यात्सा मान्या दैवतैरपि। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन तैलक्षारवि
वर्जितः। अस्मिन्सूर्यव्रते तात दारिद्र्यं न भवेत्कुले। षष्ठीतिथिं समुद्दिश्य ब्राह्मणस्य च भोजनं।
शाल्योदनं च पयसि कृत्वा शर्करयान्वितं। बाहुल्यं घृतसंयुक्तं वर्षमेकं प्रदापयेत्। व्रतांते वि
प्रमाख्याय अव्यंगिनशरीरिणां। तस्मै देया सुशीला च गौः सवत्सा पयस्विनी। अनेनैव विधानेन यः
षष्ठीव्रतमाचरेत्। धनप्राप्तिरिदानीं स्याद्दारिद्र्यं न च तत्कुले॥ इति दरिद्रहरषष्ठी॥ अथ का
र्तिकषष्ठी। कार्तिके शुक्लषष्ठी तु भौमवारेण संयुता। महाषष्ठीति सा प्रोक्ता सर्वपाप
हरा तिथिः। तस्यां स्वपिति वै वह्निः पूर्वत्रोपोष्य वै नरः। षष्ठ्यां वह्निं समभ्यर्च्य कुर्याद्दक्षि
महोसवं। मत्स्यपुराणे। तथा। आषाढशुक्लषष्ठी तु तिथिः कौमारिका स्मृता। कुमारमर्च
येत्तत्र पूर्वत्रोपोष्य वै नरः। सर्वास्वपि षष्ठीषु तिथ्यधिपतित्वेन स्कंदः पूजनीय इति।

आ

एवं नानाप्रकाराणि षष्ठीव्रतानि नागरखंडादवगंतव्यानि। उक्तनिर्णयेन निर्णीतानि तथा
माघषष्ठी॥ माघषष्ठ्यां क्षेत्रविशेषे शंभुदर्शनात्सर्वपापक्षयो जायते। तदुक्तं स्कंदपुराणे।
हाटकेश्वरजे क्षेत्रे देवदेवं महेश्वरं॥ दृष्ट्वा विमुच्यते पापात् स्थापितं नलभूभुजा। यस्तं पश्ये
त्तरोगघ्न्यां माघषष्ठ्यां सिते द्विजः॥ सर्वरोगविनिर्मुक्तः प्राप्नोति परमं पदं। कंडूपामाददद्रू
णि मंडलानि विचर्चिका। दर्शनात्तस्य नश्यंति जंतूनां भावितात्मनां। अस्ति तस्याग्रतः कुंडस्व
च्छोदकसुपूरितं। यस्तत्र कुरुते स्नानं प्रत्यक्षे सूर्यवासरे। अपि कुष्ठीमयग्रस्तः सद्रूपस्या
त्पुनर्नवा। यदा संस्थापितः शंभुर्नलेन पृथिवीभुजा। तदा तुष्टेन रुद्रेण चाभिहितं तु नलाग्रतः॥ इ
ति माघषष्ठी॥ अथांगारषष्ठी। भौमेन युक्ता षष्ठी तीर्थविशेषे स्नानादिना महापातकविनाशका ८२
रिणी। तदुक्तं नागरखंडे। स्त्रीहत्यया समायुक्तो भीष्मः कुरुपितामहः। तीर्थयात्राप्रसंगेन चमत्
कारपुरं ययौ॥ अथ तस्य महामासस्तु पुण्यं तत्र याशिरः॥ स्नात्वा श्राद्धं च विधिवद्यावच्छ्रद्धा

ना३

स

समन्वितः। तावदाकाशजा वाणी वाक्यमेतदुवाच ह। भीष्म भीष्म महाबाहो नार्हस्त्वं श्राद्धजं वि
धिं। कर्तुं स्त्रीहत्यया युक्तं सूनस्माच्छृणु वचो मम। शर्मिष्ठातीर्थमित्येव ख्यातं पातकनाशनं। अ
स्मात्स्थानात्समीपस्थं वारुण्यां दिशि पुण्यकृत्। कृष्णांगारकषष्ठ्यां यो नरः स्नानं समाचरे
त्। स स्त्रीहत्याकृतात्पापात् मुच्यते नात्र संशयः। अद्य भौमयुता षष्ठी तस्मात्तत्र द्रुतं व्रज। अहं
तव पिता पुत्र शंतनुः पृथिवीपतिः। स्त्रीहत्यान्वितं ज्ञात्वा तत्स्नेहेन मिहागतः। ततो भीष्मो द्रुतं गत्वा
तत्र स्थाने समाहितः। स्नानं कृत्वा ततः श्राद्धं चक्रे श्रद्धासमन्वितः। ततो भूयः समागत्य तं प्रोवा
च स शंतनुः। विपाप्मा त्वं कुरुश्रेष्ठ संजातोसि न संशयः। तस्मान्निजं गृहं गच्छ राज्यचिंतां समाच
र॥ इत्यंगारकषष्ठी। तथा तत्रैव नैरादित्यस्ततश्चान्यो यो नरेण प्रतिष्ठितः। षष्ठ्यां तं सूर्यवारेण
दृष्ट्वा पापात्प्रमुच्यते। रोगाद्विमुच्यते रोगी दरिद्रो धनमाप्नुयात्। ननेवचनाद्विवेदेन ग्रंथेन निर्णयदीपके। न
नं धनसंयुक्तो जायते षष्ठीविनिर्णयः॥ अथ सप्तमी॥ सप्तमी तिथिरूपवत्सादिभ्रते सर्वतिथ्यादिनोयै

म

परतिथ्यंभि तोतोपोष्या १

पोष्याः। तदुक्तं कूर्मपुराणे। नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः। कामविद्धो त्रवेदिस्कुः न ग्राह्यास्ते सु
वासराः ६। तिथिनागः पंचमी। रुद्रोष्टमी। दिवाकरः सप्तमी। कामस्त्रयोदशी। विष्णुर्द्वादशी। पक्षौ का द
शमावास्या। पूर्वविद्धास्तु याष्टमी। सप्तमी परविद्धा नु नोपोष्या हि कदाचनेति स्कंदपुराणवच
नेनापि सप्तमी परविद्धा निषिद्धा। न याः सप्तमी नाष्टमी युक्ता न सप्तमी न पाष्टमीति ब्रह्मवैव
र्त्ते सप्तम्यष्टम्योर्मिश्रत्वं प्रतिषेधदर्शनात्। षष्ठ्यष्टम्योरिति युग्मवाक्याच्च। षष्ठी युक्ता न सप्तमी
उपोष्येति स्कंदपुराणे। तुपरा विद्धां निषिध्य षष्ठीसंयुक्तायाः प्राशस्त्यमुक्तं। षष्ठ्या युता सप्तमी च क
र्तव्या तात सर्वदा। षष्ठी च सप्तमी यत्र तत्र संनिहितो हरिः। तत्रेति षष्ठीयुक्ते सप्तम्युपवासो रविसं
क्रान्त्यधिपतिः संनिहितः संनिधानेन व्रतानुग्राहक इत्यमुमेवार्थमाह पैठीनसिः रविः पंचमी स
प्तमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्त्तव्या सन्मुखा तिथिरिति। सन्मुखवारव ८३
सायाह्नव्यापिनी। एवं निगमे प्युक्तं। षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्या

मराः पूर्वेण संयुता इति। षष्ठ्या परा सप्तमी सा पूर्वयुतोपोष्येत्यर्थः। कृष्णसप्तमीविषये तु विशेषवैच
नान्निधनाभावात् एतैरेव स्कंदपुराणनिगमादिवाक्यैः कृष्णापि पूर्वतिथ्यन्वितोपोष्येति दीपि
काकारः। पूर्वा स्यादिह सप्तमीति। इति तिथिनिर्णये सप्तमी पूर्वा पूर्वतिथियुतेत्यर्थः। कालादर्शे
प्रतिपत्पंचमी कृष्णाऽष्टमी भूते च सप्तमी। रंभा तृतीया चेत्येता उपोष्याः पूर्वसंयुताः। अत्र सप्तमी न४
कृष्णा। अष्टमी चतुर्दश्योः साहचर्यात् शुक्ला तु युग्मे पूर्वा प्राप्नुवन्। अत उक्तयौ पूर्वयुते उपोष्ये इति
सिद्धांतः। पूर्वविद्धा ग्राह्येत्युक्तेपि पूर्वदिने सायं तिथ्यभावे निषिद्धापि परविद्धा ग्राह्या। एतत्सर्वं पू
र्वविद्धा साधारणं। नक्तैकभक्तादिकं तु कर्मकालव्यापिन्यामेवेति सप्तमी सामान्यनिर्णयः।
अथ सप्तमी विशेषः॥ यदा शुक्लपक्षे सप्तम्यां सूर्यसंक्रान्तिः स्यात्तदा स्नानादिकमनंतफलदं स्या
त्तदुक्तं भविष्योत्तरे॥ ब्रह्मोवाच॥ शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः। महाजया तदा
स्यौद्दे सप्तमी भास्करप्रिया। स्नानं दानं जपो होमः पितृदेवाभिपूजनं। सर्वं कोटिगुणं प्रोक्तं त

पनेनमहौजसायस्त्वस्यांमानवोन्नक्त्याघृतेनस्नापयेद्रविं।सोश्वमेधफलंप्राप्यततःसूर्यपदंव्रजेत्।पयसास्नापयेद्यस्तुयातिसूर्यसलोकतामिति।तथातस्मिन्नेवपुराणे।शुक्लपक्षस्य
सप्तम्यांनक्षत्रंपंचतारकं।यदाभवेत्तदाज्ञेयाजयानामेतिसप्तमी॥पंचतारकमितिरोहिण्य
श्लेषामघाहस्तश्रवा।तस्यांदत्तंकृतंजप्तंतर्पणंदेवपूजनं।सर्वंशतगुणंप्रोक्तंपूजाचादिदिवाकरे।तथा।शु
क्लपक्षस्यसप्तम्यांसूर्यवारोभवेद्यदि।सप्तमीविजयानामतत्रदत्तंमहाफलं।स्नानंदानंजपोहोमउपवा
सस्तथैवच।सर्वंविजयसप्तम्यांमहापातकनाशनमिति।तथा।षष्ठीयुतायांसप्तम्यांरविवारेप
द्मयोगोविधीयते॥षष्ठीसप्तमीसंयोगेवारश्चेदंशुमालिनः॥संयोगोयंपद्मकोनामकोटिसू
र्यग्रहैःसमइतिस्मृत्यंतरे॥कालिकापुराणे॥कृतोपवासःषष्ठ्यांतुसप्तम्यांयस्तुमानवः॥कारो
तिविधिवत्पूजांभास्करःप्रीयतामिति॥सर्वरोगविनिर्मुक्तःसूर्यलोकेमहीयते॥तथा॥सप्त ८४
म्यांपूजयेद्देवंचित्रभानुंविभाकरं॥रक्तैश्चगंधकुसुमैर्महदारोग्यमाप्नुयात्॥इतिभवि

ष्यपुराणेतु॥तथामाघशुक्लसप्तमीमन्वादिःतदुक्तंगार्ग्येण॥आषाढस्यापिदशमीमाघ
मासस्यसप्तमी॥तासुस्नानादिकंसर्वमानंतफलदंभवेत्॥इतिविशेषसप्तमी॥अथमाघ
शुक्लसप्तम्यचलासप्तमीतस्यांप्रभातसमयेमत्स्यादिभिरप्यनवगाहितेजलेस्नानंसर्व
पापहरंसौभाग्यदंभवेत्॥तदुक्तंभविष्योत्तरे॥मयानदत्तंनकृतंनोपवासव्रतंकृतं॥नत्वयान
पूजितःशंभुःकथंपापंप्रणश्यतीतिपृष्टेदेवसिद्धाश्च॥माघस्यसितसप्तम्यांसर्वकामफलप्रदं॥
रूपसौभाग्यजननंस्नानंकुरुवरानने॥कृत्वाषष्ठ्यामेकभक्तंसप्तम्यांनिश्चलंजलं॥रात्र्यंतेचालयेद्यावत्स येथा
त्वंकृत्वाशिरसिदीपकं॥माघस्यसितसप्तम्यामचलेचालितंचयत्॥जलंमत्वातांसर्वेषाम्मतं
प्रक्षालनंततः॥नकेनचाल्यतेयावत्तावत्स्नानंसमाचरेत्॥नकेनचालितंनिश्चलंजलंअत
एवरात्र्यंतेकिंविदात्रिशेषइत्यर्थः॥स्मृतिचंद्रिका॥सूर्यग्रहणतुल्यातुशुक्लामाघस्यस
प्तमी॥अरुणोदयवेलायांतत्रस्नानंमहाफलं॥अरुणोदयकालंआचारस्मृतौ॥चतस्रोघ

मलं
टिकाः प्रातररुणोदय उच्यते॥ मुनीनां स्नानकालोयं गंगांभःसदृशः स्मृतः॥ तत्र सप्तम्यां स्नानं॥ स्ना
ने चाभ्यंजने चैव दंतधावनमैथुने॥ जनने मरणे चैव तत्कालव्यापिनी तिथिः॥ तत्र दिनद्वयेत
त्कालव्यापित्वे पूर्वा ग्राह्या॥ तत्तिथिविहितसूर्यपूजादावग्रेविद्यमानत्वात्॥ यन्नूक्तं॥ खर्वर्दर्पोपि
रौ पूज्याविति॥ तत्तु निषेधव्यतिरिक्ते वेदितव्यं॥ अत्र निषेधोस्ति सप्तमी नाष्टमीयुक्तेति॥ दिन
द्वये कर्मकालाव्यापित्वे पूर्वा॥ तिथ्यादौ तु भवेद्यावान् ह्रासो वृद्धिः परेहनि॥ तावन्न ग्राह्यः स
पूर्वेद्युरदृष्टोपि स्वकर्मणीत्यनेनापरदिने चेत्परैव॥ तत्रागतिकत्वेन परविद्धानिषेधस्याभावा
त्॥ कर्मणो यस्य यः काल इत्यनेनापि परैव॥ उपवासविषये सामान्यसप्तमीनिर्णयेन निर्णयः॥
इत्यों च लासप्तमी॥ छ॥ अथ व्रतविधिः॥ कृष्णेनोक्तो युधिष्ठिरं प्रति॥ एकभक्तेन संतिष्ठेत्षष्ठ्यां ८५
संपूज्य भास्करं॥ सप्तम्यां तु व्रजेत्प्रातः सुगंभीरं जलाश्रयं॥ सरित्सरस्तडागं वा देवखातमथापि
वा॥ सुखावगाहं सलिलं दुष्टसत्वैरदूषितं॥ व्यालांबुपक्षिभिश्चैव जलगैर्मत्स्यकच्छपैः॥ न

तुंबी
केनचाल्यते यावत्तावत्स्नानं समाचरेत्॥ सौवर्णे राजते पात्रे ताम्रे वा तुंबीफलेन वा॥ तैजसेन व
र्द्धितव्या महाराज तरंजिता॥ इक्षुकाशरमादाय जलमध्यगाहते॥ सप्तजन्मकृतं पापं इक्षुकेदे
वि नश्यतु॥ यद्यज्जन्मकृतं पापं मया जन्मसु सप्तसु॥ तन्मे रोगं च शोकं च मकरसंक्रांतिगता
मकरसंक्रांतिगता
माकरी हंतु सप्तमी॥ इत्यर्घमंत्रः॥ समाहितमना भूत्वा दत्वा शिरसि दीपकं॥ भास्करं हृदये ध्यात्वा
इमं मंत्रमुदीरयेत्॥ नमस्ते रुद्ररूपाय रसानांपतये नमः॥ वरुणाय नमस्तुभ्यं हरिवास नमो
स्तुते॥ जलोपरि धरेद्दीपं स्नात्वा संतर्पयेद्देवताः॥ चंदनेन लिखेत्पद्मं अष्टपत्रं सकर्णिकं॥ मध्ये शि
वं सपत्नीकं दले पूर्वादितः क्रमात्॥ भानुर्विवस्वानंशुमान् भास्करः सविता सूर्यः सहस्रकि
रणः सर्वात्मेति॥ पूज्याः प्रणवपूर्वास्तु नमस्कारांतयोजिताः॥ पुष्पधूपादिभिः पूजां कृत्वा स्वगृहमा
व्रजेत्॥ ताम्रपात्रे यथाशक्त्या मृन्मये वाथ शक्तिमान्॥ स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा॥
कांचनं तोलकं कृत्वा अशक्तिस्तिलपिष्टजं॥ रक्तवस्त्रेण संछाद्य पुष्पैर्धूपैस्तथार्चयेत्॥ तत

स्तंबा च ये द्विजे दद्यान्मंत्रेणानेन तालकं ॥ दानेनानेन दत्तेन सूर्यः प्रीतोस्तु नः सदा ॥ अचलासप्तमीस्ना
नं सर्वकामफलप्रदं ॥ इत्यचलासप्तमीव्रतं ॥ तथा इयमेव सप्तमी रविवारपुष्यनामा नक्षत्रयोगे महती
प्रोच्यते ॥ तदुक्तं कालादर्शे ॥ माघे च सप्तमी शुक्ला रविवारेण संयुता ॥ पुंनक्षत्रसमायुक्ता कामं महती परि
कीर्तिता ॥ सर्वैः संपूज्यते तत्र विधिवन्नियतो नरः ॥ विधिवद्रक्तपुष्पाद्यैः कृतगंधादिभिः ॥ पुंनक्षत्राणि हस्ता
नुराधापुष्यमृगशीर्षपुनर्वस्वादि ॥ इति महती सप्तमी ॥ अथ पुत्रप्राप्तिसप्तमी ॥ षोडशवर्षपर्यंतं सप्तमीषु सूर्यभ
क्तिं कुर्यात्तान्स्य पुत्रप्राप्तिः स्यात् उक्तं नागरखंडे ॥ आसीत्पूर्वं द्विजो नाम गालवस्तु सुतेच्छया ॥ सूर्यमारा
धयामास क्षेत्रे वै हाटकेश्वरे ॥ वटवृक्षं समाश्रित्य कृतवान्परमं तपः ॥ स्थापयित्वा रवेरर्चां यथो
क्तं पांचरात्रिके ॥ अर्चा प्रतिमा ॥ ततः प्रभृति लोकेत्र स वटादित्यसंज्ञितः ॥ पुत्रप्रदो हि पुत्राणां ८६
विख्यातो भुवनत्रये ॥ सप्तम्यां रविवारेण उपवासपरायणः ॥ यस्तं वै पूजयेत्तत्र कृत्वा सप्तम्यां
द्वादशक्रमात् ॥ स प्राप्नोति सुतं श्रेष्ठं स्ववंशस्य विवर्धनं ॥ अत्र गाथा पुरा गीता नारदेन सु

६ह्रा
रर्षिणा ॥ इष्टापुत्रप्रदं देवं वटादित्यं सुरेश्वरं ॥ अपि वर्षशतं नारी वंध्या वा दुर्भगापि वा ॥ सा
सूर्यस्योपदेशात्तु सद्यो गर्भवती भवेत् ॥ वाराहपुराणेऽगस्त्यः ॥ मासि भाद्रपदे प्राप्ते शुक्लपक्षे सु
रेश्वर ॥ सप्तम्यामुपवासेन पुत्रप्राप्तिव्रतं हि तत् ॥ भविष्यपुराणे ॥ ब्रह्मोवाच ॥ शुक्लपक्षे तु
माघस्य सर्वाप्तिसप्तमी शृणु ॥ उपोष्य यामवाप्नोति सर्वान्कामान्धराधरेस्मादिनक्तैकभक्तो
पवासादीनि सप्तमीव्रतानि व्रतखंडादवगंतव्यानि ॥ कृते च लघ्वि वेदेन ग्रंथे निर्णयदीपाख्ये
सप्तम्या निर्णयो ज्ञातः स्वत्रोक्तव्रतसिद्धये ॥ अथाष्टमी ॥ अष्टमीतिथिरुपवासादिव्रते प
रतिथ्यन्विता ग्राह्या ॥ स्कंदपुराणे ॥ नागविद्धा तु या षष्ठी सप्तम्या च तथाष्टमी ॥ भूतविद्धाप्य
मावास्या न ग्राह्या मुनिपुंगवैः ॥ जाबालिः ॥ नागविद्धा तु या षष्ठी भानुविद्धो महेश्वरः ॥ चतुर्दशी रा
कामविद्धा तिस्रस्ता मलिनाः स्मृताः ॥ भानुः सप्तमी महेश्वरोष्टमी ॥ बृहस्पतिः ॥ एकादश्यष्टमी
षष्ठी पौर्णमासी चतुर्दशी ॥ एताः परयुताः पूज्या उपवासव्रतादिषु ॥ विष्णुधर्मेप्यष्टमी पर

विद्धेत्युक्तं॥ एवं वचनेषु चतुर्दश्यष्टम्योः शुक्ले इति कालादर्शव्याख्यानात्॥ ब्रह्मवैवर्त्ते॥ नाष्टमी
सप्तमीयुक्ता सप्तमी नाष्टमीयुता॥ नवम्या सह कार्या स्यादष्टमी सर्वदा बुधैः॥ एतानि वचना
नि पूर्वविद्धानिषेधमुखेन परविद्धापूज्यत्वपराणि॥ एवं चाष्टमी सप्तमीविद्धा प्रतिषिद्धा॥ वसु
रंध्रयोरित्यनेन वचनेन नवमीविद्धा विहिता॥ एतच्च शुक्लपक्षाभिप्रायपरं॥ शुक्लपक्षेष्टमी चैव
शुक्लपक्षे चतुर्दशी पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता॥ उपवासेषु कार्येषु एष धर्मः स
नातन इति निगमस्मरणात्॥ अत्रोपवासस्यकं गेहत्वादष्टम्याः परतिथ्यन्विताभिधानमु
पवासविषयं शुक्लपक्षे॥ अतउपवासव्यतिरिक्ते होमपूजादौ कर्मणि दूर्वाष्टम्यादिविशेषाष्ट
मी शुक्लपक्षेपि पूर्वतिथियुक्ता माह्येति॥ बृहद्यमः॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ ८९
पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनं॥ तथा॥ मधोः शुचे श्चतपस्याश्विनस्य तथाष्टमी॥ पूर्वाह्णव्या
पिनी पूर्वा दुर्गाया होमपूजयोः॥ मधुः श्चैत्रः॥ शुचिराषाढः॥ शुक्लपक्षे॥ विश्वरूपनिबंधे चैत्रा

धु वौउ

ष्टमी माघसिता च दूर्वाष्टमी चाश्विनजाष्टमी च॥ एताश्चतस्रः प्रथमेह्नि कुर्याद्वैशाखमा
सस्य च या तृतीया॥ प्रथमेह्नीति पूर्वतिथ्यन्वितेत्यर्थः॥ पूर्वतिथ्यन्वितकालविशेषाद्युक्तेपि
अभिहितमात्रेति प्रसंगादष्टम्यां क्रियमाणस्य होमपूजादेर्दैवकर्मत्वेन पूर्वाह्णो देवानामप
राह्णः पितृणामिति॥ तथा॥ पूर्वाह्णे दैविकं कर्म अपराह्णे तु पित्र्यकमित्यादिश्रुतिस्मृत्यनुरोधेन पूर्वा
ह्णयोगयुक्ता पूर्वतिथ्यन्विता ग्राह्येत्यर्थः॥ तदुक्तं तयोर्विशेषस्तु महाष्टमीनिर्णये निर्णेष्यते॥
॥ इति शुक्लाष्टमी॥ कृष्णाष्टमी तु पूर्वविद्धा पोष्या॥ तदुक्तं गार्ग्येण॥ कृष्णपक्षेष्टमी चैव कृष्णपक्षे च
तुर्दशी॥ पूर्वविद्धा तु कर्त्तव्या परविद्धा न कस्यचित्॥ ब्रह्मवैवर्त्ते॥ कृष्णाष्टमी तथारंभात्तृ
तीयावटपैतृकी॥ ईहत्रपातपाब्रह्मन्नर्कजव्यासन्मुखाति [illegible]॥ सन्मुखा पूर्वविद्धेत्यर्थः॥
स्कंदपुराणे॥ चतुर्दश्यष्टमी कृष्णा सावित्रीवटपैतृकी॥ पूर्वविद्धेति॥ इत्यादिवाक्यैः कृष्णाष्टम्याः
पूर्वविद्धाविधानात्॥ यानि तु पूर्वविद्धानिषेधकानि तान्यनुविद्धो महेश्वरः॥ न सप्तम्या युताष्टमी

गोरखोभाष्यायां

त्यादीनितानि शुक्लाष्टमीविषयाणीति रुद्राष्टमी पूर्वतिथ्यन्विता पोष्येति सिद्धं ॥ अथाष्टमीनव
म्योर्योगे उमामहेश्वरः पूज्य इत्युक्तं भोजराजीये ॥ अ अष्टम्यां पूजयेत् रुद्रो नवम्यां शक्तिरर्च्यते ॥ द्वयोर्योगे कृते संप्राप्ते
पूजने तु महाफलं ॥ तत्राष्टमीनवम्योर्युग्म एव शिव एव शिवशक्त्योरुत्सवे पद्रद्वये पष्टम्याः परविद्धत्वं ॥ तदुक्तं ब्रह्मपुरा
णे ॥ अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता ॥ अर्धनारीश्वरप्राया उमामाहेश्वरी तिथिः ॥ अष्टमीयुग्मे महोत्साहो
महोत्सवः ॥ शिवशक्त्योः शिवक्षेत्रे परयोरुभयोरपीति ॥ अतं उमामहेश्वरपूजने पद्रद्वयेप्यष्टमी परविद्धा ग्राह्ये
ति सिद्धं ॥ नक्तैकभक्तादिकं तु कर्मकालव्यापिन्यामेव ॥ ॥ इत्यष्टमी सामान्यनिर्णयः ॥ यदा शुक्लाष्टम्यां बुध
वारो भवति तदाकोव्योक्तविधिना एकभक्तव्रतं कार्यं ॥ तदुक्तं भविष्योत्तरे ॥ यदा यदा सिताष्टम्यां बुधवारो भ
वेद्यदि ॥ तदा तदा हि सा ग्राह्या एकभक्ताशयेन्नृप ॥ पृथक् पृथक् गन्धैरष्टाववष्टमीः कुर्यादित्युक्तं व्रत
रत्ने ॥ बुधाष्टमी तु सर्वेषां सर्वकामफलदायिनी ॥ अलाभ्यत्वयोगेन सर्वकालीमामुदितां शायेन ॥ अथ
या निषिद्धा तामाह ॥ संध्याकाले तथा रात्रौ प्रसुप्ते च जनार्दने ॥ बुधाष्टमी न कर्तव्या हंति पुण्यं पुरा कृतमि ८८

वे२

ति बुधाष्टमी ॥ अथ माघशुक्लाष्टमी ॥ सा भीष्माष्टमीत्युक्ता ॥ तस्यां भीष्मतर्पणं कार्यं श्राद्धं चेति ॥ तदुक्तं महाभारते ॥
माघे मासि सिताष्टम्यां सलिलं भीष्मतर्पणं ॥ श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति ॥ तर्पणमंत्रः ॥ वैयाघ्रप
द्यगोत्राय सांकृत्यप्रवराय च ॥ अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे ॥ इति ॥ अथ पौषाष्टमी ॥ ईश्वरः पार्वतीं प्रति ॥ पौ
षमासि यदा देवी शुक्लाष्टम्यां बुधो भवेत् ॥ तदा सा तु महापुण्या महाभद्रेति कीर्त्यते ॥ तस्यां स्नानं जपो होमस्त
र्पणं विप्रभोजनं ॥ मत्प्रीतये महादेवी पूज्या हं विधिवन्नरैरिति ॥ इयं नरसीयोगेषु एपो क्ताजयंतीनर्म ॥ अथ
कार्त्तिकाष्टमी कूर्मपुराणे ॥ शुक्लाष्टमी कार्त्तिके तु स्मृता गोष्ठाष्टमी बुधैः ॥ आश्विनशुक्लाष्टमी नवरात्राष्ट
मी सा महाष्टमीत्युच्यते ॥ तावन्निर्णयशिरोमणौ ॥ ततो नीराजनं कर्म प्रतिपद्याश्विने सिते ॥ प्रारभ्य नवरात्रेस्या
त् हित्वा चित्रां च वैधृतिं ॥ प्रतिपद्यास्तरंजनं द्वितीयायां घृतं धनुः ॥ तृतीयायां करे चक्रं च लक्ष्म्यां चामिचर्म
निर्मलं ॥ पंचम्यामाददे शूलं षष्ठ्यां तु परशुं तथा ॥ गदां समं विभ्रत्सप्तम्यामष्टम्यां शक्तिमुत्तमां नवमी च
सदा देव्याम्ससैः दैत्यविनाशिनी ॥ तथा विश्वरूपनिबंधे ॥ कात्यायन्या पुरा यस्मान्नवम्यां महिषो हतः ॥

प्रवेश्य तस्मादष्टम्यां नवम्यामर्चयेच्छिवामिति नवम्यां पूज्यत इति देवीपुराणेऽप्युक्तं॥ संतर्द्धीयंती
हुंकारैर्विघ्नोच्छेदनतत्परा॥ नवम्यां पूजिता देवी ददात्यनवमं फलं॥ सा पुण्या सा पवित्रा च सा धन्या सुख
दायिनी॥ तस्यां संपूजनीया तु चामुंडा मुंडमालिनी इत्यादिवाक्यैर्नवम्यां देवीपूजनं प्रशस्तं। तत्राष्टम्यां
देवीपूजा प्रशस्तोक्ता॥ भविष्योत्तरे॥ तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी॥ प्रादुर्भूता महाघोरा
योगिनीकोटिभिः सह॥ अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैरिति॥ तथा च देवीमाहात्म्ये
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः॥ श्रोष्यंति चैव ये नित्यं मम माहात्म्यमुत्तमं॥ माहात्म्यं स्तो
त्रपाठः॥ तस्य पूजापूर्वकत्वाद् अष्टम्यां नवम्यां च पूजनमभिहितं॥ विश्वरूपः॥ अष्टम्यां च नवम्यां च
जगन्मातरमंबिकां॥ पूजयित्वाश्विने मासि निःशोको जायते नरः॥ अतोऽष्टमीनवमी च तिथी
नां ह्रासवृद्धिसंभावनया होमपूजादौ निर्णेतुमर्हत इति तावदष्टमी निर्णीयते॥ आश्विन शुक्ला ८
ष्टमी महाष्टमी॥ तदुक्तं पुराणसमुच्चये धौम्येन॥ आश्विने मासि शुक्लायां यास्यान्मूलेन

चाष्टमी॥ सा महत्यष्टमी ज्ञेया तत्र देवीकृतालया॥ अष्टम्येव मूलनक्षत्रयुक्ता महानवमीत्युच्यते॥
सा पूर्वविद्धा मता॥ विश्वरूपः॥ आश्विने शुक्लपक्षे तु अष्टमी मूलसंयुता॥ या दिस्यादविद्धा
पि सा महानवमी स्मृता॥ रविविद्धा सप्तमी विद्धा॥ तथा तत्रैवोक्तं॥ महाष्टम्याश्विने मासि शुक्ला कल्या
णकारिणी॥ तत्र कुर्याद्भवानीं पूजां तासामेव प्रदक्षिणं॥ गवानुगमनं कार्यं सर्वान्कामानभीप्सता॥ स
प्तम्याहियुता कार्या मूले न तु विशेषतः॥ मूलोऽयुतेति संभवाभिप्रायं॥ तदभावे होमपूजादौ पूर्वा
षाढायुता ग्राह्या॥ तदुक्तं तत्रैव॥ मूलेन पूज्यते देवी तथा च जलदैवते॥ वैश्वदेवे तु नक्षत्रे पूजिता दुः
खदा भवेत्॥ अतो महाष्टमी पूर्वाह्णयोगयुक्ता चेत्पूर्वतिथ्यन्विता कार्या॥ तत्र शुद्धा या म विद्धा
दः॥ ननु नाष्टमी सप्तमीयुक्ता न सप्तम्या तथाष्टमी॥ न षष्ठ्या सह कार्या स्यात् ष्टमी सर्वदा
बुधैः॥ तथा॥ नागविद्धा तु या षष्ठी भानुविद्धो महेश्वरः॥ न तु ईशीका मविद्धास्ति सा मलिना
स्मृताः॥ तथा॥ षण्मुन्योरिति युग्मवाक्यमपि अष्टलबौ वर्तमानबालि युग्मवाक्यादिभिः परवि

विद्धाविधानदर्शनात्॥ भोजराजीये पूर्वविद्धा निषिद्धा॥ तथा॥ पुत्रान् हंति पशून् हंति हंति राष्ट्रं
सराजकं॥ हंति जाताननातांश्च सप्तमीसहिताष्टमी॥ तस्मात्सर्वप्रयत्नेन सप्तमीवेधसंयुता॥ वर्ज
नीयाष्टमी पार्थनृपो राज्यमन्त्रिभिः॥ एवमादिभिः परविद्धायाः प्राशस्त्याभिधायकानामेषां
वाक्यानां सामान्यस्तूक्ताष्टमी उपवासविषयत्वं वेदितव्यं॥ प्रतिपादितं चाष्टमीसामान्ये॥ म निर्णय
हाष्टमी तु विशेषरूपाद्यकैर्विशेषवाक्यैः पूर्वतिथिविद्धा विधीयत इत्यविरोधः॥ तथा॥ चैत्राष्टमी
माघसिताष्टमी च दूर्वाष्टमी चाश्विनजाष्टमी च॥ एताश्च तस्रः प्रथमेह्नि कुर्यात् वैशाखमासस्य च या
तृतिया॥ तथा॥ सप्तम्यामुदिते सूर्ये अश्यस्तामितो यदि॥ मूलर्क्षेण समायुक्ता पूजनीया प्रयत्नतः॥
मूलाभावेपि कर्तव्या यदि स्यात्तोयसंयुता॥ तोयं पूर्वाषाढा॥ वसिष्ठः॥ धनुस्थिते निशानाथे अंबिकां प्रकुर्वी १०
त बुधः॥ नैरृत्ये चांकुरे दैवत्येन विश्वर्क्षे कदाचन॥ पुनरपि पूर्वविद्धाभिधाने स्मृतीनराकृतौ॥ विश्वनिबं
धे॥ यदाष्टमी च सप्तम्यां त्र्य अस्तं याति दिवाकरः॥ तत्र दुर्गोत्सवं कुर्यात् नकुर्यात्परेह्नि॥ कुलं पुत्रं तथा रा

ज्यं दीर्घमायुस्तथैव च॥ प्रथमा चाष्टमी पूज्या येकांक्षंति सदा सुखं॥ तत्रैवाश्वयुज्यष्टमी यत्र पूज्या नवमि
मिश्रिता॥ दुर्भिक्षं तत्र जानीयात् दशवर्षाणि पंच च॥ देवीं निवेशयेद्यत्र नवम्या च नराधिप॥ राज्यपीडा भ
वेत्तत्र कुलप्राणप्रहारिणी॥ एवमादिवाक्यैर्महाष्टम्याः पूर्वविद्धाग्रहणेपि सप्तम्यन्वितामात्रेति प्रसंग
त॥ हेमाद्रेः कर्मणो दैवबलेन पूर्वाह्णक्रियोमाणत्वाच्च॥ तत्र पूर्वाह्णकाले योगिनीचेत्पूर्वा॥ अष्टम्याः सप्तमी
विद्धाभिधानात्तत्र विद्धापहितत्वाच्चावश्यं नवेत्तन्मध्येपि होमपूजादिकं कार्यमित्युक्तमोर्वेण॥ महाष्टम्यां नग
वती नष्टायामपि पूजिता॥ ददाति चायुरारोग्यं यतो नष्टा स्वरूपिणी॥ विचिंत्य स्मा महाष्टम्यां मम पूजां क
रोति यः॥ तस्य पूजां न गृह्णामि तेनाहमपमानिता॥ नविष्णोर्हरे॥ अहं नष्टा च नष्टाहं नाव मो रंतरं क्वचित्॥
सर्वसिद्धिं प्रदास्यामि नष्टायामर्चिता ह्यहं॥ नष्टायां च विद्वत्कल्याश्च मध्ये स्याद्दर्चनक्रिया॥ तस्माद्वै सप्तमी
विद्धा कार्या दुर्गाष्टमी बुधैः॥ एवमादिं सप्तम्यन्विताष्टमी प्रशस्ता॥ सप्तम्यन्विताप्रशास्त्याभिधानेपि यदा स
प्तमीमध्यमूढा दृष्टं प्रवर्तनि दोनं ष्टमी तोधिकत्वान्नोसप्तमीवदुरेत्युचने॥ अत्र दुर्गोत्सवं न कुर्यात्॥ एतत्पुनरौर्वेणो

याकेरे २

क्तं॥ सप्तमीबहुलाकार्यापरतश्चाष्टमी यदि॥ तेन शल्यमिदं प्रोक्तं पुत्रपौत्रधनक्षयं॥ बहुला अधिका॥ स
प्तमीशल्यसंयुक्ता मोहाद्विज्ञानतोऽपि वा॥ पूर्वविद्धा न कर्तव्या नरकं प्रतिपद्यते॥ अतः॥ न दिवा न निशि पि
विष्टिहता न च सप्तमीशल्यसमोपहता॥ तथा॥ सप्तमीशल्यसंविद्धा वर्जनीया न चाष्टमी॥ इत्यादीनि नी
अपराक्रमादीनां सप्तमीविद्धानिषेधवाक्यानि क्वचित्सप्तम्यां मध्याह्नादूर्ध्वं प्रवृत्तिविषयाण्यभिप्राय
पराणीति बोद्धव्यं॥ यत्तु केचित्॥ अष्टम्याः पूर्वविद्धाविधानवाक्यानि कृष्णाष्टमीविषयाणीति व्याख्यातं॥
यत्तत्॥ अष्टमीनवमीयुग्मे महोत्साहो महोत्सवः॥ शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपीति पद्मपुरा
णवचनेन॥ कृष्णाष्टम्या अपि परविद्धाप्रतिपादनादनैकांतपरहतं। निर्णयामृते तु यदा हीत्या॥ हन्या॥
चम हाष्टमी नवमीयुताश्याद्येत्युक्तं॥ तदन्ये लिखित न पूर्वविद्धावाक्यविचारपर्यालोचनया स्वमनीषामात्र ८१
मिति॥ अष्टम्यां च नवम्यां चेत्येवं विधेऽपि वाक्ये अष्टमीनवमीयुक्तेत्यसंबद्धप्रलापदर्शनात्॥ केनचित्पूर्व
विद्धाविधायकानां वाक्यानां कृष्णविषयमित्युक्त्वा दुर्गोत्सववाक्यमुदाहृतं॥ उत्तरास्तिथयो यत्र कृत्यं

तिथिनिर्णयः

यांति नराधिप॥ तदा पूर्वाष्टमीं कुर्यान्न कुर्याद परे हनि॥ पूर्वा सप्तमीविद्धा॥ एतदप्युत्तरतिथिवि
षयकृत्यद्वयोरष्टमीनिर्णयेऽनुपयोगि चाकृत्यमात्रेऽतिप्रसंगाच्च॥ कृत्येपि माध्याह्नात्पूर्वं कृत्यापूर्वाह्ण
व्यापिन्यष्टमचेत्पूर्वेति व्यवस्थेयं। तस्मात्पूर्वविद्धाप्रतिपादकवचनानि मध्याह्नकालावध्यपेक्षया
योजनीयानि। मध्याह्नात्पूर्वा चेद्धोमादिकर्मेति ध्वनिताश्चाद्याऽन्यथा परेत्यष्टमीति निर्णयः॥ तथा
च धौम्यः॥ आवर्तनात्पूर्वकाले नवमी स्यात्परेद्यदि॥ तदा दुर्गार्चा पूर्वेद्युः पूर्णा स्याच्चाष्टमी यदि॥ अर्चा होमा
दिका॥ अतो महाष्टमीवन्महानवम्यपि पूर्वतया रणदो पूर्वविद्धा पूर्वाह्णव्यापिनी चशास्त्या॥ अन्यथा परेत्य
ष्टमी न परविद्धेति॥ तदुक्तं विश्वरूपनिबंधे॥ नवमीसह कार्या स्यात्तदष्टम्या सततं नृप॥ न कुर्यान्न
वमीं तात दशम्या तु कदाचन॥ योमोहाद्दशमीवेधे नवम्यां चंडिकां यजेत्॥ पूजाचारो महामोहो दृष्टः स्यात्त
स्य नान्यथा॥ ब्रह्मांडपुराणे॥ आश्विने शुक्लपक्षे तु नवरात्रमुपोषकः॥ नवम्यां पारणं कुर्याद्दशम्यां सहितान चेत्॥
दशम्या मिश्रिता यत्र पारणे नवमी न वेत्॥ दुःखदारिद्र्यदा ज्ञेया तपोव्रतविनाशनी॥ स्मृत्यंतरे॥ युक्तां दशम्या नवमीं कु

बुद्धियोज्ञानहीनश्चपश्यन्निहंति॥दुर्गानिगद्यतेबलिप्रपूजांनवेद्धरिष्यामसुखंनपारणं॥पशुहिंसनंब्राह्मण

व्यतिरिक्तविषयं॥एवद्धूनपारणदावष्टम्यासहास्त्विधानंपूर्वदिनेपूर्वाह्णेनवमीसज्ञावेदितव्यं॥अष्टम्या

न्वितेपूर्वाह्णेनवम्यांभावेतुपरतिथ्यन्विताभाद्या॥देवीपुराणे॥अष्टम्यामुदिनेसूर्येदिनांतेनवमीभ

वेत्॥दिनांतेअपराह्णभागेतदापरविद्धा॥अतएव॥प्रभातेबलिदानेचकियन्मात्रापिलभ्यते॥नव

म्यांतत्रसंपूज्यादुर्गादुर्गार्त्तिनाशनी॥तत्प्रशंसापितत्रैवोक्ता॥सूर्योदयेपरंरिक्तापूर्णास्यादपरायदि॥

बलिदानंप्रकर्त्तव्यंयत्रदेशःसुखावहः॥अतः॥नकुर्यान्नवमीतातदशम्यातुकदाचन॥करोतिधर्म

हरणंदशमीसंयुताकृता॥दशमीविद्धोहितापिसूर्योदयेपरंरिक्तेत्यनेनप्रशस्ता॥नवमीसहकार्यस्या

दष्टम्यासहितंन्नृपेत्यादिभिरष्टमीविद्धायांविधिदर्शनाच्चव्यवस्थयापूर्वाह्णव्यापिनीचेत्पूर्वा॥अ ९२

न्यथापरविद्धेतिनवमीनिर्णयः॥पूर्वविद्धाविहितापिमहाष्टमीतिथिद्वैनवम्यनुरोधेनग्रा

ह्या॥होमपारणयोःसंलग्नतायष्यास्यादितिमहाष्टमीनवमीनिर्णयः॥अथाश्विनशुक्लप्र

तिपदादिनवमीपर्यंतंनवरात्रमिति॥तत्रेतिकर्त्तव्यताधौम्येनोक्ता॥छ॥पक्षक्रमेणैवयावच्चनवमीभ

वेत्॥एकभक्तेननक्तेनस्वशक्त्यायाचितेनच॥पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे॥प्रत्यहंदेव्याःपूज

नाशक्तौतु॥त्रिरात्रंपंचरात्रंवाविशेषतः॥कर्त्तव्यंभूतिकामैश्चआयुरारोग्यसिद्धये॥त्रिरात्रंवापिकर्त्तव्यंसप्त

म्यादियथाक्रमंभूतप्रेतपिशाचानांनाशार्थंसवायच॥व्रतस्वंडैयस्यायस्यह्रियादेवीकुलमार्गेणसंस्थि

ता॥तेनतेनचसापूज्याबलिगंधानुलेपनैः॥नैवेद्यैर्विविधैश्चैवध्वजयेत्कुलमातरं।नालिकेरैश्चकूष्मां

डैःश्रीफलैश्चविशेषतः।नतोबलिंददेछागंमाजमाहिषमेषकैः।रक्तमांसैर्बलिंदद्याज्जैरवीप्रीयतामिति।पशु

वधमांसादिक्षत्रियविषयंश्रौतस्मेनाप्युक्तं।महानवम्यांयेदेव्याहन्यंतेमहिषादयः।सर्वेतेस्वर्गतिंयांतिघ्नतांपा

पंनविद्यते।नवौनाप्रांगणेप्राणायेषांयानायुधिष्ठिर।तेषांस्वर्गेचिरंवासोवीरास्तेस्मरसांप्रियाः।सोम्यः।पुण्याम

हानवम्यांसंतिथिनामुक्तमातिथिः।नवान्नानित्रसंपूज्यासंवत्सरसुखायचेति।विश्वरूपः।अष्टम्यांचनवम्यांचजग

न्मातरमंबिकां।पूजयित्वाश्विनेमासिविशोकोजायतेनरः।अष्टमीरात्रिमासाद्यपूज्यांगत्वानिपावर्नी।निशायांस्वी

ता देवी वैष्णवी यापनाशनी॥ तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेत्॥ नवम्यां बलिदानं तु कर्त्तव्यं स
र्वदा बुधैः॥ नवमी दशमी विद्धायां कुर्वंति कुबुद्धयः॥ तथा तेषां भवेत्सर्वं बलिपूजादिकं तथा॥ एवं तु पूजनं
कुर्याद्द्विवर्षे च वर्षेन राधिपा॥ तथा॥ नवरात्रेषु प्रत्यहं कुमारिकाः पूज्या इत्याह॥ तदुक्तं स्कंदपुराणे॥ एकैकां
पूजयेत्कन्यां एकवृद्ध्या तथैव च॥ द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं तथा॥ एकवर्षा तु या कन्या पूजार्थं तां
विवर्जयेत्॥ गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते॥ कन्यकाः स्वस्वरूपं तु॥ अरोगिणीं सुपुष्टांगीं सुरूपां व्र
णवर्जितां॥ समानवंशसंभूतां कन्यां सम्यक्प्रपूजयेत्॥ यथा॥ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां॥ लाभार्थे वैश्यवं
शस्थां सुतार्थे शूद्रवंशजां॥ दारुणे अंत्यजातीनां पूजयेद्विधिना नरः॥ भोजनैः श्वेतवस्त्रैश्च गंधपुष्पाक्षतादिभिः॥
आदेयाः कुमारिकाणां च तन्मंत्राः॥ कुमार्यर्च्चनानि च विश्वरूपनिबंधात्सिद्धियंत्रेभ्यो तत्र प्रसिद्धत्वान्नात्र लिखि ६३
तानि॥ ॥ इति महाष्टम्यादिकृत्यविधिः॥ अथ नवरात्रगतः सूतकादिविचारविशेषः॥ प्रस्तूयते॥ व्रतादिकेषु
प्रारब्धेष्वंतरा सूतकादिपाते प्रारब्धेषु मात्रैकरणे सूतकं न स्यात्॥ विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे हो

ना २

सूतके वर्त्तमाने च तत्रोत्पन्ने सदा बुधैः॥ देविप्रतिष्ठा प्रकर्त्तव्या पश्चयज्ञविधानतः

मार्चने जपे॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं॥ सूतकमिति मृतकस्याप्युपलक्षणं॥ विष्णुनारंभोप्युक्त इति॥ आरं ७
भरणं यज्ञे संकल्पो व्रतयज्ञयोः॥ इति॥ एतच्च सर्वमनिष्टप्रोक्तं विश्वरूपनिबंधो आश्विनस्यामले पक्षे प्रारब्धे नवरात्रके
आवस्तूते समुत्पन्ने क्रियाकार्या कथं बुधैः इत्याशंक्योक्तं॥ तत्रैव॥ प्रवृत्ते नवरात्रे तु सूतकं च यदा भवेत्॥ देवी स्न्यापकर्त
व्यापश्चयज्ञविधानतः॥ तथा॥ सूतके पूजनं प्रोक्तं दानं चैव विशेषतः॥ काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके॥ तत्र काम्य
व्रतं कुर्याद्दानार्चनविवर्जितं॥ अंतरा मृतसूतकेपि काम्यं नाम व्रतं कुर्यात्॥ सूतकमध्ये परिसमाप्तं दानार्चनादिनिषिद्धं नेत्यसूत
कां तेन रसनावा प्रक्षालयित्वा जनार्दनं॥ दानं दत्वा विधानेन व्रतस्य फलमश्नुते॥ जनार्दनमिति व्रतदेवतोपलक्षणं॥ सूत
कविषये कार्यादयो॥ सर्वसंकल्पितं यच्च व्रतं स्तुत्यित व्रतैः॥ नक्तव्यं नरैः श्रद्धं दानार्चनविवर्जितं॥ एवं सर्वोक्त्या कौः
सह विरोधदर्शनात्॥ अयं दानार्चननिषेधो व्रतसमाप्तिविषये सिद्धान्नदानादौ भवस्थाप्यते॥ सिद्धान्नादन्यत्र सूतकाभाव
दर्शनात्॥ मरीचिः॥ लवणे मधुमांसे च पुष्पमूलफलेषु च॥ शाककाष्ठतृणेषु अप्सु दधिसर्पिःपयःसु च॥ शुष्कान्नेषु चैव सर्वेषु
नाशौचं मृतसूतके॥ लवणग्रहणमिति उशर्कराद्युपलक्षणं॥ यच्च तद्विना होमवयज्ञेषु अंतरा मृतसूतके॥ सर्वसंकल्पिते

व्रहापृछेसहा
व्रतिस्मृति

द्यथेन दोषः परिकीर्त्तितः॥ इति वृहस्पतिवचनं सिद्धांतातिरिक्तेर्थे दोषाभावपरं॥ सिद्धान्तविषये त्वं गिराः॥ अन्नं तत्र प्रवृत्तानां
मामन्नमगर्हितं॥ कृच्छ्रपादमेवं त्रिरात्रं च पयः पिबेत्॥ सूतकान्नस्यान्योन्यत्वं यमेनाप्युक्तं॥ उभयत्र दशाहा
नि कुलस्यान्नं न भुज्यत इति॥ उभयत्र सूतके मृतके च॥ कुलस्य सूतकिनोन्नं मनुष्याणां निषिद्धं किमुत देवानां॥
तस्मात्सूतके प्रक्षांन फल्गुष्टवादिनिस्तन्त्रोक्तं कर्म कर्त्तव्यं॥ पारणं सिद्धांन साध्यं व्रतसमाप्तिं च सूतकांते कु
र्यात्॥ रजस्वलापि रजोंते व्रतसमाप्तिं कुर्यात्॥ तदुक्तं कात्यादर्शे॥ सूतके मृतके वापि दानार्चनविवर्जितं॥ अं
ते कुर्यात् पृथ्व्योडष्टापतिं वान्यं नियोजयेत्॥ शनित्यनिरिक्तं मन्यं पुत्रा त्वा वेदेदितव्यं॥ सत्यव्रतः॥ प्रारब्धदीर्घतप
सां नारीणां यद्रजो भवेत्॥ न तत्रास्या व्रतस्य स्यादुपरोध कदाचन॥ पंचमेहनि संशुद्धा दैवे पित्र्ये च कर्मणि॥
निवृत्तानांतरं व्रतसमाप्तिं कुर्यात्॥ तत्रहंदमपि स्नानादिकं स्वयं अन्येन कारयितव्यं॥ अग्निहोत्रहोमवत्॥ इति सूत ९४
कनिर्णयः॥ अथ नवरात्रे नवमी यावत्तनुपैः प्रत्यहं शास्त्राणां गजाश्वानां च पूजा कार्या॥ तदुक्तं देवीपुराणे॥ जोसो
नाम नवदूर्वादानवः सुमहाबलः॥ सदेवैः समरे क्रुद्धैर्बहुधा शकलीकृतः॥ तदंगसंभवं सर्वं लोहं यत्तद्दृश्यते हितो

॥ शस्त्रास्त्रमंत्रैर्होतव्यं पायसं घृतसंयुतं॥ शस्त्राणां चैव कर्त्तव्यं होमपेषाणि धारणं॥ विजयार्थं गजाश्वानां पिंडमे
कैकमर्पयेत्॥ पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः॥ राजचिह्नानि छत्रचामरादीनि॥ पूजामंत्रा व्रत
खंडादेवरवगंतव्याः॥ अभिषेकश्च कर्त्तव्यो गजाश्वानां दिने दिने॥ तत्रैवाश्विने प्रतिपत्शुक्ले स्वातियोगे शु
भे दिने॥ पूर्वमुच्चैःश्रवानाम पूजयेत् ततः परं॥ पूजनीयाश्च तुरगा नवमी यावदेव हि॥ नववाह्याः क्वचित्तत्र न
च नाड्याः कथंचन॥ आथर्वणगोपथब्राह्मणे तु॥ नवम्यामपराह्णे वाहनं स्नापयित्वा विचित्रैर्वासोभिरलंकृ
त्य गंधपुष्पदधिदूर्वांकुरादिनानाविधफलैर्नानाविधान्नादिभिः शांतिसूक्तैर्गल्यग्नेरीपटहादिशब्दै
श्च सह पूजयेत्॥ अश्वपूजामंत्रः॥ गंधर्वकुलजातस्त्वं मा भूयाः कुलदूषकः॥ ब्राह्मणः सत्यवाक्येन सोम
स्य वरुणस्य च॥ प्रभावाच्च हुताशस्य वर्द्धयस्व तुरंगम॥ तेजसा चैव सूर्यस्य मुनीनां तपसा यथा॥ रुद्रस्य ब्रह्म
वीर्येण पवनस्य बलेन च॥ स्मर त्वं राजपुत्रस्त्वं कौस्तुभं च मणिं स्मर॥ निघ्नतो यदि वा छिन्नो युद्धे ध्वनि तुरंग
म॥ रिपून्विजित्य समरे सह भर्त्रा सुखी भवेति मंत्रः॥ हस्तिपूजामंत्रः॥ कुमुदैरावणः पद्मः पुष्पदंतोथवा

र्ष्यवामन्न नः॥ सुप्तनीकोऽजनोनी जद्व्यस्तेदेवयोनयः। तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समातृकाः। पांतु त्वां वसवो रुद्रा आदि-
त्याः समरुद्गणाः। भ नारिरत्नागेंद्रस्वामी च प्रतिपालनात्। अवाक्रूहिनयं युद्धे गमने स्वास्तिमान् जव। इति मिहानवभु-
सवः। अथ वेसंगादपराजिता पूजनं निर्णयनो। आश्विनशुक्लदशम्यां श्रवणर्क्षयुक्तायां सर्वतिथ्यांचितायामपराजितं
ज्ञनयेत्। ततः प्रस्थापनं कुर्याद्वा नदुक्तमीश्वरेण। आश्विने शुक्लपक्षस्य दशम्यां चापराजिता। पूजनीया मंत्रदेसम्यक्तनेका-
र्थसिद्धये कदाचन। ईशान्यां दिशि माश्रित्यापराह्ने प्रयत्नतः। इति विश्वरूपः। मूलेनागममंत्रे देवाः सर्वबाधा सुसूजयेत्। उत्तरासु-
सुवाजिरं घाध्रु वणेन चापराजितां। तपा।था हदशिनवमीयुक्तातस्यां पूज्यापराजिता। देमाषं विजयार्थं च प्रसिद्धा विधिना
नरैः॥ नवमीशेषयुक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जयवर्धिनी॥ नवम्यास्सह कार्या
स्याद्दशमी सर्वदा बुधैः॥ न कुर्याद्दशमीं तात एकादश्या कदाचन॥ तथा॥ दशम्यां रुद्रयुक्तायां पूजयेद- ९५
पराजितां॥ महापूजापि चेत्कृत्वा कृतमप्यकृतं भवेत्। रुद्र एकादशी। प्रस्थानमपि दशम्यां भवति। वि-
श्वरूपनिबंधे। इदं स्थानमिदं यस्माद्दशम्यां हि प्रकीर्तितं। तस्माद्विजययात्रां तु नैकादश्यां कदाचन।

दाचन॥ जंभः शक्रेण निहतो दशम्यां प्रस्थितेन तु। तस्माद्दशम्यां कुर्वीत सीमालंघनमादरात्। श्रवणर्क्षे तु पुण्ये-
यां काकुस्थः प्रस्थितो यतः॥ गृहाघयेयुः सीमानं तद्दिनर्क्षे ततो नराः। श्रवणर्क्षे इति संभवाभिप्रायं॥ तदभावे
यिके वलापि दशमी प्रशस्तेत्युक्ता स्कंदपुराणे॥ दशमीयः समुल्लंघ्य प्रस्थानं कुरुते नरः। तस्य संवत्सरं राज्ये न
क्वापि विजयो भवेत्। अतो पराजिता पूजने प्रस्थाने च दशम्येव ग्राह्या। जन्मःतिथिःशारारीतिथिरेव कारणं। तिथिः प्रमाणं। तिथि-
रेव साधनमिति। विश्वरूपः। दशादिनमतिक्रम्य करोत्येकादशी दिने॥ सीमायालंघनं नत्वनैहिकामुष्मिकं फलं। गार्ग्यः। तिथि-
विषमानेषु कर्म कुर्वंति ये नराः। कुं दृष्या भवेत्कृतं तस्य आत्मानं नरके नयेत्। तस्माद्दशमीमध्ये प्रस्थानमपराजिता पूजनमिति।
अपराजितापूजनमंत्रः। जयापि विजया देवी अपराजिता त्वपराजिता। अपराजिता जगन्माता ॐ ज्वलघोतितानने। अपराजिता
कृन्दत्ता करोतु विजयं मम। त्वं चापराजिते देवि शत्रूणां क्षयमावहा। शरीरारोग्यमैश्वर्यं प्रस्थाने संप्रयच्छ मे। दिक्षु मे विजयं दे-
हि नमस्ते अपराजिते। इति विश्वरूपनिबंधात्। गार्ग्यः। ईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः। विजयो नाम योगोयं क्षेमः
सर्वार्थसाधकः॥ तत्रापराजितापूजने प्रस्थानं च शमीतरूं प्रपूजयेत्। आवैपर्वणगोपथब्राह्मणे। अथापराजिता दशम्यां

पूर्वोक्ते विजये मुहूर्ते तु उक्तं प्रास्थानिकं॥ यत इंद्र भयामहे तथा। त्रातारमिंद्रं॥ आनो भद्राः बृहस्पतिर्नःपरिशेष
न्नू राजा शमीतरूं गच्छेत्॥ तद्रूप्येते श्लोकाः॥ अलंकृतो भूषितश्च स्वकवर्गैः परिभूतो तुरंगगतुरंगनागः। वादित्र
नादप्रतिनादिताशः स्तु मंगलाचारयरयरंयराशीः। गत्वा नगरसीमांतं वास्तुपूजां समाचरेत्। संपूज्य चाथ
दिक्पालान्पूजयेत्यधिष्ठितदेवताः॥ मंत्रैर्वैदिकपौराणैः पूर्वपूजयेत्सु शमीतरूं। अमंगलानां शमनीं दुःस्व शमनीर्थ
तस्य च। दुःस्वप्ननाशिनीं धन्यां प्रपद्येहं शमीमुमां॥ तथा। शमी शमयते रोगांश्च शमी शमयते रिपून्। शमी शम
यते पापं शमी सर्वार्थसाधिनी। अर्जुनस्य धनुर्धात्री रामस्य प्रियदर्शिनी। लक्ष्मणप्राणदात्री च शीताशोकविनाशिनी॥
नतनाशीः पूर्वस्यां दिशि विष्णुः क्रमान्क्रमेत्। रिपोः प्रतिकृतिं लब्ध्वा ध्यात्वा वामनसान्तथा। शरेण स्वर्णपुंखेन
विध्यद्धृदयमर्माणि। दिशो विजयघोषश्च पठितव्याः पुरोधसा। एवमेव विधिं कुर्याद्दक्षिणां दिशास्वपि। स्म
त्यंतरे। वामदक्षिणपार्श्वेस्यो गृह्णीयान्मृत्तिकां ततः। अपराजितेन मस्तेस्क वरदे कामपूजिते। यात्रामहं करिष्या ऐद
मि सिद्धिं सर्वत्र मे कुरु॥ पुरोहितं तु संपूज्य पूजनीयाद्विजातयः। जयमंगलशब्देन ततः स्वभवनं विशेत्। अथ एवं

कुरुते राजा वर्षे सु मंगलं। आयुरारोग्यमैश्वर्यं विजयं च प्रयच्छति॥ इति विजयादशमी॥ विजयायात्राप्रसंगात् शुक्रा
भिमुखी यात्रा निर्णीयते। शुक्राभिमुखं प्रयाणं न कुर्यात्। विश्वरूपः। प्रतिशुक्रं प्रतिबुधं प्रत्यंगारकमेव च।
ललाटगे दिग्गीशे वा न सीमां लंघयेद्बुधः। शुक्रस्य त्रिविधा सन्मुखता उक्ता। रत्नमालायां। उदयति दि
शि यस्यां याति यत्र क्रमाद्वा विचरति च नचक्रे येषु दिग्द्वारभेषु। त्रिविधमिह सितस्य प्रोच्यते सन्मुखत्वं।
मुनिभिरुदय एवत्यज्यते यत्र यत्नात्॥ शुक्रो यस्यां दिश्युदेति सूर्यवत्प्रहराष्टकेण दिगष्टकं भ्रमति। एवं
भ्रमात् यस्यां याति चक्रं त्रिकादयः॥ सप्त पूर्वस्यां मघाप्रभृति सप्त दक्षिणस्यां स्वैनुराधादि सप्त पश्चिमा
यां॥ धनिष्ठादि सप्तोत्तरस्यां। एतानि दिग्द्वारभानि। येषु दिक्षु ऋक्षेषु विचरति एवं त्रैविध्येपि सन्मुखत्वे
मुनिभिः रुदय एव त्यज्यते। प्रतिशुक्रगमने दोष उक्तो यथा॥ स्वल्पोपि नार्थः प्रतिशुक्रयाते यियासतां सि
द्धिमुपैति नूनं मिति॥ एकग्रामादौ प्रतिशुक्रगमनेपि दोषाभावः। तदुक्तं। एकग्रामे पुरे वापरिणयनवि
धौ धर्मतीर्थादियाते दुर्भिक्षे चातिभीतौ नहि दनुजगुरुर्विद्यते सन्मुखोत्र। वासिष्ठं त्रैयवसांगिरसभृगु
त्रे

षुनाकश्ययोमेषु वापि न्यारद्वाजेषु यायी द्विजवरनिवहाः कीर्तयंत्येव माघाः ॥ स्वचुवनपुरप्रवेशे देशानां विप्लवे त
थोद्वाहे । नववधूगृहागमने प्रतिशुक्रविचारणा नास्ति ॥ तथा ॥ योऽस्मादिवद्विषादेकं यावत्तिष्ठति चंद्रमाः ॥
तावच्छुक्रो भवेदंधः सन्मुखं गमनं शुभं ॥ बुधं प्रति कदाचिदपि न गच्छेत् ॥ श्रीपतिः ॥ एवं विधेथाऽस्फुजिति प्र
याया बुधो यदि स्याद्दनुकूलवर्त्ती ॥ प्रतीर्दुर्जन्मभूमिसुते गतिस्थौं नाऽन्येषां हारनाणविधौ समर्थाः ॥ अस्यास्फुजिच्छुक्र ॥
इंदुजो बुधः ॥ तथा बुधशुक्रौ प्रयणे सन्मुखौ दक्षिणस्थौ वर्जनीयौ ॥ (न ध्वजः ॥ वारुण्यां दिश्युदिते शुक्रे पूर्वोत्तरे तिया
वत् ॥ प्राच्यां दिश्युदिते शुक्रे पुनः परयाम्ये दिशौ यायादिति ॥ तथा । पूर्वतोऽस्तमिते शुक्रे प्रयायाद्द
क्षिणेत्तरे । पश्चादस्तमिते चैव यायात्पूर्वोत्तरे दिशी ति वचनानंतरं । तथा तेनैव सर्वदा यात्राप्रशस्तो
क्ता कालविशेषो पूर्वाह्णे चोत्तरां गच्छेन्मध्याह्ने पूर्वतो व्रजेत् । अपराह्णे व्रजेद्याम्यामर्द्धरात्रे तु पश्चिमां
न तस्यां गारकौ विष्टान शनैश्चरजं न यां व्रजनापातो न दुष्येच्च यस्या कौर्द्दि द्विणेस्थितः ॥ इति प्रतिशुक्रकथा नानि १७
र्णयः ॥ अथ गुर्वष्टमी ॥ तेन तु । मासि भाद्रपदे शुक्ले पक्षे यदाष्टमी ॥ गुरुवारेण संपूर्णा सा तिथिर्मर्विद्ध

ना ॥ गुर्वष्टमी व्रतं कार्यं सर्वपापप्रणाशनं । बुधाष्टमी सह स्वस्य व्रतेन फलमाप्नुयात् ॥ शाल्योदनं च गोक्षीरं घ ष
ष्टिकान्नमथापि वा । एकभक्तं प्रकर्त्तव्यं संपूज्य च बृहस्पतिं । कपिलागोः प्रदातव्या संपूर्णं व्रतहेतवे । एतत्त्
रमंत्रेन मोक्षप्रदायकं । शेषोऽत्र विधिर्व्रतनिर्णय उदयगंतव्यः ॥ इति गुर्वष्टमी ॥ अथ भाद्रपदकृष्णाष्टम्यां ज्येष्ठान
क्षत्रयुक्तायां ज्येष्ठादेवीं प्रपूजयेत् । लिंगपुराणे । कन्यार्के याष्टमी शुक्ला ज्येष्ठर्क्षेण हनीमता अलक्ष्मीपरिहा
राय ज्येष्ठां तत्र प्रपूजयेत् । कन्यार्केऽभाद्रपदे । कालादर्शे । भाद्रे शुक्लाष्टमी ज्येष्ठानक्षत्रेण समन्विता । महतीकी
र्त्तिता तस्यां ज्येष्ठां देवीं प्रपूजयेत् । नपा प्रतिवर्षं क्रियमाणं ज्येष्ठाव्रतं केवलं नक्षत्र एव कार्यं । मत्स्यपुराणे । प्रत्याहि
कं तिष्यायुक्तं यज्ज्येष्ठादैवतं व्रतं । प्रतिज्येष्ठाव्रतं यच्च विहितं केवलोडुनि । अत्र विशेषः । ज्येष्ठर्क्षेण तत्संयुक्ता यदा भा
द्रसिताष्टमी । ज्येष्ठां देवीं प्रपूज्याथ पद्मवन्निस्थचयिनूनः । ह्रीं मंत्रः । ज्येष्ठाख्या येन मोदेथे ज्येष्ठता च यथा न वा । तथा मम प्रि पि३
ज्येष्ठत्वं कुरु हन्मोगहाणमे । अप्रशस्तं च यत्किं ज्येष्ठे देवी मलहेम मा प्रशस्यं कुरु तत्सर्वं लक्ष्मीवर्द्धयमेगृहे इति
ज्येष्ठा प्रशस्या । कपां । इष्टप्रसे प्रशस्यस्य श्रः ज्यतोति प्रशस्य श्राद्धस्य ज्यादेशो सर्वद्धि महः प्रशस्याः इयमासा मनना श

नदृध१

येन प्रशस्येति ज्येष्ठा। अथवा ज्यैष्ठस्य चेति वृद्धस्य शब्दस्य ज्यादेशो ~~सर्वाद्धौ मा: अ सस्म:~~ ह्न नेऽयम। सामन्तोषायेन वृ
द्धा ज्येष्ठेति इष्ठ प्रत्यये परे प्रस्त स्यैकाजिति ज्य शब्दस्यैकाच्छूटि लोपो न भवति। यस्येति चेत्यकारलोपश्च न भवति।
एवं ज्येष्ठा प्रशस्या देवी वृद्धा वा प्रशस्या या अतिशयेन वृद्धा या ज्येष्ठाया: हृज्जनानुरोधेन ज्येष्ठर्क्षेपि क्रियमाणं दूर्वा
व्रतं न दोषमावहतीत्याकूतः। अतो ज्येष्ठांच दूर्वांच संस्पृश्य व्रतमाचरेदिति ज्येष्ठर्क्षे केवलं न दूर्वाहृज्या। इति ज्ये
ष्ठाष्टमी॥ अथ दूर्वाष्टमी॥ या शुक्लापि सर्वविद्धा स्मृता। तदुक्तं पुराणसमुच्चये। शुक्लाष्टमी तिथिर्या तु मासि भा
द्रपदे भवेत्। दूर्वाष्टमीति सा प्रोक्ता सर्वविद्धा बुधैः स्मृता। विश्वरूप: चैत्राष्टमी माघासिताष्टमी च दूर्वाष्टमी चा
श्विनजाष्टमी च। एताश्वनस्ते: प्रथमेकिकियादि सक्कंप्राक्। बृहद्धर्म:। श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी
सर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनं। शुक्ला भाद्रपदाष्टम्यां दूर्वाह्वयेति स्कंदपुराणे। भस्य व्यतिरेकेण अ
ष्टमी यानु वर्जयेत्। ततो धर्मनोभवेत्तस्यां काकवंध्या च जायते। अतो भाद्रपदाष्टमी दूर्वेति तत्र दोषचतुष्टयं सं ९८
भावनीयं। यथा पुराणे। प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां च भारत। दूर्वामभ्यर्चयेद्भक्त्या ज्येष्ठां मूलं च वर्जयेत्। इति ज्ये

ष्ठायोगो मूलयोगश्चेति दोषद्वयं। तथा। सिंहस्थे चोत्तमासूर्ये अनुदिते मुनिसत्तमे। दूर्वा तत्रैव कर्तव्या सर्व
कामफलप्रदा। इति देवकीवाक्याद् गस्त्योदयस्तृतीयो दोष:। तथा। शुक्ले भाद्रपदे मासि दूर्वासंज्ञा त
थाष्टमी। सिंहस्थे सा च कर्तव्या न कन्यार्के कदाचन। इति कन्यार्कश्चतुर्थो दोष:। इति दोषचतुष्टयं॥ ए
तद्दोषावर्ज्योनि दावाक्यानि॥ स्मृत्यंतरे॥ दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता॥ ज्येष्ठामूलयुता दूर्वा अथ त्यानि निहंति सा॥ स्कं
दपुराणे॥ अगस्त्य उदिते तान्तु पूजयेदमृतोद्भवां॥ वैधव्यं पुत्रशोकं च दद्यात्सप्त जन्मानि पंच च॥ तथा॥ कन्यागते सवितरि यः पूजये
द्दूर्वामरां॥ विषकल्या भवेत्सा तु सप्तपुत्र जन्मानि पंच च॥ एवं भाद्रपदाष्टम्यां तद्दोषचतुष्टयमध्यान्यतमेयुक्ता तदा कथ
मिति। तत्र पद्ममयेनोत्तर:। भाद्रपदे गस्त्योदये श्रावणकृष्णाष्टम्यां कुर्यात्तदा हृदवेदकी॥ श्रावणे कृष्णपक्षे तु पूजये
दमृतोद्भवीं॥ अष्टवर्षकृतं पापं दहत्येकापि चाष्टमी॥ अत एव दीपिकाकार: दूर्वार्च्चनं तु यावन्न भस्य स्ववुद्धुला
ष्टम्यामगस्त्योदयेति। तथा॥ अधिमासेनु संप्राप्ते भस्ये तूदये मुने:। अर्वाग् दूर्वा प्रकर्तव्या तत्र दोषो
न विद्यते। भस्ये भाद्रे। मुनेरगस्त्योदये सति। तस्मादर्वाक् श्रावणे इत्यर्थ:। इत्येकपक्ष:॥ अथवा

इमासेतद्दोषावत्यामपि दूर्वामभ्यर्च्याग्निपक्वेनएकभक्तं कार्यं। तदुक्तं पुराणांतरे॥ कन्येयाचैकभक्तेन ज्येष्ठामूलं य
दा भवेत्॥ दूर्वामभ्यर्च्य येद्भक्त्यानवंध्यं दिवसं नयेत्। तथा। उग्धानिका शिवपवित्रकमेव पूजा दूर्वाष्टमी केलविरू
ढकजागराणि। स्त्रीणां व्रतानि निखिलान्यपि वार्षिकाणि कुर्यादगस्त्यउदये न शुभानि लिप्सुः॥ इति लोगाक्षि
स्मरणात॥ अगस्त्यउदये तत्फलविरूढादेर्निषेध[बंध]दर्शनात् अभिपक्वमन्यनुज्ञातमितिगम्यते॥ इति द्वितीयःप
क्षः॥ एकभक्तस्यमध्याह्नोत्तरकालीनत्वात् पूजामध्याह्ने पूर्वायाः कार्या। तदपूजने पुराणसमुच्चये दोषउक्तः॥
न पूजयति या दूर्वां मोहाद्धि ह यथाविधि॥ त्रीणि जन्मानि वैधव्यं जननेनात्रसंशयः। तस्मात्संपूजनीयासा
प्रतिवर्षं विधानतः॥ सुखसंततनजनैनेनंतुः सौख्यकरी तथा॥ इति प्रतिवर्षं दूर्वाऽवश्यं पूज्या॥ एवं पूर्वो
क्तपक्षद्वये संभवत्यपि सदोषायां नाडगायामष्टम्यां निषेधवचनप्राबल्यात् श्रावणशुक्लाष्टमी श्रे
यसीति॥ तत्र व्रतपूजनासंभवे द्वितीयः पक्षो नाडगाष्टमीति युक्तं निर्दोषत्वाच्चेद्भाद्रमासाष्टमीति सिद्धांतः॥
अत्र विशेषः। नागस्य दोषो न च कन्यदोषः प्रमीतकानां न च मूलदोषः त्राद्रे मृताधंखलु शुक्लप

क्षे दूर्वा प्रपूज्या कथयंति सिद्धाः॥ दूर्वा न भस्ये मुनिभिः प्रदिष्टा शुक्लाष्टमी सा नवमीयुता च॥ दूष्या न मूले न
च शक्रक्षे क्षे कन्यागतेऽर्के घटजोदयेपि॥ इदं वचनद्वयं मतदूर्वाविषयं॥ यत्तूक्तं स्वल्पेन परविद्धा त्रिधम
नं॥ मुहूर्त्तैरौहिणेऽष्टम्यां पूर्वा वा यदि वा परा॥ दूर्वाष्टमीति सा कार्या ज्येष्ठां मूलं विवर्जयेत्॥ एतदपि
दिनद्वयव्यापित्वे परविद्धा वरेत्येवं न। किंतु॥ ज्येष्ठादिदोषयुक्ता दूर्वा त्याज्यैवेत्येवं परं। तथा नीतिशास्त्रे वरं
हालाहलं पीतं सद्यः प्राणहरं परं विषं। न त्वकृष्टधनाढ्यस्य भ्रूभंगकुटिलं मुखं। अत्र विषभक्षणेन वित्तं। कि
तु धनाढ्यस्य कुटिलस्य मुखावलोकनं प्रतिषिद्धं। तद्वद् दूर्वा विद्धाविधानबलादेव परविद्धा निषिद्धा। तथापि यदि वा
परेति परविद्धाविधानं तत्तु दिनद्वये कर्मकालव्यापिनी चेत् तत्र ज्येष्ठामूलयुक्ता दूर्वा परित्यज्य परविद्धापि कार्या
स्येवं शापनार्थमितिरहस्यं। ज्येष्ठान्वितायां तु ज्येष्ठास्त्रीजनन(?) दर्शके दूर्वाव्रतं मुक्तं ज्येष्ठानिर्णये। इति दूर्वाष्टमीनि
र्णयः॥ अथ दूर्वाव्रतविधिरादित्यपुराणे। शुक्लाष्टम्यां तु संप्राप्ते मासि भाद्रपदे तथा। दूर्वाप्रदानं सुखेना सुतरां शान्तिगामि
नी॥ फलयैश्च(?) दूर्वां गंधमाल्यानुलेपनैः॥ पूजामंत्रः। त्वं दूर्वे अमृतजन्मासि वंदितासि सुरासुरैः। सौभाग्यं संततिं देहि सर्वकार्यक
री भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि संतानं कुरु त्वमजरामरे। फलमूलैः सनैवेद्यैः धूपदीपैस

चयेत्॥ अग्निपक्वं तथा सर्वं नैवेद्यं कल्पयंच न। नोच्छिष्टं च न पात्रस्थं न चाग्निपक्वं विवर्जितं। भविष्यत्पुराणे। ततः संस्न
ये द्विजान्फलैर्नानाविधैरपि च नाग्निपक्वमन्नाद्यादृ घृतं दधि फलं तथा। दद्यात्फलानि विप्रेषु फलाहारः स्वयं भ
वेत्॥ एवं पुण्या पापहरा दूर्वाष्टमी च संस्थिता। चतुर्णामपि वर्णानां स्त्रीजनानां विशेषतः॥ इति दूर्वाष्टमीव्रतविधिनिर्णयः॥
तथा चैत्रासिताष्टम्यां देवविशेषे धारारव्या देवताविशेषपूजनादारोग्यमत्युत्तमप्राप्तिश्च जायते। तदुक्तं नागरखंडे। हाटके
श्वरजे क्षेत्रे शंखतीर्थसमीपतः। धारा नामेति विख्याता शक्तिर्लोकसुखप्रदा। तां प्रतिवासिष्ठः। चैत्रमासे सिते पक्षेऽष्ट
मीदिवसे स्थिते। येनेह लोकं द्रक्ष्यंति श्रद्धया परया युताः। ते सर्वे वत्सरं यावद्भविष्यंति निरामयाः। तस्माद्दत्ते वस्त्रान्वयस्य
देवममवाक्यतः। तथाऽरुंधत्या नैतैस्तैः स्वयं स्तोत्रेण स्तुत्वा तां प्रत्यक्षां। स्तोत्रेणानेन भवतीं स्तुत्वा च कुरुते नतिं। वं
ध्यापि या भवेन्नारी संभूयात्पुत्रसंयुताः। ईदृशीं गां पिच सौभाग्याकरूपा रूपसंयुताः। ततोऽरुंधती प्रत्युवाच धारेति
सत्रयो नागरो भक्त्या समागत्य पतत्पस्विनी। प्रदक्षिणत्रयं स्तवादत्वा मम फलं च यः। सोऽपि संवत्सरं यावद्विनारोगविवर्जि
तो भवेत्॥ या नारी दुर्भगा वंध्या सा पित्रवती भवेत्। चैत्रमासस्यासिताष्टम्यां भक्तियोगसमन्वितः। इति चैत्राष्टम्यां धारापूज
नं। अथ जन्माष्टमी निर्णीयते। श्रावणाष्टमी श्रावणाष्टमी। तत्रोपवासेन पापत्रयो जायते। तदुक्तं भविष्योत्तरे। श्रावणे १००
त्वमले मासि भाद्रपदेऽष्टम्यां निशीथे कृष्णपक्षगे। शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञिते। योगेऽस्मिन्वसुदेवाद्धि

द्धि देवकी मामजीजनत्॥ उपवासं च यः कुर्यात्तस्मिन्दिने मम। सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः। भाद्रपद इति स्पष्ट
प्रतिद्दिमास्याति प्रायेण तथा चोक्तं। विष्णुरहस्ये। प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी। मुहूर्तमपि लभ्येत सैवोपोष्या महा
फला। मुहूर्तमपि चेद्रात्रिव्यापिनी। इयं रोहिणीयुक्ता या विशेषः। यतो जातो निशायां कृष्णस्तु भगवानिति वचनात्। जयंतीशब्दवाच्ये
च विशेषः। अर्धरात्रादधःसा हि कला यावा यदा भवेत्। जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी। अन्यत्र सनत्कुमारेणोक्तं। शृ
णुष्वावहितो राजन्कथ्यमानं मयानघ। श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप। रोहिणी यदि लभ्येत जयंती नाम सा तिथि
रिति। अत्र यदि तिथ्युच्चारणात् रोहिणीयोगः स न वा प्राप्यते इति। योगेऽयोगे चोभयत्रोपवासः करणे त्वब्दे वा वर्षं मासं संवत्सरं
कांक्षये नंखरवा मुनिसत्तम। मांसं वा द्विपदां भुंक्ते कृष्णजन्माष्टमीदिने। अतीतानागतं तेन कुलमेकोत्तरं शतं। पा
तितं नरके घोरे यो भुंक्ते कृष्णवासरे। तथा श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं। न करोति नरो यस्तु भवंति क्रूरराक्ष
इत्यादि सः। इति। आदिनो जैननिंदा वा कौ जन्माष्टम्यामुपवासव्रतं श्रूयते। यथाऽप्यशक्तौ वा अन्ये गोष्ठेभ्यः पशवो गोष्ठादि
वत्। उक्तं च भाष्यकारेण। नास्ति निर्णये निंदा प्रवर्तते अपि तु निंदा अन्यस्तोतुं। अतस्तत्रोपवासः प्राप्त इति। अथ तु
य श्रवणेत्य यथा। न करोति यदा विष्णोर्जयंतीसंभवं व्रतं। यमस्य वशमापन्नः सहते नारकीं व्यथां। तथा ... ॥५

ध्यर्धदेवकीसूनोर्जयंती संभवं व्रतं। कर्त्तव्यं वित्तमानेन भक्त्या भक्तजनैरपि। अकुर्वन्याति निरयं यावदिंद्राश्चतुर्दश॥ इति।
तथा। प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी। वर्षे वर्षेऽत्र कर्त्तव्या तुष्ट्यर्थं चक्रपाणिनः। इत्यादिवाक्यजातं तुष्ट्यर्थं च-
पाणिन इति तुष्टिश्रवणे फल एव व्रतं विधत्ते। तेन काम्यत्वे सत्यपि नित्यमेकादशीवत् अविरुद्धं। अकरणे वर्षे वर्षे इति
वीप्सानुमुक्त्वा वसंते वसंते ज्योतिषा यजेत संवत्सरे संवत्सरे सोममयजा इतिवन्नित्यमपि काम्यत्वेपि नित्यमेकादशीवत्
अविरुद्धं। अकरणे नरकपातादिदोषश्रवणात्। शुद्धविद्धोभयपक्षेप्युपोष्येति तदर्थं निर्णेतव्यो। अथ श्रावणे कृ-
ष्णाष्टमी शुद्धविद्धा न्यूनाधिकादिभेदेन भिन्नापि मध्यरात्रव्यापिनी व्रते ग्राह्येति। तदुक्तं विष्णुधर्मोत्तरे। रोहिणीसहि-
ता सप्तम्या श्रावणे सा सिंह्याष्टमी। सप्तम्यामर्धरात्राधः कलयापि यदा भवेत्। तत्र जातो जगन्नाथः कौस्तुभी हरिरव्ययः।
तमेवोपवसेत्कामं कुर्यात्तत्र च जागरं। अर्धरात्रे तु योगोयं तारापत्युदये सति। नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त- १०१
येदिति वह्निपुराणे। सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि। भविता सत्तमा पुण्या यावद्रुद्रदिवाकरौ। विनापि यदि
रोहिण्या नक्षत्रा व्रतशस्ता। अथाष्टम्यां निशीथे सा पिप्रहलो यदा सप्तमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पा-
पुनरर्धरात्रे रोहिणीयोगाः पूर्वस्मिन्परस्मिन्वा दिने तत्र व्रतं कार्यं। तदुक्तं म॰ नंतभट्टेन। अर्धरात्रे तु रोहिण्यां यदा।

पं त्रिजन्मजं। सोपवासो हरेः पूजां तत्र कृत्वा न सीदति। एतेनार्धरात्रादधः पतितायामष्टम्यामुपवास इत्युक्तं। ननु। कार्यविद्धा-
पि सप्तम्या रोहिणीसहिताष्टमी। तत्रोपवासं कुर्वीत तिथिभांते च पारणमिति। अनेन ब्रह्मवैवर्त्तवचनेन सप्तमीविद्धा-
यां रोहिणीयुतायामष्टम्यामुपवासं विधाय द्वितीयदिने तिथिभांते पारणं विधीयते। पारणं द्वियामोर्ध्वं नं। भोजनं सं-
कल्पात्मकस्योपवासस्य समापनं। तेन द्वितीये ह्युपवासो निरुक्तः। गौणो भोजननिषिद्धे काले तिथिभांते यदा न दा-
तो पारणं स्यात्। तच्च निषिद्धं गरुडपुराणे। अन्यतिथ्यागमो रात्रौ नाम सत्स्वेजसोपि वा। नामसे पारणं कुर्वन् ता-
मसीं गतिमश्नुत इति। अत्रोत्तरं कालादर्शात्। जयंत्यां पूर्वविद्धायामुपवासं समाचरेत्। तिथ्यंते चोत्स-
वांते वा व्रती कुर्वीत पारणं। तथा स्मृत्यंतरे। तिथिनक्षत्रयोर्यदांतो नक्षत्रांतमथापि वा। अर्धरात्रेथवा
कुर्यात्पारणं त्वपरेऽहनि। तिथिनक्षत्रयोगांते पारणं। अथवा नक्षत्रांते। द्वयोरवसाने। यदार्धरात्रे भो-
जननिषिद्धे काले न तदा दिवसे एव पारणं कुर्यादित्यर्थः। तदुक्तं ब्रह्मवैवर्त्ते। सर्वेष्वेवोपवासेषु दि-
वा पारणमिष्यते। अन्यथा पुण्यहानिः स्यादृते धारणपारणमिति। तिथिनक्षत्रयोरेकं विगमे पा-

रणं कुर्यात्। तदुक्तं व्रतखंडे। रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता। वियोगे पारणं कुर्यान्मुनि
र्ब्रह्मचारिणः। तथा तत्रैव। सांयोगिके व्रते प्राप्ते यत्रैकापि वियुज्यते। तत्रैव पारणं कुर्यादेवं वेद
विदो विदुः। भांते कुर्यात्तिथोर्वापि शस्तं भारत पारणं। अनंतभट्टः। याः काश्चित्तिथयः प्रोक्ताः पु
ण्यनक्षत्रयोगतः। ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणी। अत्र तिथिभांते च यत्पारणमुच्यते।
तत्संभवाभिप्रायं। अतश्च यदा भोजननिषिद्धकाले तिथिभांतो न भवति तदोत्सवांते पारणं। अत्र
तिथिभांते च पारणं यदुच्यते तत्संभवाभिप्रायं। पूर्वदिने मध्यरात्रव्यापिनी अथवा तिथिनक्षत्रद्वया
दिनद्वये पूर्वरात्रे संयोगस्तदा परदिने जयंतीव्रतं। तदुक्तं। अष्टम्यां रोहिणीयोगो मध्यरात्रे दिन
द्वये। तत्पूर्वत्रैव कर्त्तव्या न पूर्वेत्येष निर्णयः। अर्धरात्रे तु योगोयं रोहिण्या न भवति क्वचित्। तामेवोपव १०२
सेत्तान्यां मध्यरात्रोपयोगतः। परदिने मध्यरात्रयोगिनी यदा सा तदा। वर्जनीया प्रयत्नेन सप्तमीसंयु
ताष्टमी। सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी इत्यादिवचनेन पूर्वविद्धा स्यात्। सप्तमीवि

इति द्वितीयायुक्ता ३

द्धा निषेधात्। एवं दिनद्वये मध्यरात्रव्यापिनी परा एव। अथ यदा सप्तमीं तिथिनक्षत्राक्रांते दिनद्वयेपि मध्यरात्रव्यापिनी। सा वै
यद्यपि हिंसा स्यात्पूर्वकालिनी त्वनेन पूर्वदिने न वेत्। तथा मुहूर्त्तमात्रेणाप्यहोरात्रविद्यमानसंबंधो नोपवासे प्रश
स्तो कालिकुरहस्ये। मुहूर्त्तमप्यहोरात्रे यस्मिन्युक्तं तु लभ्यते। अष्टम्या रोहिण्या ऋक्षं तां सुपुण्यामुपावसेत्। अथ यदि सा रो
हिणीरहिता शुद्धाधिका तदा संपूर्णामुपोष्य द्वितीये क्षितिथ्यंते पारणं कार्यं। इति सर्वसंमतं। अथोदयानंतरं क्रियन्मा
त्राप्यष्टमी नक्षत्रसंयुक्ता निशीथपर्यंतं रोहिणी उपरि सकला नवमी बुधवारे सोमवारे वा भवति तदाष्टमी स्वल्पाप्युपोष्या न
र्या। स्कंदपुराणे। उदये चाष्टमी किंचिन्नवमी सकला यदि। बुधवारेण संयुक्ता प्राजापत्यर्क्षसंयुता। अपि वर्षशतेनापि लभ्यते वा
न वा विभो। मुहूर्त्तेनापि संयुक्ता संपूर्णा चाष्टमी भवेत्। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा। विष्णुधर्मोत्तरे। तिथिनक्ष
त्रयोरत्र योगश्चैव नराधिप। द्विकलो यदि लभ्येत विज्ञेयो ह्याष्टयामिकः। पद्मपुराणे। प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः। यैः
कृता श्रावणे मासि अष्टमी रोहिणीयुता। किं पुनर्बुधवारेण सोमेनापि विशेषतः। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा इति
। बुधवारादियोगः प्रायिकः। जयंती बुधवारेण सोमवारेण वा पुनः। लभ्यते दैवयोगेन तामुपोष्य महाफलानि लभंते न संदेहः। अ

पजन्माष्टमीसामान्येन तु नाधिकावापि ष्टनतिथ्यंत्विनोपवासो ग्राह्या। अनंतः। जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते। सत्वो
पवासं तिथ्यंते न दा कुर्यात्तु पारणं। भद्रासप्तमी। जयात्रयोदशी। स्कंदपुराणे। तत्काष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी। एताः
पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत्। अथ रोहिणीसहितायां च दा जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव क
र्तव्या तिथिभांते पारणं। यदि रात्रौ तिथिभांतं तस्यान्नादौ सर्वांते प्रातः पारणमित्युक्तं प्राक्। यत्तु। सप्तमीसंयुताष्टम्यां भूत्वा ऋ
क्षं द्विजोत्तम। प्राजापत्यं द्वितीयेऽह्नि मुहूर्तार्धं भवेद्यदि। तदाष्टम्यामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरेति त्रियेति। तत्रोपवा
सार्थं उपवासशब्दश्रवणात् किंतु। द्वितीयदिनेष्टमीरोहिण्योरतिक्रम्यापि पारणांगत्वेन क्रियमाणं ब्राह्मणभोजनादि
कं सकलत्वाभिधानेनाष्टमीं त्यक्त्वा तथा षाढा च प्रणिमेत्यादि। तथा। मन्वादौ च युगादौ च दक्षमद्रयनामियात्। तथा। अ
ष्टम्यां दिवाभोजनं न कुर्यात्। तदुक्तं। भूताष्टम्योर्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि। एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरे १०३
त्। अथ भाद्रपदशुक्लाष्टमी महालक्ष्म्यष्टमी। तत्र लक्ष्मीव्रतं कुर्यात्। तदुक्तं। अष्टमी पुष्पसंयुक्ता शुक्ला भाद्रपदे तु या। तत्र
लक्ष्मीव्रतं कार्यं यावद्वर्षाणि षोडश। पुष्पं ष्पयोगः संभवाभिप्रायः। कन्यासंक्रांते रुत्तरतोगेगने स्त्येत्र नप्रारंभमुख्या प
तेहि श्योरेव संभवतीति। महाफलं तमुपवासवता। इति जयंतीजन्माष्टमीनिर्णयः। अथ नवरात्रादिः। तदुक्तं। आवलस्याष्टमी उजी ४

नं च सा तिथिं कुर्यात्। ब्रह्मांडपुराणे। प्रियोऽर्चनं भाद्रपदे सिताष्टमीं प्रारभ्य कन्यार्द्धगते तु सूर्ये समापयेत्तत्र तिथौ च यावत्कर्म तत्सर्वद्धि
गतो युवत्याः। युवत्या कन्यायाः। अस्मिन्व्रते ष्टमी चंद्रोदयव्यापिनी ग्राह्या। तथा च। अर्द्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः। त
स्यां तदाष्टिथौ कार्यं महालक्ष्म्याव्रतं शुभं। चंद्रोदयादूर्ध्वं त्रिमुहूर्तव्यापिन्यष्टमी चेत्परा। नवमी विद्धा न चेत्पूर्वा। तदुक्तं। पूर्ववि वा३
द्धा वा ग्राह्या चंद्रोदये सदा। त्रिमुहूर्तापि सा ग्राह्या परतश्चोर्ध्वगामिनी। तथा। भजतीयाग हस्तेन अष्टमीष्टमी प्राकृपि
श्रियः। दोषैश्चतुर्भिः संत्यक्ता सर्वसंपत्करा तिथिरिति। दोषचतुष्टयं तु। नवमीवेधः। रवेः कन्यासंक्रांत्युत्तरार्द्धगतत्वं। त्रिदिनं। अ
यनदिनं चेति। अनद्दोषविवर्जनं च प्रारंभोद्यापनयोर्वेदितव्यं। प्रतिवर्षं त्यक्तुमशक्यत्वात्। यच्च। पुत्रसौभाग्यराज्यायुर्नाशिनी सा
प्रकीर्तिता। तस्याः सर्वजयत्वेन त्याज्या कन्यागते रवौ। तदपि प्रारंभविषयं। कन्यागते रवाविति कन्योत्तरार्द्धगत इति। भयतः। हस्तो
त्तरदले सूर्ये तद्व्रतं न समापयेदिति वचनात्। पुत्रहा नवमीविद्धा स्वघ्ना हस्तार्कगे रवौ। धर्मघ्ना त्रिदिने प्रोक्ता आयुघ्ना चैवा नमेपिस
। तदपि प्रारंभोद्यापनविषयं संभवाभिप्रायं वा। सर्वद्रव्यं हंतीति घ्ना। यत्रैकस्याः पूर्णतिथिर्द्वयावसानं वारश्चेदवमदिनं तदुक्तं माधवैः
यः स्पर्शाद्भवति तिथिद्वयस्य चाक्रांतित्रिकस्य कथितं मिदं द्वयं च नेष्टमिति। त्रिदिनामवमदिनयोर्लक्षणं ज्योतिःशास्त्रात्। इ

तिमहालक्ष्म्यष्टमीनिर्णयः ॥ ॥ एतेन चलद्दिवेदेन ग्रंथेन निर्णयदीपके विनयार्थं दशम्यामुक्तो नोऽष्टम्या विनिर्णयः ॥ इत्यष्टमीनि
र्णयो विजयादशम्याश्चाथ नवमी ॥ प्रतिपद्रूपवासादिः ऽत्र नेऽपूर्वविद्धा ग्राह्या ॥ वसुरंध्रयोर्युग्ममिति युग्मवाक्यान्निषेधात् ॥ प
द्मे ब्रह्मवैवर्ते ॥ अष्टम्या नवमी विद्धा कर्त्तव्या फलकांक्षिभिरिति ॥ न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति ॥ पैठीनसि
रपि पंचमी सप्तमी चैव दशमी च त्रयोदशी ॥ प्रतिपन्नवमी चैव कर्त्तव्या सन्मुखा तिथिः ॥ सन्मुखा सा याऽपराह्णव्यापिनी ॥ पूर्ववि
द्धेति यावत् ॥ पद्मपुराणे ॥ अष्टमीनवमीयुक्ता नवमी चाष्टमीयुता ॥ अष्टमीनवमीयुग्मे महोक्ता तामहोत्सवदा इति ॥ तथा
नवमी दशमी चैव नोपोष्या परसंयुतेत्यादिवचनेभ्यो नवम्यष्टमीविद्धा तूपवासे व्रते ग्राह्येति सिद्धं ॥ नैकैकभक्तादिव्रते
तत्र तद्व्रतकालव्यापिनी ग्राह्या ॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिरिति वचनात् ॥ इति नवमीसामान्यनि
र्णयः ॥ अथ रामनवमी निर्णीयते ॥ चैत्रशुक्लनवम्यां श्रीरामजन्म तत्रोपवासव्रते महाफलमुक्तं ॥ अगस्त्यसंहितायां १०४
चैत्रे मासि नवम्यां तु शुक्लपक्षे रघूत्तमः ॥ प्रादुरासीत्पुरा ब्रह्म परब्रह्मैव केवलं ॥ तस्मिन्दिने तु कर्त्तव्यमुपवासव्रतं स
दा ॥ नित्यमेव भवेत्तस्या श्रीरामनवमी व्रतं ॥ सूर्यग्रहे कुरुक्षेत्रे महादानैः कृतैर्मुहुः ॥ यत्फलं तदवाप्नोति श्रीरामनवमी

व्रतात् ॥ तथा ॥ प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ॥ उपोषणं न कुरुते कुंभीपाकेषु पच्यते ॥ यस्तु रामनवम्यां तु भुंक्ते म
र्त्यो विमूढधीः ॥ कुंभीपाकेषु घोरेषु पच्यते नात्र संशय इति ॥ अनोकरणे दोषदर्शनात् ॥ उपवासव्रताचरणे तु ब्रह्मप्राप्तिः
स्यात् ॥ तदुक्तं ॥ तस्मात्सर्वात्मना सर्वैः कृत्वैवं नवमीव्रतं ॥ मुच्यते सर्वपापेभ्यो याति ब्रह्म सनातनमिति ॥ तथा रामार्चन
चंद्रिकायां ॥ मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ॥ आविरासीत्सकलया कौशल्यायां परः पुमान् ॥ चैत्रे शुक्ला तु नवमी पुनर्वसु
युता यदि ॥ सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥ तथा ॥ पुनर्वस्वृक्षयोगे तु स्वल्पापि यदि लभ्यते ॥ सा महाफलदा
प्रोक्ता पुनर्वस्वृक्षयोगत इति ॥ पुनर्वसुनक्षत्राभावेऽपि नवमी एवोपोष्येत्युक्तं ॥ रामार्चने ॥ केवलापि सदोपोष्या न
वमी शब्दसंग्रहात् ॥ तस्मात्सर्वात्मना सर्वैः कर्त्तव्यं नवमीव्रतमिति ॥ तथा ॥ उपोषणं नवम्यां वै दशम्यामेव पारणं ॥ एतै
र्वाक्यैर्नवम्यामुपवासव्रतस्यावश्यकर्त्तव्यत्वात्तदर्थं निर्णीयते ॥ सा द्विधा ॥ शुद्धा विद्धा च ॥ शुद्धापि समा न्यूना अधि
का चेति त्रिविधा ॥ सा प्रत्येकं पुनर्वसुयोगभेदेन षोढा ॥ विद्धा तु पूर्वविद्धा ॥ भेदेनैव द्वादशधा ॥ यदा शुद्धाधिका तदा संपू
र्णायामुपोष्य द्वितीयेऽहनि तिथ्यंते पारणं कार्यमिति सर्वसंमतं ॥ अथ विद्धादिभेदेष्वपि ॥ रामोऽत्र लग्ने कर्कटे प्रादुरा

मीतदाविद्धा। सैव मध्याह्नयोगेत्यादिवचनेभ्यो मध्याह्नयोगान्विता ग्राह्या। अतो मध्याह्नानुरोधेन रामजन्मनव
मीनिर्णयः। निशीथानुरोधेन कृष्णजन्माष्टमीवदिति। तथा। प्रादुरासीद्यतो मध्याह्ने रामो दाशरथिस्तदा। निशीथे
देवकीसूनुः कालेऽस्मिन्पूजनं तयोरिति। तस्मात्पूर्वदिने परदिने वा या मध्याह्नयोगान्विता सोपवासव्रते ग्रा
ह्या। तथा च रामोत्सवे। चैत्रस्य शुक्लपक्षे तु मध्याह्ने नवमीदिने। पुनर्वस्वृक्षयोगे तु जातो रामः स्वयं हरिः। त
त्र संजननं विष्णोः सर्वकिल्बिषनाशनमिति। यदा तिथिवृध्या दिनद्वये मध्याह्ने योगस्तदा परविद्धोपोष्या।
ननु परविद्धायद्गुणो विषमउपन्यासः। अष्टम्या नवमी विद्धा कर्त्तव्या फलकांक्षिभिः। न कुर्यान्नवमीं तात दश
म्या तु कदाचन। तथा। वसुरंध्रयोरित्यादिब्रह्मवैवर्त्तनिगमादिवाक्यैर्नवम्याः पूर्वविद्धाविधानात्। सत्यं। वि
द्धानिषेधश्रवणान्नवमीचेति वाक्यतः। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। इत्यगस्त्योदयेन वैष्णवव्रतवि १०५
षयविशेषवचनेनाष्टमीविद्धानिषेधात्तु वादपुरःसरं पूर्वविद्धाप्रतिपादनाद वैषम्यं सामान्यविशेष
न्यायेन। एतेन एतदप्यपास्तं। द्वितीया दशमी वेधा दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे

तिथी। दशम्येव वेधात्त्वर्धं नवमी उत्तरा एकादशी हन्ति ती व्याख्या। अथात्र यतिथिक्षयवशाद्दिन
द्वयेपि न मध्याह्नसंगात् वस्तुदा नवमी चाष्टमीविद्धा त्याज्येत्यस्य वचनस्य मध्याह्नव्याप्तिविषये सावका
शत्वात्। तिथ्यादौ तु भवेद्यावान्ह्रासो वृद्धिः परेहनि। तावान्ग्राह्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणीति न्या
येन पूर्वविद्धोपोष्या॥ अथ तिथिवृद्धौ परा ग्राह्या। तदुक्तं कौमोदकेन॥ दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यै
व वैष्णवी॥ इत्यन्यथा तु सर्वेषां यतीतत्रैव निश्चितमिति। पुनर्वसुनक्षत्रयोगस्तु चेत्स्यापि यदि लभ्यते॥
सा महाफलदा प्रोक्ता सर्वेषु पक्षेषु एतद्योगेन फलविशेषो ज्ञातव्य इति॥ अथ नवम्याः पुनर्वसुनक्षत्रयो
गयुक्तोपवासे जन्माष्टमी। निर्णयोक्तपारणानिर्णयोत्रापि ज्ञातव्यः। यत्र॥ याः काश्चित्तिथयः प्रोक्ताः पु
ण्या नक्षत्रयोगतः॥ ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति॥ श्रवणरोहिण्योर्मध्ये पारणं विहितं॥ अ
त्र नक्षत्रांते पारणमिति विशेषः॥ पारणं दशम्यां नैव लंघयेदित्युक्तं अगस्त्येन॥ दशम्यामेव शश्वद्वै द
शमीं नैव लंघयेत्। निश्चित्यैवं विचारेण नवमीं तां समाचरेत्॥ ॥इति रामनवमीनिर्णयः॥ ७॥

म्पु२ म४

अथाश्विनशुक्लनवमी मन्वादिः। तदुक्तं। आश्वयुक्शुक्लनवमी द्वादशी कार्त्तिके सिते। मन्वंतरादयश्चैवं तद्दत्तस्या
क्षयकारकाः इति। आश्विनशुक्लनवम्यां सर्वं निरूपितं महाष्टमीनिर्णये। अथ कार्त्तिकशुक्लनवमी युगा
दिः। तदुक्तं स्मृतौ। शुक्ला तृतीया वैशाखे प्रतिपत्त्रयोदशी। कार्त्तिके नवमी शुक्ला माघे दर्शो युगादयः। एता युगाद्याः श्रा
द्धादौ दत्तस्याक्षयकारकाः। युगादिनिर्णयोऽक्षयतृतीयानिर्णयावसरे ज्ञेयः। अथ तत्र यो विशेषो निरूप्यते। कार्त्तिके
शुक्लनवम्यामक्षयनवमी। तत्राश्वत्थमूले तर्पणं कुर्यात्। तत्र विधिः। श्रीनृ ॐ ना स्नात्वा मध्याह्ने जनार्द्दनं हि
स्तु मूर्त्तिं च स्थापयित्वा तर्पणं प्रारभेत् योगाविधिना विष्णुं संपूज्य तर्पणं कुर्यात्। तथा चोक्तं श्रीकृष्णेन युधिष्ठिरं
प्रति। बोधितं जेष्ठिनो विष्णुः कृते वीरसेनो नृपः। कौन्तेय भागवतोत्तमः कार्त्तिके नवमीदिने। स्नात्वा योगेश्वरं
मूर्त्तिं मान्कीं हेनसेवनी। पूजयिष्यति पुण्यात्मा पितृणां मुक्तिहेतवे। स्नाने विलेपनं स्नानादतानं च सुश्रो
तने। आचार्यैः श्रुतिमंत्रैः पूजा कार्या विधानतः। पूजामंत्राः। योगीश्वराय पादौ तु योगगम्याय जानुनी। महा १०६
योगाय ऊरू योगगुह्यं श्रवणं प्रदायच। कटिं वै योगगम्याय नाभिं नारायणाय च। योगात्मने च हृदयं विश्वनाथाय
चोदरं। कंठं विश्वस्य ... बाहू विश्वेश्वराय च। आस्यं यज्ञपुरुषाय नासां नागेश्वराय च। कर्णौ स्नानाय दे

तं व्रतमित्यभिप्रायपरं। अथ यदि एकादश्यां द्वादश्यां योगं श्रवणयोगो वा भवति। तदैकेनोपवासेनैकादश्युपवासो द्वा
दश्युपवासश्च सिध्यति। विष्णुधर्मे। एकादशी द्वादशी च वैष्णव्यमपि तत्र वै। तद्विष्णुशृंखलं नाम विष्णुसायुज्यकृद्भ
वेत्। वैष्णव्यं श्रवणं। मत्स्यपुराणे। द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि। स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितः।
तस्मिन्नुपोष्य विधिवन्नरः प्रक्षीणकल्मषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभां। अत्रोपवासद्वित्वे द्वितीयदि
श्रवणान्ते पारणं कृत्वा वेदितव्यं। यतः साध्यं यौगिकं व्रतं प्राप्ते यत्र कोपि न लुप्यते। तत्रैव पारणं कुर्यादिदं व्रतविदो वि
दुरिति व्रतखंडे। कृष्णांते पारणं कुर्यात् विना श्रवणरोहिणीं। इति श्रवणमध्ये पारणविधानात्। अथेदं श्रवण
द्वादशीव्रतं श्रवणयुक्तायामेकादश्यामपि कार्यं। तथा चोक्तं श्यामायनः। याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयो
गतः। तास्वेव तद्व्रतं कुर्यात् श्रवणद्वादशीं विना। याः काश्चित्तिथयो येन केनचिन्नक्षत्रविशेषयोगपुण्याः प्रोक्तास्त
न्नक्षत्रयुक्ता एतास्वेव व्रतं कुर्यान्न तिथ्यंतरे णेत्यत्र कृत्रमुक्ते। यथा फाल्गुनशुक्ला द्वादशी पुष्येण युक्ता गोविंद
द्वादशी नाम तस्यामुपवासव्रतं विहितं तस्यामेव कुर्यात्। न पुष्यान्वितायामेकादश्यां। सोयं श्रवणद्वादशीं विना
नियमः। श्रवणद्वादशीव्रतं तु श्रवणैकादश्यामपि भवतीत्यस्य तात्पर्यार्थः। तत्प्रशंसा भविष्योत्तरे। श्रीकृष्णेन प्र
तिपादितं। एकादशी यदा च स्यात् श्रवणेन समन्विता। विजया नाम सा प्रोक्ता भक्तानां विजयप्रदा। नारदीये। यदा न
प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्। एकादशी तदा पोष्या पापघ्नी श्रवणान्विता। उभयोर्दैवतं विष्णुः पुराणपुरुषो

नेमइति ॥ द्वादशी श्रवणोपेता यैकादश्यां भवेद्यदा ॥ तदैतेत्परिणां सिद्धिरुपवासद्वयस्य चेति ॥ द्वितीयदिने श्रवणस्य
द्भौ तन्मध्ये पारणं कुर्यात्तदुक्तं विष्णुनाक्कि चैद्वि विशेषेण महीपाल श्रवणं यदि वर्तते यदि ॥ तन्मध्ये पारणं कुर्वन् प्राप्नुयात्पुण्यं क्रतु-
शतं च वीर ॥ यत्र कुत्रचिद्द्वादशी श्रवण हीयुक्तायामेकादश्यामुपोषितायां द्वादश्यां श्रवणं वर्द्धते द्वादशी च हीयते नो-
लंघयेत् तिथिस्तेनापोषितं तु युक्ता ॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ॥ तावदेव च नो कुर्याद्यावदेकस्य संक्ष-
५ छ यइति नारदीयवचनं तु द्वादश्युक्तं ॥ तिथिनक्षत्रयोगेन नो कुर्यामिति वचनार्थः ॥ यच्च नारदादि कायां संयोगे नो कुर्य-
मित्यर्थः ॥ प्रतिनासत इति न तत्र दोषः ॥ यत्पुनस्तत्रैव विशेषेण महीपाल श्रवणं वर्द्धते यदि ॥ अस्याश्चरादं ॥ तिथि-
७ दशी नक्षत्रयेन नो कुर्याद्द्वादशीं नैव लंघयेत् ॥ तदिदं तिथिनक्षत्रयोगे नोजन विधायकमपि नित्यएकादश्युपवासपारणा
विधिपरत्वेनादुष्टं ॥ श्रवणैकादश्युपवासविहितपारणाविधिपरत्वे तु दोषः ॥ यथा ॥ सांयोगिके व्रते प्राप्ते युक्ते कापि
वियुज्यते ॥ तथा ॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ॥ तथा ॥ अत्रोपोष्य तिथिश्रवणयोर्यांते व्रतं पारये-
दित्यादिवचनेभ्य एकविगमे पारणाविधानाच्च ॥ किंच ॥ इदमसंबद्धं तु नराई कालेनिर्णयकालादर्शदीपिकानां
तन्वद्व्रतकल्पविष्णुहरस्यादिषु दर्शनात्कौतस्त्यमिति विलोकनीयं ॥ यात्वकाश्चित्रिपयः प्रोक्ताः पुष्यन क्षत्रयोग ॥१२०॥
तः ॥ अत्रांते पारणां कुर्यात् विना श्रवणरोहिणीमिति ॥ ईयांस्तु विशेषः ॥ श्रवणद्वादश्यां जनार्दननामा चि विष्णुः स्त्र-
ज्यते ॥ श्रवणद्वादश्यां वामन इति ॥ तथा ॥ आनाकासितपक्षे मैत्र श्रवणरेवती ॥ प्राप्नोति द्वादशी तत्र हरिम-

न्य चैषिन्नर ॥ सा विष्णुशृंखला नाम सायुज्यफलदायिनी ॥ तथा ॥ तिथिनक्षत्रयोरत्रयोगश्चैव नराधिप ॥ द्विकस्ये
यदि लभ्येत स ज्ञेयो ह्याद्यशयामिकः ॥ ॥ इति श्रवणद्वादशी ॥ ॥ अथ त्रयोदशी ॥ शुक्लपक्षे त्रयोदशी सा परविद्धो-
पोष्या ॥ इति निगमः ॥ षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे त्रयोदशी ॥ एताः परयुताः पूज्याः पराः पूर्वेण संयुता ॥ बृहस्पति ॥ एका-
दश्यष्टमी षष्ठी द्वितीया च चतुर्दशी ॥ त्रयोदशी त्वमावास्या उपोष्याः स्युः परान्विताः ॥ अत्र त्रयोदशी कृष्णा ॥ अमावास्या सा-
२५ हचर्यात् ॥ कृष्णत्रयोदशी पूर्वविद्धा ॥ कालादर्शे ॥ षष्ठ्यष्टमीभूतत्रयोदशी कृष्णत्रयोदशी ॥ चतुर्थ्यां तु परायुग्मेष्विता स-
न्याः परान्विताः ॥ युग्मवाक्ये त्रयोदश्याः परेणानादि द्वितीयवाक्ये कृष्णत्रयोदश्याः परविद्धाभिधानात् शुक्लत्रयोदशी पूर्व-
तिथ्यान्वितोपोष्येति गम्यते ॥ अतएव नवमी दशमी शुक्लत्रयोदशी अकृति दृष्टि ॥ संभात तीयाचे से ताउपोष्याः पूर्वसंयुता
इति कालादर्शे ॥ अत्र वैवनो त्रयोदशी प्रकर्तव्या द्वादश्या सहिता प्रभो ॥ भूता विद्धा न कर्तव्या दर्शाहरणी कदाचन ॥ पैठीनसि-
पंचमी सप्तमी चैव दशमी च त्रयोदशी ॥ प्रतिपन्नवमी चैव कर्तव्या संमुखा तिथिः ॥ सन्मुखा पूर्वविद्धेत्यर्थः ॥ एतद्वचनद्वयमपि
शुक्लत्रयोदशीविषयं ॥ यतो नंतमहे नकृष्णत्रयोदशी परविद्धाग्राह्येत्यभिधायैतदाकासमीपे चतुर्दशी स्ववेधात्पूर्वां त्रयो-
दशीं दूषयतीति विशेषवचनानुदाहृतं ॥ द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी ॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे-
तिथी ॥ कृष्णत्रयोदशी परविद्धोपोष्येति निःसंदिग्धं ॥ द्वितीयदिने त्रयोदश्यभावे तु एकादशी तृतीया च षष्ठी चैव त्रयोदशी
पूर्वविद्धा प्रकर्तव्या परदिने स्यात्परेह्नीति निगमः ॥ इति त्रयोदशी सामान्यनिर्णयः ॥ अथानंगत्रयोदशी ॥ अनंगत्रयो-

म
दशी व्रतेन वांछितार्थोऽवाप्यते। श्रीमत्स्येन। त्रयोदशी अनंगाख्या [illegible] बाधौघविनाशिनी। सर्वदुःखप्रशमनी सर्वमांगल्यव
र्द्धिनी। अनंगेन कृता ह्येषा तेनानंगत्रयोदशी। मार्गशीर्षात्समारभ्य व्रतं कार्यं विधानतः। इति व्रतविधिरन्यत्र ज्ञेयः इत्थं
त्वाजिखितः। सा पूर्वविद्धा ग्राह्योपोष्येति संवर्त्तेनोक्तं। कृष्णाष्टमी स्कंदषष्ठी सावित्री व्रतपैत्रकी। अनंगत्रयोदशी तं भाउ योग्या
: सर्वसंयुताः। इत्यनंगत्रयोदशी। मन्वादिस्तु त्रयोदशी। अधिपति त्वेनानंगः रजनीयः तदुक्तं ब्रह्मणा कामः रूप्यस्त्रयोद
श्यां तु रूपो जायते ऽवाञ्छं रूपवतीं भार्यां निर्वेतका मासमुत्कृणाव॥ अथ नृसिंहत्रयोदशी। गुरुवारे त्रयोदशी नार
सिंहं समभ्यर्चयेन्नरः। नरसिंहपुराणे। गुरुवारे त्रयोदश्यामपराह्णे जलाकृतः। तर्पयित्वा देवपितॄन् नरसिंहपूजितं तंडु
जैः। नरसिंहं समभ्यर्च्य यः करोत्येवं व्रतं। स तु पापविनिर्मुक्तो विष्णुलोके महीयते। इदं पक्षविशेषानुपादानात् उ
भयोः पक्षयोः साधारणं। कालविशेषग्रहणाद्दिवरात्रव्यापिनी ग्राह्येति॥ अथ शनित्रयोदशी॥ सौरपुराणे व्यासवाक्यं
मंदवारसंयुतायां कृष्णपक्षे त्रयोदशी। तस्यामुपोष्य विधिवत्संपूज्य गिरिजापतिं। [illegible] निःपापैर्मुक्तो
भवति मानवः। तथा स्कंदपुराणे। त्रयोदश्यां तथा रात्रौ सोपवासास्त्रिलोचनं। दृष्ट्वा शंभुं प्रथमे यामे मुच्यते सर्वपातकैरि
ति। इदं त्रयोदशी साधारणं विशेषानुक्तत्वात्। ईशं गंधाद्यैर्नमस्कारादिकं कृत्वा जलाञ्जलीः समर्प्य च वृषराजं समभ्यर्च्य
वृषमंत्रेण मंत्रवित्। मंत्रः। धर्मस्त्वं वृषरूपेण जगदानंदकारकः। अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातन। इति विधि १२१
पानि तीर्थानि सागरांतानि यानि यानि च। ओं मामिह पाति धर्मतीर्थ दोषगो वृषस्य च। स्पृष्ट्वा तु वृषपाणौ तस्य शृंगमध्ये विलो
क्य चापुच्छं च ककुदं वै सर्वपापैः प्रमुच्यते। एवं संवत्सरं कुर्यात्त्रयोदश्यामिदं व्रतं। मंदवारेण वायुक्तां [illegible]

हि

शनि पक्षदत्तस्य त
वाकृतयात्फलं। इति त्रयोदशी। । अथ नानापक्षत्रयोदशी युगादिः। तदुक्तं। शुक्लनीयावैशाखे जेन पक्षे त्रयोदशी। तथा कलिः त्रयोक्तास्तत्र
योदश्यां न कस्ये मासि निर्गतः। सा स्वत्वादि योगविशेषेण गजच्छायेति। तदुक्तं। यदेंदुः पितृदैवत्ये हंसश्चैव करे स्थितः। त्रयोदशी गजच्छाया
श्राद्धे पुण्यैरवाप्यते। पितृदैवत्यं मघा। हंसः सूर्यः। करो हस्तः। अत्र घृतमधुयुक्तेन पायसेन श्राद्धं कुर्यात्तथा च पितृगाथा। अपि नः स
कुले जातो यो नो दद्यात्त्रयोदशीं। पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च इति। त्रयोदशीयुक्तव्रतविशेषाणि अनंतरं स्याद्वगंतव्यानि
अत्र विशेषः। मध्योऽथवा मलमासोपदाभवेत्। सप्तमः पितृपक्षस्याद्यत्रैव तु पंचमः। इत्यनेन पूर्वस्मिन्नाद्यपदेयघप
रपक्षत्रयोदशी निमित्तं श्राद्धं न भवेत्तथापि युगादिनिमित्तं भवत्येव। मन्वादौ च युगादौ च तन्मासो कृष्णपोरथ्यैतिवचनात्। मनुस्म
र्तृरासु तोक्त वर्षे तु द्वापि युगादिषु। दर्शव्यवस्थापितमस्यपरपताया निर्णयो। अत्र चतुर्दशी शुक्लेति कालादर्शे व्याख्यानं। इति त्रयो
दशी निर्णयः। । सनेच ... द्विवेदेनग्रंथे निर्णयदीपकोतिथि द्वयं निर्णीतं। दशा दशी च त्रयोदशी। । अथ चतुर्दशी निर्णीयते शुक्ल
दशी निर्णयः। चतुर्दशी परविद्धोपोष्येति। तदुक्तं निगमे। शुक्लपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता। शुक्लस्य
कृष्णा चतुर्दशी परविद्धोपोष्येति। तदुक्तं निगमे। शुक्लपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता। शुक्लस्य
निरपि। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विताः। चतुर्दश्याश्च पूर्णिमे तियुग्मे नापि

उक्तायाः परविद्धाविधानात्। तच्च चतुर्दशी सर्वविद्धा ग्राह्येति। तदुक्तं गार्ग्येण। तत्र पक्षे द्वितीये चैव कृष्णपक्षे चतुर्दशी। सर्वविद्धा प्रकर्तव्या
परविद्धा न कस्यचित्। स्कंदपुराणेपि। कृष्णाष्टमी चतुर्दशी सावित्री वटपैतृकी। सर्वविद्धा प्रकर्तव्यौ त्यादि वाक्यैः तत्र सर्वविद्धा निहि
ता इति। नक्तैकभक्तोपवासादिव्रतेन तु प्रदोषव्यापिनीति चतुर्दशी सामान्यनिर्णयः। अथ शिवरात्रिनिर्णीयते। तत्र व्रतकालस्वरूपे उक्तो वि
षरूपेण। माघफाल्गुनयोर्मध्ये कृष्णपक्षे चतुर्दशी। शिवरात्रिस्तु सा प्रोक्ता शंकरेण महात्मना। शिवयोगेन संयुक्ता रात्रिभागे चतु
र्दशी। शिवरात्रिस्तु सा प्रोक्ता सर्वकामफलप्रदा। तथा। माघफाल्गुनयोर्मध्ये या स्यात् शिवचतुर्दशी। अनंगेन समायुक्ता कर्तव्या सा
सदा तिथिः। इत्यादिभिः। इह च माघ आवर्णगनियमात् तथा हूवच्छिमायां। सर्वविद्धा तु कर्तव्या शिवरात्रिर्व्रतेदिने। मुख्यनेन चतु
र्दशी उक्तापि या शिवरात्रिः। सा सर्वविद्धा उपवसनीया इति विधीयते। आचारतिलके त्वेतद्वचनं विरुद्धं दृश्यते। माघफाल्गुन
योर्मध्ये कृष्णपक्षे चतुर्दशी। सा दर्शसंयुता कार्या अमावास्यानिशि फलाजवेदिति परविद्धोक्ता। अत्र सर्वविद्धा परविद्धा मात्रे इति १२२
प्रसंगात्पुराणवचनानां विशेषावलंबनेन निर्णीयते। कान विशेषानिर्णीयमित्युक्तं शिवपुराणे। प्रदोषव्यापिनी ग्राह्या शिवरा
त्रिः शिवप्रिया। रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत्। वचनात् सर्वविद्धा परविद्धा वा या प्रदोषव्यापिनी सोपोष्येति

॥। प्रदोषपरिमाणमुक्तं स्कंदपुराणे। त्रिमुहूर्तं प्रदोषस्याद्रवावस्तंगते सतीति। शिवरात्रिमुपक्रम्य विष्णुरूपो
पि। दिवाव्रते दिवा ग्राह्या तिथिर्या दिविकी द्विज। निशामुखे तु सदैव कर्तव्या। निशामुखे। निशामुखे प्रदोषे। स
र्ववचनानुरोधात्। ननु अर्धरात्रात्पुरस्तात्चेज्जया योगो यदा भवेत्। सर्वविद्धा प्रकर्तव्या शिवरात्रिः शिवप्रियैरि
त्यनेन कालनिर्णयोक्तवचनेन प्रदोषकालादुत्तरकाले त्रयोदशी प्रदोषे चतुर्दशी निमित्तोपवासविधि
दर्शनात् कथं प्रदोषव्यापिनी ग्राह्येति चेत् शृणु। अनेनापि प्रदोषान्विता विधीयते। कथं। अर्धरात्रात्पुर
स्तात् चेज्जया योगो यदा भवेदित्यत्र रात्रेर्यामद्वयमिति विग्रहे एकस्यार्धशब्दस्य लोपेन यमासे अर्धरात्र
पुरस्तात्प्रथमयामोर्ध्वं त्रयोदशी चतुर्दश्योर्योगो यदा स्यात् रात्रिमुहूर्तात्मके प्रदोषे चतुर्दशी प्रदोषान्विता भ
वति प्रदोषव्यापिनी विधायकवचनमप्यनुगृहीतं भवतीति च। प्रदोषव्यापिनी ग्राह्येति वचनान्यथानुपपत्त्या
एकार्धपदलोपो दिसमासाश्रयणं इति। किंच। अर्धरात्रात्पुरस्तादस्य वचनस्य मुख्यार्थाश्रयणे द्वितीयदि
ने व्रतं चतुर्दश्याः प्रदोषव्याप्तिसद्भावात् विधिवाक्यसहस्रेप्याकालव्याप्तिर्वर्जनीयसीतनेन प्रदोषकालव्या
प्त्याः द्वितीयायाः विधायकेन मुख्यार्थो बाधितस्यात्। अतो लोपलक्षणमाश्रीयते। मुख्यार्थबाधे लोपो

ज्ञा

त्न स्ततौ सार्द्धं ज्ञलक्षणेति तात्पर्याणि कोप्याकारः । दीपिकाकारेणोक्तं यथाश्रुत वचनानुरोधेन हतं निबद्धमिति तिन पो
षस्तस्य अस्मिन्विषये पूर्वविद्धावाक्यानि स्कंदपुराणात् । कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्द
शी । एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत् । तथाचानंतः । जयंती शिवरात्रिश्च कार्ये
भद्राजयान्विते । कृत्वोपवासं तिथ्यंते तदा कुर्याच्च पारणं । भद्रा सप्तमी । जया त्रयोदशी । इत्यादी
न्युपपन्नानि । यदा त्वस्यां तिथिक्षये दिनद्वयेपि प्रदोषव्यापिनी तदा पूर्वैवोपोष्या । तदुक्तं ब्रह्मवैवर्ते । सूर्यास्तेनेनाडीयुक्ता त ८५
विद्धा त्रयोदशी ॥ शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति । तदपि महानिशा तु सा प्रोक्ता मध्यस्थं प्रहरद्वयमिति स्मृत्यंतरवचनात् ।
अत्रोदाहृतेन ब्रह्मवैवर्तवचनेन समानार्थीदं वचनद्वयं अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् । इत्यादीनि वाक्यानि निषि
द्धयविषये वेदितव्यानि । यतोत्यंत तिथिक्षय वशात्परदिने वायुपुराणोक्त चतुर्नाड्यात्मक प्रदोषव्याप्त्यभावात् त्रयोदश्यस्पृस्तोस्र
येपितस्य षवनादिषु । तदविद्धचतुर्दश्या तत्र शिवरात्रिव्रतं चरेदिति वायुपुराणे । परदिने द्वयोः समतायां च परैवोपोष्या । रवि वर्द्दपैपरिशे १२३
सज्यावितिवचनात् । विष्णुरूपोपि हि क्षीपुनश्चास्तमयादिना येकिंचतुर्दशी । युज्यते सहिया मिन्या शिवरात्रिस्तदापरा ॥ अस्तमार्क
पार्द्धप्रदोषव्यापिनीत्यर्थः । यदा तु परदिने रवप्रदोषव्यापिनी न पूर्वदिने तदा परैवोपोष्या । तदुक्तं । माघासिते भूतदिने

क्षि ३

हि राजन्नुपैतयोगं यदि पंचदश्या ॥ जयाप्रयुक्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति ॥ शिवस्याप्रियकृत् जयाप्रयुक्तां न तु अ
तु कुर्यादित्यनेन त्रयोदशीसंमिश्रा यदा चतुर्दशी रात्रौ न भवति तदुपवासादिकं कर्तव्यमिति गम्यते ॥ एतच्च परदिने प्रदोषव्यापि
त्वे वेदितव्यं । तथाचाचारतिलके । चतुर्दश्यां तु या रात्रौ सा शिवोदर्शोभिधीयते । तयोर्योगः शिवो योगः शिवयोगः स उच्यते । यदा च चतुर्दशी
दिनद्वये प्रदोषव्यापिनी त्रयोदशी च पूर्वदिने दिनपर्याप्ता रात्रिभागेन स्यात्तदा पूर्वा । तदुक्तं वाराहपुराणे । त्रयोदशी यदा देवि दि
नभुक्तिप्रमाणतः । जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशीति वचनेन । किंच रात्रिभागस्य त्रयोदश्यनुरंजितत्वाभावेन च
तुर्दश्याः प्रदोषास्पृष्टत्वेन संपूर्णत्वात् । प्रथमातिक्रमे कारणाभावाच्चेति पूर्वा । निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः
अतस्तस्यां चतुर्दश्यां सत्यां तत्पूजनं भवेदिति च ॥ इति शिवरात्रिनिर्णयः ॥ ७ ॥ अथ पारणविचारः । ननु परदिनेऽस्तमयो
र्ध्वाविन्यां व्रततिथौ पूर्वविद्धोपवासे तत्रैव न तिथिर्यदा रात्रावस्ति परदिने न दा जन्माष्टमी रोहिण्या च शिवरात्रिस्तथैव
च । पूर्वविद्धैव कर्तव्या तिथिभांते च पारणमिति तिथ्यंते रात्रौ पारणं विहितं । अमावास्यायां च रात्रौ भोजनं निषिद्धं । तदुक्तं
कार्यैनैः । भूताष्टम्योर्दिवा भुंक्ता रात्रौ भुंक्ता च पर्वणि । एकादश्यां दिवा रात्रौ भुक्त्वा चांद्रायणं चरेत् । अतः परदिने दिवा तिथ्यंता

ला न

भावे कथं चैत्रोपवास इति चेत् । सत्यम् अमावास्यायां रागतः प्राप्तस्य भोजनस्य निषेधो न वैधस्य । निर्णये पारणं कु-
र्यादिति विधिप्राप्तस्य भोजनस्य निषेधानुपपत्तिः । अन्नाभावे माय हिंसादिवदिति । अथवा ऽपरो विधिः । सा त्वस्तमय-
पर्यन्तं व्यापिनी चेत्परे ऽहनि । दिवैव पारणं कुर्यात्पारणान्ते व दोषप्रसंग इति कालादर्शात् । यच्चाभ्यामन्त्र-
योर्द्वि [illegible] मिन्यां प्रातरेव हि पारणमित्येतस्मिन्न विषये योज्यं । तिथ्यन्ते चोक्तं [illegible] ते च व्रती कुर्वीत पारणमिति वां४
वा इति पारणनिर्णयः ॥ ॥ यत्तु वचनं चतुर्दश्यां तु सक्तायां फाल्गुने नित्य पूजनं । तन्तु पोष्यत्रय-
नेन विषयान्तरे ज्ञेयं । तत्र कृष्णप्रतिपदादि पौर्णमास्यन्त मासाभिप्रायेण । [illegible] मा-
घस्नान मासोपवासादीनि व्रतानि पौर्णमास्यामेव समाप्यन्त इति निर्णयः ॥ ॥ अथ नृसिंह चतुर्द-
शी निर्णयः ॥ वैशाखशुक्लचतुर्दश्यां नरसिंहव्रतं कार्यं ॥ तदुक्तं नरसिंहपुराणे । प्रह्लादं नृसिंहः सं- १२४
वादे मद्व्रतं पापनाशनमित्युक्ते प्रह्लाद उवाच ॥ कस्मिन्मासे न वेदेतत्कस्मिन्वा वासरे प्रभो इति
ह्युक्ते नरसिंहः । वैशाखशुक्लपक्षे चतुर्दश्यां समाचरेत् । मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं ॥

स्वातिनक्षत्रसंयोगे शनिवारे तु मद्व्रतं ॥ सिद्धियोगस्य संयोगे वणिजे करणे तथा ॥ पुंसां सौभाग्ययोगेन लभ्यते दैव-
योगतः ॥ सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनं ॥ एतदन्यतरयोगे मद्दिनं पापनाशनं ॥ केवलेऽपि हि प्रकर्तव्यं मद्दिनं
फलकांक्षिभिः ॥ तथा ॥ वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारकं ॥ महागुह्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः ॥ येन वै क्रियमा-
णस्य सहस्रद्वादशीफलं ॥ ज्ञायते तेन मृषावाचिमानुषाणां महात्मनां ॥ विज्ञाय मम मद्दिनं यस्तु ॥ लंघयेत्स तु पापभाक् ॥ उपवा-
साकरणे नोल्लंघयेदित्यर्थः ॥ एवं ज्ञात्वा प्रकर्तव्यं मद्दिने व्रतमुत्तमं ॥ व्रतविधिर्नृसिंहपुराणे द्रष्टव्यः ॥ इदं व्रत-
मुपवासरूपं ॥ यतोऽग्रे उपवासमंत्रः श्रूयते ॥ नृसिंह देवदेवेश तव जन्मदिने शुभे ॥ उपवासं करिष्यामि सर्वभोग-
विवर्जितः ॥ इति मंत्रेशः ॥ इयं च तु शुक्ला चतुर्द [illegible] च पूर्णिमेति युग्मवाक्यात् परविद्धो पोष्यासेया ह्या ॥ ब्रह्मवैव-
र्ते ॥ शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ परा तु पोष्या इति सामान्यचतुर्दशी निर्णयोक्तं मात्रानुसंधेयं ॥ इ-
ति नृसिंहचतुर्दशी ॥ अत्रायं विशेषः ॥ यदि कर्मकालमुभयी व्याप्नोति नो वा स्पृशति चौदस्ये तु द्विह्गास्पृशेद्यदि तर्हि-
ह्येव युग्म पक्षे तिथिको कैकं ॥ पूर्वदिने सायंकालव्याप्त्याभावे परा अन्यथा पूर्वापि ॥ अथानंतचतुर्दशी ॥ भाद्र-

८१

या

पदे शुक्लचतुर्दश्यामनंतव्रतं कार्यं॥ तेन सर्वपापक्षयो भवेत्॥ व्रतखंडे॥ अनंतमैव्रतमस्त्यन्यत्सर्वपापहरं नृणां॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत्॥ शीलया चानंतव्रतमाचरितमित्याख्यायिकामुखेन विधिरपि तत्रैवोक्तः॥ क्रे३
यथा॥ कौंडिन्यस्तु विवाह्यैतां पथि गच्छन् शनैः शनैः॥ शीलां सुशीलामादाय वोढां वेगोरथेन हि॥ मध्याह्ने भोजनवेलायां
समुत्तीर्य सरित्तटे॥ ददर्श शीला सा स्त्रीणां समूहं रक्तवाससां॥ चतुर्दश्यामर्चयंतीं भक्त्या देवं जनार्दनं॥ उपगम्य शनैः
साथ पप्रच्छ स्त्रीकदंबकं॥ आर्याः किमेतन्मे ब्रूत किंनाम व्रतमीदृशं॥ ता ऊचुः॥ अनंतव्रतमेतद्धि व्रतेनैतस्कप्रउच्यते॥ शी-
लोवाच॥ विधानं कीदृशं तत्र किं दानं कोत्र पूज्यते॥ स्त्रिय ऊचुः॥ शीले सदान्नप्रस्थस्य पुन्नाम्नः संस्कृतस्य च॥ अर्द्धं क्र५
विप्राय दत्वा ह्यर्द्धमात्मनि भोजनं॥ कर्त्तव्यं तत्सरित्तीरे विधिनानेन भामिनि॥ स्नात्वा चानंतमभ्यर्च्य गंधलेपनपु-
ष्पकैः॥ तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुदोरकं॥ चतुर्दशग्रंथियुतं वामे करतले न्यसेत्॥ तत्र मंत्रः॥ अनंतसं- १२५
सारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव॥ अनंतरूपी विनियोजयस्व ह्यनंतसूत्राय नमो नमस्ते॥ अनेन दोर-
कं बध्वा भोक्तव्यं स्वस्थमानसैः॥ भुक्त्वा चानेन व्रजेत्स्ववेश्म न द्वेषं व्रतं तत्व॥ सापि च कृत्वा शीला करे बध्वा सुदोरकं॥

नु

पापेयार्धं तु विप्राय दत्वा भुक्त्वा स्वयं तथा॥ पुनर्जगाम संहृष्टा गोरथेन युता गृहं॥ एकभक्तेनानंतव्रतं कार्यमित्युक्तं॥ युधिष्ठि-
रं प्रति श्रीकृष्णोक्तेः भविष्योत्तरे॥ शुक्लायां च चतुर्दश्यां मासि भाद्रपदे नृप॥ एकभक्तेन नियमं कृत्वा भक्तिसमन्वितः॥ स्नात्वा
नद्यां देवखाते तीर्थे प्रस्रवणे तथा॥ अनेनानंतनेचैव विष्णुलोके महीयते॥ इति व्रतविधिः॥ अथानंतव्रतनिर्णयः॥ अ-
नंतव्रतचतुर्दशी परविद्धा मध्याह्नव्यापिनी ग्राह्या॥ भविष्योत्तरे॥ तथा भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम॥ पौर्णमास्या
समायोगे व्रतं चानंतकं चरेत्॥ एतद्व्रतं मध्याह्ने भोजनवेलायामिति व्रतविधानोक्तलिंगात् भविष्योत्तरोक्ते-
न श्रीकृष्णवचनेनैकभक्तोपदेशाच्च एकभक्तव्रतं कुर्यात्॥ यथा॥ अशक्ताः शर्करा उपदध्यात् तत्र त्रैते ज्ञोवैमंते
वृत्तमिति श्रवणात्॥ वृत्तेनाक्ता इतित्वद्देकभक्तं कार्यं॥ एकभक्तं तु मध्याह्नव्यापिन्यां तिथौ कार्यं॥ स्मृतिसंग्रहे॥ मध्याह्न-
व्यापिनी या स्यात्सैकभक्ते तु सा तिथिरिति॥ दिनद्वये मध्याह्नव्यापिनी चेत्परा कार्या॥ शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे च-
तुर्दशी॥ पूर्वविद्धा न कर्त्तव्या परस्यैव युतेति निगमः॥ तथा॥ मुहूर्त्तमपि चेद्भाद्रे पौर्णिमायां चतुर्दशी॥ संपूर्णां तां विदुस्तस्यां
हरज्येद्विष्णुमव्ययमित्यनेन स्कंदोक्तेन वचनेन मध्याह्ने मुहूर्त्तमात्रं चतुर्दशी यदा तदा तस्यां नियमविधिः॥ नव

क नवा २

योदशी योगानिवृत्तये ॥ यदा पूर्वदिने मध्याह्नयोगिनी न परदिने तदा पूर्वा कार्या । विधिवाक्यसहस्रेभ्यः कालव्याप्तिर्बली
यसीति स्मृतिवचनात् । ननु पूर्वदिने मध्याह्नव्यापिन्यां व्रते क्रियमाणे प्रातस्तरारम्भमतिमान्कुर्यान्नित्यव्रतादिकं ।
नापराह्णे न मध्याह्ने पित्र्यकालौ हि तौ स्मृताविति दक्षवचनात् प्रातर्व्रतनिमित्ताभावे प्रारंभः कथमिति दोषः । सत्यं ।
प्रधानव्रतानुरोधेन प्रातस्तिथ्यभावेपि प्रारंभे दोषाभाव इति । यथाग्नीषोमीयः पशुः । यदिष्ट्वा पशुना सोमेन यजे
त सोमावास्यायां पौर्णमास्यां वा यजेतेति वाक्येन स्वयं दाप्रधानस्ततः क्रियते तेन दानत्वानुष्ठीयते ॥ यथा सोमांगत्वेन क्रि
यते न दानत्वानुष्ठीयते ॥ ~~यथा सोमांगत्वेन क्रियते~~ चतुर्दश्यामनुष्ठीयत एवं तद्व्रतं ॥ तदुक्तं ॥ अंगगुणविरोधे तादर्थ्याद् ॥
इति सधिकरणे ॥ यदा दिनद्वयेपि मध्याह्नेन व्याप्नोति तदा पूर्वा ॥ तिथ्यादौ तु भवेद्यावत् ह्रासो वृद्धिः परेहनि ॥ तावा
न्याह्यः सपूर्वेद्युर्दृष्टोपि स्वकर्मणीति वचनात् ॥ अतो मध्याह्नव्याप्त्यनुरोधेन व्रतं कर्तव्यमिति सिद्धांतः ॥ नि १२६
र्णयामृते तु उदयकालव्यापिन्यामेतद्व्रतं सिद्धांतितं ॥ तं न युक्तिसहं ॥ अतत्प्रसंगात् ॥ यदुक्तं ॥ मध्याह्ने भोज्यवे
लायामित्युपक्रम्य विधिवाचकानां लिङादीनां तु व्यानामदर्शनादिदमितिहासमात्रं ॥ अत्रोत्तरं ॥ यद्यपि

लिंगाद्यभावाद्विधिरिति । तदा दोरकानंतधारणादीनां विधिः केन स्यात् ॥ भवन्मते व्रतं चरेदित्यत्र प्रधानस्य पू
जनस्यैव विधानात् ॥ अथ सर्वव्रतशब्दार्थस्तदा सर्वेषां ध्याकान्यापत्तिः ॥ दोरकबंधनादिवाक्यानां विधित्वाभावे विशे
षणाभावः कुतो भवेत् ॥ तस्मादंगविशेषविध्यर्थमितिहासवाक्येषु विधिरेव समन्वेष्टव्यः ॥ तत्किमर्थं कृतेति येन ॥ यदुक्तं ॥
शीलया मध्याह्ने प्रारब्धमिति मध्याह्ने प्रारंभापत्तिरिति ॥ तन्न ॥ पूर्वं चर्येयमाणं व्रतं ईश्मुपजीवितं ॥ तेन शीलया
गौणकाले प्रारब्धमिति मध्याह्ने स्वयमेव सूचितं ॥ यद्भाषणेनेदमेकभक्तव्रतं ॥ किंतु पूजांगत्वेन भोजनमात्रं ॥
तदपि न चातुरीयत्वे ॥ शुक्लकायी च चतुर्दश्यां मासि भाद्रपदे नृप ॥ एकभक्तेन नियमं कृत्वा भक्तिसमन्वितः ॥ इति व्रतक
स्योक्तत्वं च न स्यान्निष्फलत्वं अशक्यत्वात्पवित्ररूपितं अनंतं पूजनस्यैव प्राधान्यं तस्यां पूर्वाह्णो वै देवानामिति दैविकत्वात् पूर्वा
ह्न एव पूजनं ॥ अत्र ब्रूमः ॥ यदि पूर्वाह्णे विपूजनं तर्हि मध्याह्ने चतुर्दश्यामर्चयेत्तामित्यस्य का गतिः ॥ यदुक्तं ॥ चतुर्दश्यामु
पक्रम्य पूर्णिमायां च पूजादिकमिति ॥ प्रधानस्य कालत्यागाभावोद्यापनं मीमांसकस्य न शोभते ॥ तस्मान्मध्याह्नानुरोधेन पर
विद्धायां व्रतं कार्यं ॥ किंच ॥ उपवासव्रतादीनां घटिकैकेति ॥ तथा ॥ उदिते दैवतं भानावित्यादिषु बौभानाकुदितेद्वि

मुहूर्त्तं व्याप्नोति तस्यां दैविकं नक्तादिकं च कार्यं पित्र्यं तु कं निर्णयामृते॥ तदप्युक्तं॥ तथा सत्येकनक्तादिव्रतेतिथिः
कर्मकालव्यापिनी अव्यापिनी इति विचारस्तस्यासंगतिः स्यादित्यलं॥ बौधायनेन व्रते व्यवस्थोक्ता उदये तूपवासस्य
नक्तस्यास्तमये तिथिः॥ मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिः॥ ॥इत्यनंतचतुर्दशी॥ ॥अथ पुत्रदा माघ मा३
धू४ माघचतुर्दशी॥ माघचतुर्दश्यां देवतातीर्थे विशेषोपासनया पुत्रप्राप्तिः स्यात्॥ तदुक्तं॥ हाटकेश्वरमाहात्म्ये॥ ऋषीन्प्रति
सूत उवाच॥ अनेनाम विख्यातः सर्वदेशेषु निर्बहुणः॥ अटेश्वर इति ख्यातो यैर्नदेवो विनिर्मितः॥ सुन्नत्यायेन दृष्टे
न वंशोच्छित्तिर्न जायते॥ यस्तो माघचतुर्दश्यां हरये श्रद्धयान्वितः॥ न तस्य जायते किंचिदुःखं संतापजा उन्नै
॥तत्रैव॥ तथात्रास्ति शुभं कुंडं वासिष्ठं पुत्रजन्मदं॥ यत्र स्नाता ऋतौ नारी सद्यो गर्भवती भवेत्॥ अमोघरेताः कांतार्थ
स्नानादत्र प्रकूर्यं जयैतं॥ अत्र वसिष्ठकुंडे॥ दंपत्योः स्नानमात्रेण जातोत्रैस्यासुपुत्रकः॥ तस्मात्सुपुत्रकं नामज १२७
उमेतं निगद्यते॥ अपि वर्षशतानारी स्नाचात्कुंडे सुशोभने॥ अटकेश्वरं ततः पश्येद्भिवभक्तिपरायणा॥ सद्यः पु
त्रमवाप्नोति वंशवृद्धिकरं परं॥ नागरखंडे॥ अथ नाद्य चतुर्दश्यां रामकुंडे स्नानतर्पणादिकं कं अनंतफ

लं दैस्यात् तदुक्तं नागरखंडे॥ कृष्णपक्षे चतुर्दश्यां मासि भाद्रपदे नराः॥ तत्र रामह्रदे स्नात्वा तर्पयिष्यंति ये पितॄन्
॥तेश्वमेधफलं प्राप्य यास्यंति परां गतिं॥ तथा॥ करिष्यंति च ये श्राद्धं भक्त्या शस्त्रहतस्य च॥ अपि प्रेतत्वमापन्नं न
रकेवासमाश्रितं॥ उद्धरिष्यंति सप्रेतमपि पापसमाचितं॥ तस्मात्सर्वप्रयत्नेन तत्र शस्त्रहतस्य च॥ तस्मिन्दिने कर्त प्र३
व्यं श्राद्धं श्रद्धयासमन्वितैः॥ उपसर्गमृतानां च सर्पाग्निविषबंधनैः॥ तत्र मुक्तिप्रदं श्राद्धं दिनेतस्मिन्नृपाह्रतां यः पितॄन्सर्प
येत्तत्र प्रेतपक्षेऽबुजैः रपि॥ सत्तेषामक्षयोभूत्वा पितृलोके महीयते॥ एतदःसर्वमाख्यातं रामकुंडस्य भुवं माहात्म्यं श्राद्ध
एन श्रेष्ठ सर्वपातकनाशनं॥ कृते चजद्धिवेदेन ग्रंथो निर्णयदीपके शैवव्रतं कृतो जात प्रचतुर्दश्या विनिर्णय॥ अथ पौर्ण
मासी॥ पौर्णमास्यमावास्ये तिथी कृपुवास्तादिव्रते परतिथ्यन्विते पोष्ये॥ तदुक्तं सावित्र्या पौर्णमासी चतुर्थ्या गणयं युता॥ रंभा
तृतीया चैसेताप पोष्याः सर्वसंयुताः॥ सावित्रीव्रतयुक्ता पौर्णिमा॥ ब्रह्मवैवर्ते भूतविद्धा न कर्त्तव्या॥ अमावास्याच
पूर्णिमा॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमं॥ अतएव चतुर्दश्यापूर्णिमेति युग्मवाक्यमपि सावित्रीव्रतविषयं॥ सा
वित्रीव्रतव्यतिरिक्ते परविद्धा॥ बृहस्पतिः॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ताः परपोष्याः प
रान्विताः॥ पौर्णमास्यां यानि पूर्वविद्धावाक्यानि तानि सावित्रीव्रतविषये योजनीयानि॥ यथा॥ प्रतिपत्संच मीभ्दूत सावित्रीव्र
तह्र्णिमा नवमी दशमी चैव नो पोष्याः परसंयुताः॥ नक्तैकभक्तादिषु कर्मकालव्यापिनी ग्राह्या॥ इति पौर्णमासी सामा
न्या॥ निर्णयः॥ फाल्गुनपौर्णमासी होलिकेत्युच्यते॥ फाल्गुन्यां प्रदोषव्यापिन्यां होलिका पूज्या॥ यास्तु व्रतः॥ सप्ताव्रेरणि
मायात्फाल्गुने रजनीमुखे॥ होलिकां हृज्जयेत्प्राज्ञो नान्यथा भ्रंशशंकया॥ रजनीमुखे प्रदोषे॥ तथाच भविष्यत्पुरा

णे। पूर्वाह्णे पूजयेद्देवान् मध्याह्ने च पितॄंस्तथा। प्रदोषे पूजयेद्धोलामिति धर्मो व्यवस्थितः। राजा नारंभणं कार्यं तस्माच्च मध्यमे निशागमे। गार्ग्यः। दृष्टे रवौ दिते चंद्रे ... स्तमुपागते। होलिकां तत्र कुर्वीत विधिदृष्टेन कर्मणा। प्रदोषसंध्यामतिक्रांतां किंचिदुदृष्टितारकां। विजयो नाम योगोऽयं सर्वकामार्थसाधकः। सूर्ये दृष्टे सदा कार्या होलिका शुभदायिनी। नक्षत्रसहिता पूज्या पूजनीया सुसंध्यया। सा यदि पूर्वदिवसे प्रदोषे भवति द्वितीयदिवसे न भवति तदा पूर्वेद्युर्वचनबलात् पूर्वदिने कर्तव्या। यदा पुनर्दिनद्वयेऽपि न भवति प्रदोषे पूर्वस्मिन् दिने प्रदोषे चतुर्दशी भवति द्वितीयदिवसे तिथिक्षयवशात् प्रतिपद्भवति। तदा पूर्वदिने कार्या। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति श्रूयमः। अत्र होलिकायां क्रीयमाणायां विष्ट्यादिकं दोषाय न भवति। गार्ग्यः। विष्टिरंगारकश्चैव व्यतीपातोऽथ वैधृतिः। प्रत्यकं चापि नक्षत्रं मकरात्परतः शुभा। भविष्योत्तरे रक्षाबंधे तु स्नाने फाल्गुन्यां चरजोत्सवे। देवीपूजा प्रकर्तव्या विष्टिश्रेष्ठा सदा भवेत्। दिवा भद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा। सा भद्रा भद्रदा यस्मात् भद्रा कल्याणकारिणी। देवीपुराणे। अहं भद्रा च भद्रा त्वं नावयोरंतरं क्वचित्। सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिताप्यहं। भद्रायां विहितं कार्यं होलिकायाः प्रपूजनं। करोति यदि तां तस्य राज्यराष्ट्रक्षयो भवेत्। योगियाज्ञवल्क्यः। आदित्यो मध्ये वैशाख्यां होलिकापूजने तथा। देवीपूजा सर्वासु विष्टिदोषो न विद्यते। अत्रापरो विशेषः। प्रदोषे चतुर्दशीसद्भावे च प्रदोषे एव होलिकां ज्वालयेदिति च नियमः। प्रदोषे पूर्णिमाया अभावे गौणकालेऽपि होलिका पूज्या। तदुक्तं प्रदोषात् मध्यरात्रांतं होलिकापूजनं शुभं। विष्टेर्मुखं वर्जनीयं ज्ञात्वा दैवज्ञकोविदात्। चतुर्थ्यादितिथिषु विष्टेर्मुखज्ञानप्रकारो निर्दिष्टो ज्योतिर्विद्भिः। यथा। कुजा १२८

मुखं१

पंच वेदा दिक्करा ... [illegible] ... विष्टेराख्यमसत् ... [illegible] ... यामेष्वं ... [illegible] ... तथा वासरे विष्टि तिथ्य पराईत्ता शुभं करा रात्रौ तु पूर्वार्द्धजा ... [illegible] ... नामतः।

रेणी सितपक्षे ... ढसिते नतरो ... तिथयो ज्ञेयाः स्वरैश्च प्रहरादिभिः। अत्र कृष्णपक्षविगणनया ... संमिते पुनः तिथिप्रहरादिगणिते स्वरसंख्याके प्रहरे विष्टेर्मुखं। एवं च पौर्णमास्याया अतुर्थे प्रहरे विष्टेर्मुखं भवति। मुखप्रमाणं घटिकाः पंचेति। मुखे मंगलवर्ज्यो। उक्तं रत्नमालायां। स्फुटमिह परिहार्यं मंगले पंचदेवा मुखाद्धः पुच्छं। पुच्छप्रमाणं घटिकास्तिस्रः। तत्र मंगलं कार्यं। लल्लः। पृथिव्यां यानि कार्याणि शुभानि ह्यशुभानि च। तानि सर्वाणि सिध्यंति विष्टिपुच्छे न संशयः। मध्यरात्रादर्वाक् होलिका पूज्या। स्मृत्यंतरे। मध्यरात्रीमतिक्रम्य विष्टिपुच्छं यदा भवेत्। प्रदोषे ज्वालयेदग्निं सुखसौभाग्यदायकं। यत्तु। भद्रायां दीपिता या तु होली राष्ट्रभंगं करोति वै। नगरस्य च नैव च तस्मात्तां परिवर्जयेत्। तथा। भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनी। तदपि द्वितीयदिने प्रदोषे फाल्गुनीसद्भावे पूर्वत्र निषेधकं। अयमाशयः। यदा तु पूर्वदिने प्रदोषात्प्रभृति पौर्णमासी द्वितीयदिवसे किंचिन्निशागमे भवति तदा उत्तरस्यां होलिका कार्या। ज्योतिःशास्त्रेऽस्तो कर्तव्य सम चंद्रा द्विवादश्येन्नतः। तदा पूज्या द्वितीये हि होली रात्रौ मनीषिभिः। अत्रापि सद्भावे पूर्णिमाया इति वैदारुन

जी२

याज्ञवल्क्यवचनात्॥ द्वितीयेह्नि रात्रौ पौर्णमास्यामेव होलीदीपनीया॥ न प्रतिपदि। तदुक्तमाचारतिलके। पूर्णायां ज्वाल
येद्वह्निं ध्रुवं कृत्वा तु सर्ववंदनं॥ तत्र राज्ञो भवेत्सौख्यं प्रजाः क्षेममवाप्नुयुः॥ प्रतिपदि होलिकां न पूजयेत्॥ ज्योतिःशा
स्त्रे॥ अस्तत्यां पौर्णमास्यां तु रात्रौ वै होलिकार्चनं॥ क्रियमाणं प्रतिपदि प्रजानाशकरं भवेत्॥ पौर्णमासीम
तिक्रम्य विद्यमाना यदा निशा॥ होलापूजा प्रतिपदि स्यात्तदा मरकादिकं॥ तथा॥ नंदायां वर्जयेत्प्राज्ञो बलि
दानं नमस्यते। भद्रायां गोकुलक्रीडां बक्रौ वह्निं यैरित्यजेत्॥ वह्नौ प्रतिपदि वह्निं होलिकं वर्जयेद्विधूत्यर्थं॥
आचारतिलके॥ नंदायां ज्वालयेद्धोलीं भद्रायां चस्मवंदनं॥ छत्रभंगस्तदा ज्ञेयो होहाहाकृतास्तूया प्रजाः॥
गार्ग्यः॥ प्रतिपदि निषेधमाचष्टे॥ अस्तंगते दिवानाथे यच्छायां चंद्रोद्गमो यदि॥ कृतस्तु नृपजितस्तत्र नवे
संतापकारकः॥ अतः क्षयवृद्धिद्वैदिनियदिद्विसेऽस्मान्पूर्वं प्रतिपत्सद्भावे सति पूर्वदिने कर्तव्या॥ १२९
तिथिः शरीरं तिरेव साधनं निधिः प्रमाणं तिरेव कारणमीति जङ्गवचनात्॥ एवं विष्टिर्मुख्यवर्ज
नीयमिति विशेषश्रावणाद्भद्रायां होलिकापूजनविधायकवाक्यानां बहूनां सद्भावात्प्रति ५१

५)

दि होलीदीपननिषेधदर्शनाच्च भद्रायां यानि होलीदीपननिषेधवचनानि तानि विष्टिमुख एव दीपननिषेधपराणीति बोद्धव्यं॥
न सर्वासु विष्टिषु निषेधकानि॥ यदपि वचनं॥ सार्धयाममत्रयं वा स्याद्द्वितीयदिवसे यदा॥ प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृता॥ त
दपि सर्वास्तावधिव्रतः स्यात्सर्वस्मिन्दिवसे यथा॥ प्रवृत्ता पूर्णिमा राज्ञा वितस्त्र चन्द्र तवत्॥ विष्टियुक्ता तदा कार्या होलिकाद्या प्रयत्न
तः प्रातिपद्वर्धमानापि वह्निं वह्निषु चर्चयेदिति ब्रह्मपुराणवचनैर्विरोधात्॥ सार्धयाममत्रयमित्यस्य वचनस्य पौर्णमासीनिमित्तश्राद्धव्रता
दिकं विषयीतरंकस्यं॥ यत्तु कैश्चिदेतद्वाक्यबलेन प्रतिपदि होलीदीपनमित्युक्तं तदत्रोदाहृत बहुनिर्वचनैर्विरुद्धं॥ विसद्धसम
वायेच्च यसामनुग्रहोन्यायः॥ तथा यस्मिन् काले यस्यां तिथौ स्कृतरां कृतकर्म फलदं भवतीति रद्धस्यं॥ कर्मणो यस्य यः कालस्तत्कालव्या
पिनी तिथिः॥ तया कर्मणि कुर्वीत ह्रासवृद्धी न कारणमिति स्मृतिवचनात्॥ एतेन इदमप्यपास्तं॥ श्राद्धकाले यदा पूर्णा प्रतिपच्चा
परान्हिकी॥ श्राद्धं निर्वर्त्य तत्काले कुर्यादुल्मुकहोलिकेइति॥ यतो दिवा होलादहनं नोक्तं॥ प्रदोषे चेत् प्रतिविधान लोकरणो दो
षदावस्त एवं किं च॥ आषाढी कार्त्तिकी माघी वैशाखी च विशेषेतः॥ स्नानदानविहीनास्ता न नेयाः पांडुनंदने त्यादि विशेषवच
नैरन्यास्तु पौर्णमासीषु श्राद्धस्यानियमावगमात् श्राद्धहोलयोः पौर्वापर्यमिति निर्णयः॥ अथेति कर्तव्यता॥ अत्रयेसर्व लोका

नोदातव्यं पुरुषर्षभ॥ यथाह्यशंकिता लोका रमयंति हसंति च॥ दारुकाणि च रवी ज्ञानि गृहीत्वा समरोत्सुकाः॥ योद्धारइवनिर्या
तिशिशवः संप्रहर्षिताः॥ सर्वसारा तिथिश्रेष्ठा पौर्णमासी युधिष्ठिर। अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे॥ गोमये
नोपलिप्ते च चतुष्के च गृहांगणे। संचयः शुष्ककाष्ठानामुपलानां सकारिषः॥ तत्राग्निं विधिवत्कृत्वा रक्षोघ्नैर्मंत्रविस्तरैः॥
सर्वदुष्टापहो होमः सर्वदुष्टोपशांतिकः। क्रियते स्यां द्विजैः पार्थ तेन सा होलिका मता॥ क्रीडाश्चायास्तदा भाव्याः पूजनं दु
खशांतिदं। तमग्निं त्रिः परिक्रम्य गर्जंति च हसंति च। प्रदक्षिणमंत्रः। त्वमग्ने सर्वभूतानामंतश्चरसि पावक। होलि
कां प्रकरिष्यामि रक्षां त्वं कुरु मे सदा॥ प्रार्थना॥ शिशिरस्यांतिके देवि वसंत मदनप्रिये॥ आगतासि विधानेन पूजां मे न
य होलिके। यन्मया शीतभीतेन निषिद्धाचरणं कृतं। ततः पापं समुद्भूतं नाशयत्वं दुताशनि। ततः प्रभाते प्रतिपत्स्नात्वा त्वासं
तर्प्य देवताः॥ वंदेयद्धोलिकाभूतिं सर्वदुष्टोपशांतये। पश्चाच्च प्राशयेद्विद्वान्धूर्तेषु घंसचंदनं। नमो नवस्य सा पूजा १३०
प्रोक्ता वार्षिक संमता॥ इति होलिकानिर्णयः॥ अथ श्रावणी॥ ॥अस्यां च दैविकं पूर्वाह्णेपि च यमपराह्णे कुर्यात्॥ तथियो
तरे॥ संवत्सरे श्रावण्यां तैयौ र्णमास्यां दिनोदये॥ स्नानं कुर्वीत मतिमाञ्श्रुतिस्मृतिविधानतः। ततो देवान्पितॄंश्चैव

तर्पयेत्परमांभसा॥ कर्याच्च ब्राह्मणश्राद्धं वेदानुद्दिश्य शक्तितः॥ शूद्राणां मंत्ररहितं स्नानं दानं च शस्यते। तत्रैव उपाकर्मादि
कं प्रोक्तं ऋषीणां चैव तर्पणं। ततस्तत्रापराह्णे रक्षाबंधनं कुर्यादुक्तं। ततोपराह्णसमये रक्षापोट्टलिकां शुभां। का
रयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितां। तथा। संहिता हूर्व विल्वकिसहितैः शुभ्रैर्युतिश्रसुमुहूर्तैः रक्षाबंधः कार्यश
तिकरः सर्व विप्राणां। ननु। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनं इत्य ६४
न इह एषमवचनेन श्रावणी पूर्वविद्धा विहिता। पूर्वविद्धा यावद्धि मुहूर्तान्भवति तस्यां तु स्मृत्यंतरे दोषश्रुतः। भ
द्रायां द्वेन कर्तव्ये श्रावणी फाल्गुनी तिच। श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनी। इति निषेधात्कथं तत्र स्यात्। सत्यं। श्रा
वण्याः पूर्वविद्धा विधानबलात् उपाकर्मादिकं श्रावणीकर्म विद्धायामपि भवति निषेधो रक्षाबंधविषयस्तस्य सुमुहूर्तैः
विधानात् इति श्रीवत्सः॥ अथवा तितोपराह्णसमये रक्षापोट्टलिकामिति। अत्र क्रमः पूर्णिमा या अपरोत्तागत्र अपराह्णस्तत्र
रक्षाबंधनस्योक्तत्वात् पूर्णिमा त्रियामगे चिष्टिर्नस्ति तत्येवा अथोपत्तितेगृहमध्ये दत्तचतुष्केन्यसेत्पीठं तत्रोपरि
विशेद्राजा सामात्यैर्युतः सुमुहूर्तैः रक्षाबंधनमंत्रः। येन बद्धो बली राजा दानवेंद्रो महाबलः। तेन त्वामनुबध्नामि

रक्षेमाञ्चलमाञ्चलं। तथा। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः। कर्त्तव्यो रक्षिकाबंधो द्विजान्संपूज्य
भक्तितः। अनेन विधिना यस्तु रक्षाबंधनमाचरेत्। स सर्वदोषरहितः सुखी संवत्सरं वसेत्। तथा। आषाढ्या
मथवाष्टम्यां चतुर्दश्यामुमापतिं। पवित्रैरर्चयेद्भक्त्या श्रावण्यां चेन्नरः सुखी निति। तथा श्रावण्यां श्रवणं प्र
च्यते। पूजामंत्रः। श्रवणाय नमस्तुभ्यं यत्र गोत्रसमुद्भवा। क्षेमं कुरुष्व मे नित्यं शांतिं कुरु पदे पदे। इति श्रा
वणीनिर्णयः॥ ॥अथोपवासव्रतसाधारणं किंचिदुच्यते। देवलः। दंतानां धावनं हिंसा मनृतं स्नेहमेव
च। असकृज्जलपानं च स्त्रीसंभोगं स्वपनं दिवा। तां ब्रह्मचर्य्यणं मांसं वर्जयेद्व्रतवासरे। मांसं क्षत्रियादिविष
यं। ब्रा[stain]णानां निषिद्धत्वात्। वृद्धवसिष्ठः। उपवासे तथा श्राद्धे न खादेद्दंतधावनं। व्यासः। अलाभे दंत
काष्ठानां निषिद्धायां तथा तिथौ। अपां द्वादशगंडूषैर्मुखशुद्धिर्भवेन्नृणां। पर्णैर्निवा विशुद्धेन जिह्वोल्लेखं च १३१
कारयेत्। यद्यपि तां ब्रह्मचर्य्यणं स्त्रीसंभोगं च सामान्येनोक्तं। तथाप्यदारेषु तदुपसंगमं। स्त्रीसंस्पर्शनं प्रेक्ष
णं संलापं च वर्जयित्वाऽन्यत्र व्रततो भैपइ निषेधो नास्ति। कात्यायनः। स्त्रीणां संप्रेक्षणात्स्पर्शात्त

ताभिः संकथनादपि। भिद्यते ब्रह्मचर्यं च न दारेष्वृतुसंगमात्। उपवासाशक्तं प्रति विशेषः। मरीचिः। यावनं नक्तैकभ
क्तदानान्यनुक्रमात्। कुर्यात्तथाप्यशक्तस्तु भार्यादीन्विनियोजयेत्। आदिशब्देन पुत्रभ्रातृभगिन्यादयः। तथा भार्या
भर्तुर्व्रतं कुर्यात् भार्यायाश्च पतिर्व्रतं। असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायत इति पैठीनसिः। कात्यायनः। उपवासेष्व
शक्तानामशीतेरूर्ध्वजीविनां। एकभक्तादिकं कार्यमाह बौधायनो मुनिः। वायुपुराणे। अथवा विप्रमुख्येभ्यो दानं
दद्याच्च शक्तितः। एकभक्तादिकं कार्यं उपवासे फलं तस्य समग्रं संभविष्यति। अत्र भोजनदोषोपि तत्क्षणादेव
नश्यति। स्कंदपुराणे। असामर्थ्ये शरीरस्य व्रते च समुपस्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितं। भ्रातरं भगिनीं शि
ष्यं वा ब्राह्मणं दक्षिणादिभिः। स्मृतिः। पितृमातृपतिभ्रातृस्वसृगुर्वादिभिस्त्वनुज्ञां। प्रोद्दिष्टा स्वमुपोष्याश्च येच फलभा
ग्भवेत्। आदिशब्देन पितामहमातामहादीनां उपसंग्रहः। कात्यायनः। स्त्रस्त्वन्याथेपिवासे शतगुणं फलं ब्रवीति।
यथा। पितृमातृस्वसृभ्रातृगुर्वर्थं च विशेषतः। उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्। दक्षिणा नात्र दातव्या श्रुतश्च षा
विहिता हि सेति। अथ स्त्रीणां व्रते विशेषः। उपवासं प्रकुर्वीत पत्नी पत्यनुज्ञानाद् नाधिकारिणी। यतः। रक्षेत्कन्यां पि
रनु दद्र

ताविष्णोः पत्निः पुत्राद्यथवादुके। अभावे ज्ञातयस्तेषां नस्त्री स्वानेच्यमर्द्दनि। विष्णो परिणीनां॥ कात्यायनः॥ नार्या भर्तुर्मृते चैव
व्रतादीनां चरेत्सदेति। अननुमत्य भावे तु सुमंतुः॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं। विष्णुः॥ पत्यौ जीवति या
नारी उपवासव्रतं चरेत्। अननुमत्य भावे तु आयुः सा हरते भर्तुः नरकं चैव गच्छति। मार्कंडेयः। नारी खल्वननुज्ञा
ता भर्त्रा पित्रा सुतेन वा। निःफलं तु भवेत्तस्याः यत्करोति व्रतादिकं। आदिशब्दात्तीर्थयात्रादि। स्त्रीणां व्रते पुष्पादि
कं मृदुष्टं। सुमंतुः॥ पुष्पालंकारवस्त्रालिगंधधूपानुलेपनं। उपवासेन दुष्यंति दंतधावनमंजनं॥ अथ रजस्वला
नारी प्रारब्धे व्रते प्रार्थनादिना परं नियोजयेदित्युक्तं दाक्षतं पूर्वं। तदन्यो व्रत्यां स्वके दत्तः पुत्रं वा विनयोपेतं भगि
नीं भ्रातरं तथा। एषामभावे एवान्यं ब्राह्मणं विनियोजयेत्। सत्यव्रतः॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भ
वेत्। न तत्रापि व्रतस्य स्यादुपरोधः कदाचन। तेषां पिबवचनं दपि विरुद्धं यं चैन दर्शनो रजस्वला स्वयमेव व्रतमाच १३२
रतु इति वक्तुं न शक्यते। यतः पंचमेहनि सेन्नुद्धा दैवे पित्र्ये च कर्मणि। तथा शुचिना कर्म कर्तव्यमित्यादि
विरुद्धवचनदर्शनादयमर्थः कल्प्यते। संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतमित्यृष्यशृंगवचनेनांगी

कृतस्य व्रतस्यापरित्यागाभिधानादन्यं नियोजयेत्॥ तथा॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति
पुलस्त्यवचनेन भोजननिषेधात्स्वयं च भुंजिं वर्जयेदिति निश्चीयते॥ अत्रैकादशीद्वादशीभिः प्रारब्धव्रत
मात्रोपलक्षणं॥ पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः॥ तत्कर्तव्यं जनैः शुद्धं दानार्चनविवर्जितमिति काला
दर्शे॥ सत्यव्रतवचनस्य सर्वव्रतसाधारणप्रवृत्तत्वात्॥ अथ काम्योपवासे प्रारब्धे तरा सूतकादिपा
ते प्रारब्धं कुर्यात्॥ कूर्मः॥ काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके॥ तत्र काम्यव्रतं कुर्याद्दानार्चनवि
वर्जितं॥ दानं देवार्चनं च सूतकांते कुर्यात्॥ मत्स्यपुराणे॥ सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं
॥ दानं दत्वा विधानेन व्रतसाफल्यमश्नुते॥ जनार्दनमिति व्रतदेवतोपलक्षणं॥ अंते कुर्याद्द्विजो दुष्टा
पत्तिं नान्यं नियोजयेदिति॥ एकादशीविषये वाराहपुराणे॥ सूतके च नरः स्नात्वा प्रणम्य मनसा ह
रिं॥ एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते॥ व्रतवासरे वर्ज्यमाह॥ कूर्मः॥ पाखंडानंत्यजान्सूतिं
पतितं च रजस्वलां॥ न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे॥ संस्पर्शे प्रायश्चित्तं विष्णुपुराणे॥
प

संस्पृशेद्वनुधंस्नात्वा शुचिरादित्यदर्शनात्॥ संप्राश्य तां शुचिषदं चिंतयेदच्युतं नरः॥ तेषामालोकना
त्सूर्यं संपश्येन्मतिमान्नरः॥ शुचिकं षदं शुचिचित्तकरं॥ विष्णुरहस्ये॥ अंसंप्राश्य तां इमां प्राश्य प्राशयेत्तुलसी
दलं॥ आमलक्याः फलं वापि पारणे प्राश्य शुध्यतीति॥ इत्यादि व्रतवासरनियमा व्रतप्रारंभसमाप्तिविधानविष
या मंत्राश्च ग्रंथांतरादवगंतव्याः॥ इति सर्वव्रतसाधारणकृत्यं॥ लतेचलदिवेदेन ग्रंथे निर्णयदीपके॥ निर्णी
तास्तिथयः सर्वाः किंचित्किंचिद्व्रतानि च॥ ॥ अथोक्तांत्यकर्मानंतरं सपिंडीकरणयोग्यताप्रतिपादकानि मलि
नाभिधानानि त्रिशोडशप्रेतश्राद्धान्यभिधीयंते। तावत्प्रेतकल्पे। मलिनश्राद्धसंज्ञानि पूर्वं षोडश काश्यप।
स्थाने चार्धमार्गे पथे ततो नेचितायां शवहस्तके। श्मशानवासिभूतेभ्यः पंचमं प्रातिवेश्मकं। षष्ठं संचयने प्रोक्तं
दश पिंडा दशाह्निकाः। श्राद्धषोडशकं चैतत्प्रथमं परिकीर्तितं। प्रतिवेश्मिकं गृहद्वारे प्रतिवेश्मनिवासि १३३
त्ति। षष्ठमिति श्मशानवासिव्यतिरिक्तप्रेतश्राद्धपरं। स्मृत्यंतरे। उत्क्रांतौ द्वारदेशे च विश्रांतौ च करे तथा। श्म
शानवासिदेवानां षष्ठं संचयने तथा। गरुडपुराणे। मृतस्थाने तथा द्वारि चत्वरे तार्क्ष्य कारणात्। विश्रामे का

योग्यतेति
ष्ठचयने तथा संचयने च षट्॥ पूर्वैस्तु पंचभिः पिंडैः शवस्याहुतियोग्यता॥ तथा॥ समृज्य चोपलिप्याथ उद्दिश्योद्दिष्टमेव च॥ अस्थि
स्त्रीपसमाधाय यत्किं तत्र विधानतः॥ विधानस्य शाखोक्तं विधिनेत्यर्थः॥ वृद्धयाज्ञवल्क्यः॥ आहिताग्निर्यथाशास्त्रं दग्धव्य
स्त्रिभिरग्निभिः॥ अनाहिताग्निरेकेन लौकिकेनापरो जनः॥ एकेनावसथ्याग्निना॥ अत्र विशेषः॥ मरणं ... समये अस्नातादि...
वोपघाते सति शुद्धिं लब्ध्वा निर्हरणं कुर्यात्। तदुक्तं। अस्नानाद्युपघातेन म्रियेत यदि मानवः। तत्र शुद्धिं समासाद्य ततो नि
र्हरणं। स्पर्शे म्रियेत। आहिताग्निर्यथा ... प्रायश्चित्तं तु। रजस्वला सूतकयोः श्वपाकस्पर्शने मृतः। ... संभवे तथा। त्र्यहो
कामयेच्छवमिति॥ शुद्धिः प्रायश्चित्तेनेति। अ। प्रायश्चित्तं तु। रजस्वला सूतकयोः श्वपाकस्पर्शने मृतः। ... त्रिंशत्कृच्छ्रैरसंभवे तथा। त्र्यहो
द्विवाग्न्याय नोद्ववीत। रजकश्चर्मकारादिस्पर्शने म्रियते यदि। सार्धेनाब्देन शुद्धिः स्यात् त्रिंशत्कृच्छ्रं यदि। ततः शुद्धः। निनि
च्छिन्नाधरोच्छिन्नादिरोषे। त्रीन्षडेवमाहिताच्छेणे। यद्वा यथायोग्यं प्रायश्चित्तं कृत्वानंतरमुक्तां तिपिंडकं यदि। ततः शुद्धः। निनि का९
रणं। प्रायश्चित्तविवेको गोविंदराजस्मृत्यर्थसारे द्रष्टव्यः॥ अपरो निरग्निर्लौकिकाग्निना कपालसंस्कृतेन। लौकिकाग्निरपि चंडा
लादिव्यतिरिक्तः। देवलः। चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः। तथा। ततो मत्स्यश्च कृ
यस्यानयति शूद्रो ऽग्निं तृणकाष्ठहवींषि च। प्रेतत्वं हि सदा तस्य स च धर्मेण लुप्यते इति। देवलस्मरणात्। तथा। ततो मत्स्यश्च किंचि
त्तु श्मशानं नीयते तदा। स्नानं प्रेतस्य कृत्वानु पुष्पैर्वस्त्रैः स्त्रजं नं। नग्न देहं दहेन्नैव किंचिद्देयं परित्यजेत्। किंचि
देयमिति शववस्त्रैकदेशं श्मशानवासार्थं परित्यजेत् तद्गृहीत्वा ब्राह्मणेतरो न कर्तुं यमः। गोव्रजस्थो ह्यलंत्याप चितामारोपयेत्तदा। प्रेतं दह
हतः मैत्रे दुर्गंधैः स्वपितं स्वर विदूषितं। अप्यनाथप्रेतनिर्हरणे फलविशेषं दर्शयति पराशरः। अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजा
तयः। पदे पदे यज्ञफलमानुपूर्व्याल्लभंतिते। न तेषामशुभं किंचित्पापं वा शुभकर्मणां। जलावगाहनात्तेषां सद्यः शौचं विधीयते

तथा। दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्। पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजातयः। तथा। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्प
र्शदूषितेति वचनात्। शूद्रसंपर्कं परित्यजेत्। मरणानंतरं केशनखादिनिकृंतनं वनाजं कारादिविधया। शाखाभेदेनाग्निहो
त्रात् नाभिरिक्तास्तेस्वशाखोक्ता अवगंतव्याः। गरुडपुराणे। पुष्पाक्षतैश्च संपूज्य देवं क्रव्यादसंज्ञितं। त्वं भूतकृत् जगद्योनि
स्त्वं लोकपरिपालकः। उक्तः संहारकस्तस्मादेनं स्वर्गं मृतं नयेति। मंत्रः। इति क्रव्यादमभ्यर्च्य शरीराहुतिमाचरेत्। अर्द्धदग्धे
तथा देहे दद्यादाज्याहुतिं ततः। अस्माद्वै त्वमभिजातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय तां पुनः। असौ स्वर्गाय लो
काय स्वाहा ज्वलतिपावकः। एवमाज्याहुतिं दत्वा तिलमिश्रां समंत्रकां। रोदितव्यं ततो गाढं एवं तस्य सुखं भवेत्। पत्न्याः पति
परोक्षे कपालाग्नेरभ्यनुज्ञास्ति। दहनकालेऽग्निनाशे दग्धकाष्ठैरग्निं मथित्वा दहेत्। लौकिकाग्नौ भूर्भुवः स्वः स्वाहेति
आज्याहुतिं कृत्वा दहेत्। इति स्मृत्यर्थसारे। इति दाहनिर्णयः॥ अथोदकदानविधिः। एतदुक्तं उदकदानं स्नानानंतर
कार्यं पुत्रैः स्नानं सचैलकं तिलोदकं ततो दद्यात् नामगोत्रे प्रगृह्य चेति गरुडपुराणे। प्रचेतसा त्वविशेषोऽत्र दर्शितः। न
दीकूलं ततो गत्वा शौचं कृत्वा यथाविधि। वस्त्रं संशोध्य ये धौते ततः स्नानं समाचरेत्। तथा। प्रेतस्य बांधवाः सपिंडाः
समानोदकाश्च मौनिनो यथावृद्धमुदकमवतीर्य अपसव्ययज्ञोपवीतिनो दक्षिणामुखाः प्रेतस्य नामगोत्रे उच्चार्य प्रेतस्त्व
प्यायितिजलंजलिं सतिलां पाषाणे प्रसेचयुः। वसिष्ठः। अपसव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्निति। तथा। स १३४
तत्प्रसिंचेदुदकं नामगोत्रेण वाग्यताः इति। सकृदेवोदकं प्रसिंचयेयुस्त्रिर्वा। त्रिः प्रसेकं कुर्युरिति प्रचेताः। तथा सपिंडोऽपि
ब्रह्मचारी समावर्तनपर्यंतं प्रेतस्योदकदानं आशौचं च न कुर्यात्। मनुः। आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्। समा
प्ते तूदकं कुर्यात् त्रिरात्रमशुचिर्भवेत्। आदिष्टी ब्रह्मचारी॥ ब्रह्मचारिणः उदकदानप्रतिषेधो मातापितृव्यतिरेके

ज४ ग३

पुकरणे
णे॥ एवं तद्विषये विशेषं वक्ष्यामः। दाहाद्यधिकारिनिर्णये। असपिंडानामपि उदकदानमुक्तं वसिष्ठेन। एवं मातामहाचार्यप्रे
तानामुदकपिंडक्रिया। कामोदकं सखिप्रत्ताः स्वस्रीयश्वशुरर्त्विजां। स्वसामित्रं प्रत्ताः परिणीता दुहितृभगिन्यादयः।
स्वस्रीयो भागिनेयः। श्वशुरो यः जायायाः पतिः। ऋत्विक् यज्ञे वृतः। कामोदकं कामतः इच्छा। एतेषामिच्छयोदकदानं कार्यं।
प्रेतात्मकदयकामनायां उदकं देयमन्यथा न देयं। अकरणे प्रत्यवायो नास्ति सर्वैः। गरुडपुराणे। अकृपां तं कुर्वीत दद्या
द्यां जलांजलिं। श्लेष्माश्रु बांधवैर्मुक्तं तदा प्रेतो यमश्नुते। इत्युदकदाननिर्णयः। अथ संचयनं निर्णीयते। दाहस्थानं
तत्र गत्वा संचयनक्रियां। प्रेतपिंडं प्रदद्याच्च दाहाद्विंशमनंतरं। केचित् दुग्धेन अस्थीनि सिंचंति चितास्थानं खगेश्वरेति गरु
डपुराणे। संवर्तः। प्रथमेऽह्नि तृतीये वा सप्तमे नवमेऽपि वा। अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह इति। द्वितीये त्वस्थि
संचय इति मिताक्षरा। अपरपक्षे संनिहितेषु ज्येष्ठेषु तिशांखायनः। पक्षेऽदशम्यादूर्ध्वं मित्रस्य जायन्ताः का १३८
दके अमावास्यायां कात्यायने मैत्रसूत्रे च चतुर्थे दिवसे। दिवसे चतुर्थे दिवसे अस्थिसंचयनं तेषां गंगापयसि क्षेपेत
॥ अतोऽस्मिन् दिने स्वगृह्योक्तविधिना संचयनं कार्यं। चंडुस्य तोतः अत्पान्तपानमादाय संस्कृतं विधिवच्छुचिः॥
गत्वा पितृवनं तत्र क्षीरेणाभ्युक्षयेत्ततः। यज्ञियस्य वृक्षस्य शाखामादाय यत्नतः। अस्थीन्यंतर्मगात्रेभ्यो न वैभाण्डेऽभि
धापयेत्। प्रचेतसा विशेषोक्तः। अस्थिसंचयने याम्योर्ब्धांनापरिकीर्तितः। जातं प्रेतं यमुद्दिश्य यमस्मुचिनं करोति चेति। देव
तानां नु यजनं तु शापत्स्य देवताः। देवताश्चात्र श्मशानदेवताः। इत्यस्थिसंचयनं। अथ प्रेतपिंडेऽद्यप्यनियमं शुनः पुछोदिश्य
यति। शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्। प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकं। गरुडपुराणे। उदनामिषमां
सक्तांशाकमूलफलादिना। प्रथमेऽहनि यद्दद्यात्तद्दद्यादुत्तरेऽहनि। संचयनेऽकृते मनुजो कालपित लोकं गच्छतः आमेनपा

धेयश्राद्धं मे कोद्दिष्टविधानेन कार्यमिति स्मृत्यर्थसारे। तथा। गृहद्वारे श्मशाने वा तीर्थे देवालयेऽपि वा। यत्राद्यो दीयते पिंडस्तत्रस
र्वान् समापयेत्। तथा। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत्। इति कर्तृ
नियमोऽपि गृह्यपरिशिष्टात्। इति मिताक्षरायां। सगोत्रादिनाये न दाहसंस्कारः कृतः स्तेनैव दशाहात् प्रेतकर्म कर्तव्यं
। तथा। असगोत्रोऽसगोत्रस्य प्रेतस्याग्निं ददाति यः। उदकं पिंडदानं च दशाहं स समापयेत्। इति स्मृतिकरंजिकायां
त्र५ । तथा। असगोत्रोऽसगोत्रस्याचार्यादेरंत्येष्टिं करोति तदा त्रिरात्रमाशौचं। तदुक्तं मिताक्षरायां। गुरोः प्रेतस्य शिष्यस्तु पि
तृमेधं समाचरेत्। प्रेताहारैः समं तत्र दशरात्रेण शुध्यति। इति मनुस्मरणात्। चंद्रिकायामपि व्याख्यातं। यथा शिष्यगु
रुणात् पुत्राभावे स एवाधिक्रियते स यदि अंत्येष्टिं करोति तदा दशरात्रं। अथ न करोति तदा त्रिरात्रं। आचार्ये सं
स्थिते सति त्रिरात्रमिति वचनात्। तथा। प्रेतस्पर्शिनो दशरात्रं स्वाशौचेन पक्षिणीमाशौचमपीति दशाकमाष्याः पि
वि॰ ंडदानविधिर्मार्गेण दर्शितः। पितृयज्ञक्रियया भावानावीतित्वादिरूपया प्रेताय पिंडरूपमन्नं दक्षिणस्थितो दद्या
दिति। तथा। कुशोपरि सकं च पुष्पं धूपं तथैव च। अश्मे पाषाणे पिंडं मात्स्यं पानीयं पाषाणे वा दद्यादिति शंखः। तथा।
अमंत्रं कारयेत् श्राद्धं दशाहं नामगोत्रतः। श्राद्धं तंतुयवैर्वस्त्रैः स्नानि स्वयमग्रहं यजेत्। इति विष्णुः। गर्त्ते पिंडं दशा
हं च प्रदातव्यं स्नात्वा दिने दिने। इति गरुडपुराणे। प्रचेतास्तु दिने दिनेऽञ्जलीन् पूर्णान् प्रदद्यात् प्रेतकारणात्। तावद्व १२५
वृद्धिश्च कर्तव्या यावत् पिंडः समाप्यते। यावद्दशमपिंडः समाप्यते तावत् प्रतिदिनमंजलीनां वृद्धिः कार्येति मिताक्ष
रायां स्मृत्यंतरे। नवमे दिवसे दद्यात् नवपिंडान् समाहितः। दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेत्। योगीश्व
रः। क्रीतलब्धान्नशाकानामन्यतमेन एककृत्स्थितो। पिंडं यज्ञवृता देयं प्रेतायान्नं दिनत्रयं। इति पिंडत्रयमभि

हितं॥ एवमनयोर्गुरुलघुकल्पयोरन्यतरानुष्ठानेनापि शास्त्रार्थसिद्धौ सत्यामपि केशव
कृत्वेन दशपिंडरूपे गुरुतरकल्पे यद्यप्यप्रवृत्तिशंका तथापि प्रेतस्य नवभिः पिंडैः कुटी निष्पद्य
ते॥ तथा॥ प्रथमेऽहनि यः पिंडस्तेन मूर्द्धा प्रजायते॥ इत्यादिस्मृतिपुराणवाक्यैः प्रेतस्य शरीरावयवनिष्पत्ति
रूपोपकारातिशयार्थं विशिष्टे दशपिंडरूपो गुरुतरकल्प्याम्नाय आश्रितः॥ योगीश्वरोक्तमिदं पिंडत्रया
भिधानमनादृतं॥ अनशनादिनाशौचह्रासेपि दशपिंडान् दद्यादिति शातातपः॥ आशौचस्याप्यति
ह्रासे पिंडान् दद्याद्दशैव तु॥ यन्मरीचिवचनं॥ प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितं॥ प्रागुदीच्यां चरुं
कृत्वा स्नातः प्रयतमानस इति॥ तदिदं दर्भवर्जिताभिधानं अनुपनीतविषयं॥ असंस्कृतानां भूमौ पिं
डं दद्यात्। संस्कृतानां तु कुशेष्विति प्रचेताः॥ इति दशाहपिंडनिर्णयः॥ अथ दशाहपिंडमध्ये पिंडव्यतिरिक्ता
नि नवश्राद्धाभिधानि श्राद्धानि॥ मरणाद्दारभ्य प्रथमादिविषमदिनेषु यच्छ्राद्धं तन्नवश्राद्धमुच्यते॥ तदुक्तं
श्राद्धादशाहं मरणाद्विषमेषु दिनेषु यत्॥ नवश्राद्धान्यनुतिष्ठेदेकोद्दिष्टविधानतः॥ प्रेतैकोद्दिष्टविधिने

ति शेषः॥यमः॥तृतीये पंचमे चैव नवम्येकादशेहनि॥यदत्र दीयते जंतोस्तन्नवश्राद्धमुच्यते॥अंगिराः॥प्रथ
मेह्नि तृतीयेह्नि पंचमे सप्तमे तथा॥एकादशे नवमे स्युर्नवश्राद्धानि षट् तथा॥केचन पंच नवश्रा
द्धान्याहुरन्ये षडिति॥तदुक्तं शिवस्वामिना॥नवश्राद्धानि पंचाहुराश्वलायनशाखिनः॥आपस्तंबा
षडित्याहुर्विभाषा चेतरे जनाः॥नवश्राद्धोपक्रमे वर्ण विषये व्यवस्था प्रतिपादिता॥भविष्योत्त
रे॥नवसप्तविंशाराशां नवश्राद्धान्यनुक्रमात्॥आद्यंतयोर्वर्णयोस्तु षडित्याहुर्महर्षयः॥विशां नक्ष
राणां समेस्यनुक्रमः॥विप्रक्षत्रयोः षडिति॥व्यासः॥प्रथमे सप्तमे चैव नवम्येकादशेहनि॥यत्तु
वै दीयते जंतोस्तन्नवश्राद्धमुच्यते॥तथा॥केचित्पंचैव नवमं नवेदंतरितं यदि॥एकादशेह्नि
तत्कुर्यादिति स्मृतिकृतो विदुः॥कएवः॥नवश्राद्धं मासि केच यद्यदंतरितं भवेत्॥तदुत्तरेण १२६
सातंत्र्यादनुष्ठेयं प्रचक्षते॥सातंत्र्यं समानतंत्रत्वं॥कालादर्शे॥दैवादंतरितं पूर्वमुत्तरेण सहाचरे
त्॥दैवादित्यपलक्षणं॥दैवान्मानुषाद्वापराधादंतरितं अनुष्ठेयं॥अत्रिः॥प्रेतार्थं स्तूतकांतेउ

ब्राह्मणान्भोजयेद्दश॥नवश्राद्धनिमित्तं तु एकमेकादशेहनीति॥स्मृत्यर्थसारे तु नवश्राद्धगणमुक्त्वा एतत्
नवश्राद्धमेकादशेह्नि वा कार्यमित्युक्तं॥इति नवश्राद्धविधिनिर्णयः॥अथोपक्रांते दशाहपिंडेंत
रा दर्शपाते दशाहपिंडसमाप्तिः कार्येत्ययं पक्षः प्रदर्श्यते॥तावत्कालादर्शात्॥चंद्रक्षये वै ल्लिनौ
वदेयः प्रेतस्य शांतये॥यदि दद्यात्पिंडं तदा तु कुलविनाशनं॥पैठीनसिः॥आद्येद्वाहादिकर्त्तव्याः प्रेतपिंडो
दि५ दकक्रियाः॥द्विरैंदवे तु कुर्वाणः पुनः शाबं समश्नुत इति॥स एव चांशो दर्शानंतरं द्वसमानो द्वितीय इति॥अमुमेवार्थं
ऋष्यशृंगोप्याह॥आशौचमंतरा दर्शो यदि स्यात्सर्ववर्णिनां॥समाप्तिं प्रेततंत्रस्य कुर्यादित्याह गौतमः॥भविष्यत्पुराणे॥
प्रवृत्ताशौचतंत्रस्य यदि दर्शः प्रपद्यते॥तावतैवोत्तरं तंत्रं पर्यवस्येदहात्परं मिति गालवचनदर्शनात्माता पित्रोर्मृ
तौ त्रिरात्राद्युत्तरत्र दर्शपाते दशाहपिंडानां समापनं॥इतरविषये यदा कदाच दर्शपातेपि ऊर्ध्वं तंत्रस्य समापनमिति प्र
तिपादितं कालादर्शे॥तथा तत्रैव॥अंतर्दर्शो हि दर्शश्चेत्तत्तंत्रं सर्वं समापयेत्॥पित्रोस्तु यावदाशौचं दद्यात्पिंडं जलांज
लीन्॥इदं गौतमवचनं मातापित्रोर्दशाहपिंडाद्य समाप्तिविधानपरमपि अहारूर्ध्वं दशापाते पिंडादि समाप्तिपरं॥अ[illegible]हा

त्पूर्वं दर्शपाते यावदाशौचं नावत्पिंडादि कुर्यादेवं गालववचनेन समानार्थतायथा तथाव्याख्यातं॥ कालादर्शे
ह दमयुक्तं वचनस्य निर्णयामृते त्वेतत्सर्वं प्रकटार्थास्युपगमात्॥ एतत्सर्वमनत्यांगीकृत्य च दशाहांतरादर्शपा
पाते पि मातापित्र विषये पिंडादि समापनस्त्र हणं शिष्टाचार दर्शनेन गालव गौतम वचनायोर्देशाचारत्वे देन व्य
वस्थाकृता॥ यस्मिन्देशे श्री हाल्परं दर्शपाते उत्तरतंत्रस्य समापनाचारस्त द्विषयं गालववचनं॥ यत्र देशे दर्शपाते पि दशा
हपर्यंतं पिंडाक्रियते तद्विषयं गौतमवचनमिति व्यवस्था॥ एवं पूर्वोक्तं न निंदितं नांगीकृतं च॥ पारिजाते त्विदं पिंडादि
समापनं क्षेत्रज दत्तकादि पुत्राणां यावत्कालाश्रयेण निर्गुणमातापितृविषयमित्युक्तमथमेवेतिबोधेन॥ एवमितर वि
विषये यदाकदाचा दर्शपाते समापनाभिधानमपि निर्गुणविजातीयविषयं ज्ञेयं। विज्ञानेश्वरेण त्वंतरादर्शपा
ह ते पिंडादि समाप्ते शिष्टसंप्रदायाननुष्ठितत्वादयं पिंडादि समाप्त्यभिविधायकवचनगणे लोकाचारविरुद्ध इति भि १२७
ताक्षरादौ नोपात्तः॥ तेनेदं प्रकटीकृतं सर्वविषये प्यंतरा पिंडसमापनं लोकाचारविरुद्धमिति॥ अस्वर्ग्यं लोक
विद्विष्टं धर्ममप्याचरेन्न तु॥ तथा॥ न शास्त्रदृष्टा विदुषा कदाचिदुल्लंघनीयाः कुलदेशधर्माः॥ यत्तु कालादर्शादौ

चे पिंडसमापनपक्षोह्यावर्तनं कृतं तत्सत्तामात्रं दर्शितं॥ दृष्टं च श्रुतावौर्ध्यपदेहिकनाहृतपक्षाणामुद्वावर्तनं कृतौ यथा॥
सुराग्रहो गोपथ्याजनो नादीनामिति तद्वत्॥ तस्मान्नांतरा पिंडादि समापनं॥ इत्यंतरा दर्शयाते पिंड निर्ण
यः॥ अथ नवकश्राद्धविधौ विशेषः॥ यदुक्तं॥ नवश्राद्धान्यनुतिष्ठेदेकोदिष्टविधानवदिति तेन श्राद्धोमर्मंत्रं
च पिंडोदकविवर्जितं॥ पिंडोदकं पिंडेउदकांजलिरहितं॥ न पात्रमालभ्य जपति॥ नाशिषं प्रति
गृह्णीयान्नात्रं विकिरेपि च मंत्रवर्जं॥ प्रेतकल्पे॥ आशिषो द्विगुणा दर्भाः स्वस्त्यस्तु प्रणवस्तथा॥ अग्नौकरणमु
दिष्टं श्राद्धं वैश्वदेविकं॥ विकिरं न स्वधाकारम्यं पित्र्यशब्दो न विद्यते॥ अनुशब्दं न कुर्वीत नावाहनमथोल्मुकं॥
आसीमांतं न कुर्वीत नमस्कारं प्रदक्षिणं॥ अष्टादशैव वस्तूनि प्रेतश्राद्धे विवर्जयेत्॥ रंम्यंअग्निरस्यतामि
ति॥ उच्छिष्टं दर्भमार्जनं॥ इति प्रेतश्राद्धविधिः॥ अथ पित्रादिश्राद्धकर्मण्यधिकारिणो निरूप्यंते॥ अ
विभक्तेषु पुत्रेषु श्राद्धादि धर्म। एक एव स्यात्॥ मरीचिः॥ सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येण च
विभक्तेन सर्वैरेव कृतं भवेत्॥ स्मृतिसारे॥ अविभक्तेषु संसृष्टेष्वेकेनापि कृतं तु यत्॥ देवयज्ञादि सर्वार्थं तो
कारं के

लौकिकाग्नौ कृतं च यत्॥ तथा॥ ब्राह्मणमविभक्तानामेको धर्मः प्रवर्त्तते॥ विभागे सति धर्मोऽपि भवेत्तेषां पृ
थक् पृथक्॥ याज्ञवल्क्यः॥ एकेनैवाविभक्तेन कृते सर्वैः कृतं भवेत्॥ विभक्तास्तु पृथक् कुर्युः प्रतिसंवत्सरादिकं। अमुमेवा
र्थं गरुडपुराणेऽपि। विभक्तैस्तु पृथक् कार्याः क्रिया सांवत्सरादिकाः। एकेनैव प्रकर्त्तव्याः पुत्रेणाथ स्वयं स्वयं। श्लोके विभक्ता
णां पृथक् श्राद्धानुष्ठानविधानेऽपि पौर्वदैहिकविशेषणात्॥ प्रेतपक्षे कृत्स्ने बहवोऽपि यदा पुत्रा विधिमेकः समाचरेत्। नव
श्राद्धं सपिण्डं च श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि॥ इति। अन्त्येष्टिं कुर्वते येषु कृष्टिभिः समुपाकृतं।
॥ इत्यादिवचनैर्न्योऽपि विभक्तमपौर्वदैहिककर्मोपयोगि द्रव्यमविभक्तमिव सर्वं पाक्षसर्वत्रिमत्वात्प्येष्ठ एव सपिण्डीकरणं
तं कुर्यात्। तेन कृतं सर्वैरेव कृतं भवतीति स्मृत्यादिषु दृष्टं। कृतावपि एकस्मिन् कर्मणि कर्तृबहुत्वं श्रूयते यथा। गृहपतिः सप्त
दशाः सत्रमासत इत्यत्र सप्तदशानां स्वांशदानेऽयोग्यसाधनं द्रव्यं साधारणीकृत्य सर्वेषां त्यागकरणेन सहकर्तृत्वं तद्वद्
सर्वेषां कर्तृत्वमिति। स्मृत्यर्थसारे। दाहाद्यपक्रममेकादशाहान्तं ज्येष्ठो योग्यः कुर्यात्। नवश्राद्धानि षोडशश्राद्धानीति विभ
क्तो वाविभक्तो वा एक एव कुर्यात्। सपिण्डीकरणं विभक्ताः पुत्राः सधना अप्येकस्मिन्दिने वृद्धिकामाश्चेत् पृथक् कुर्युः। ना
ऽयथा सपिण्डनं पृथग्विधानदेशांतरवासानां पुत्राणां तत्सपिण्डनस्यानिवृत्त्याभिप्रायेण मिताक्षरायां तु प्रेतश्राद्धानि सपिण्डीकरणं च
पिण्डीकरणं संविभक्तधनेष्वपि बहुषु भ्रातृषु सत्स्वेकेनैव कर्तव्यं। न सर्वैः कर्तव्यमिति स्मृतं। अत ऊर्ध्वं सर्वैः पृथगेव कुर्युः। सर्वत्र गोत्रा १३८
ज्ञाने नाम्नैव कार्यं। अथ पुत्रप्रभृत्यधिकारिणः। सुमंतुः। मातुः पितुश्च कुर्वीत तमेतयोरौरसः सुतः। पितृमेधिकसंस्कारमंत्र एव
कर्मार्हो ती। औरसो धर्मपत्नीज[illegible] इति। औरसाद्यपविद्धपर्यंतं पुत्रा वक्ष्यंते। तथा। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव चेति। भ्रातु

दरद१ स्वपृ ३ ६५

सहोदरो भ्राता तदभावे तु तत्सुतः॥ तैत्तस्य सोदरो भ्राता तदभावे तु तत्सुतः॥ शंखः॥ पुत्राभावे तु पत्नी स्यात्त
दभावे तु सोदरः॥ तथा॥ पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ॥ धनहार्यथ दौहित्रस्ततो भ्राता च तत्सुता
तः॥ तथा॥ भ्रातृजेन तु कर्तव्यं यस्य नास्ति सहोदर इति स्मृत्यंतरे॥ तथा॥ उत्सन्नबांधवं प्रेतं पिता भ्राता तथा
ग्रजः॥ जननी वापि संस्कुर्यादिति महदेनोऽन्यथा भवेत्॥ ननु॥ न च माता न वै पिता कुर्यात्पुत्रस्य पैतृकं॥ नाग्रज
तथा भ्राता भ्रातॄणां च कनीयसां इत्यादिवाक्ये माता पित्रोः पुत्रस्यौर्ध्वदैहिकनिषेधात्॥ तथाऽग्रजस्य कनी
यसां संस्कारे निषेधात्कथमधिकारस्तेषामिति चेत्। निषेधस्य पुत्राद्यधिकारिसद्भावविषयत्वेनास्ते
हविहिंतविषयत्वं वा॥ ततश्च पौत्रस्य कनिष्ठभ्रातुर्भ्रातृपुत्रस्य च सद्भावे ज्येष्ठभ्रातुर्मातापित्रोश्चनाधि
करः॥ कनिष्ठभ्रातृपुत्रयोः पुत्रत्वेन संस्कवान्॥ पौत्रस्य स्वसंततित्वात्॥ तथा॥ भ्रातॄणामेकजातानामेक
श्चेत्पुत्रवान्भवेत्॥ सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥ पत्नीनामेकजातानामेका चेत्पुत्रिणी भवे
त्॥ सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीत्॥ एवं पुत्राभावे पौत्रस्य॥ तदभावे लघुभ्रातुः॥ तदभावे त्व

दपुत्रस्य॥ तदभावे ज्येष्ठभ्रातुः॥ तदभावे मातापित्रोरधिकारः॥ एतदर्थं शियेन बोद्धायनः॥ यदि स्नेहेन कुर्यात्तां सपिं
डीकरणं विना॥ गयायां तु विशेषेण ज्यायानपि समाचरेत्॥ स्नेहवशान्मातापितापि नरो ज्येष्ठोपि श्राद्धादि निर्दैक॥ कात्यायनः॥ अनुजाग्रजावपि भ्रातुः
कुर्वीत सत्क्रियां॥ ततस्तु सोदरास्तद्रमेण तनयास्तयोरिति॥ संग्रहेपि पत्नी भ्राता च तनुजः पिता माता स्नुषा तथा॥ भगिनी भागिनेयश्च स
पिंडः सोदकस्तथा॥ असन्निधाने पूर्वेषामुत्तरोत्तरे पिंडदाः स्मृताः॥ विष्णुपुराणे॥ पुत्रः पौत्रः प्रपौत्रश्च तद्वद्वा भ्रातृसंततिः॥ सपिंडसंततिर्वापि क्रि
यावान्नृप जायते॥ तेषामभावे सर्वेषां समानोदकसंततिः॥ मार्कंडेयः॥ सख्युरुस्त्रबंधोश्च स्वजातेः श्वशुरस्य वा॥ जामातुस्तेऽदत्तःकु
र्याद्विखिलं पितृमेधिकं॥ सर्वाभावे तु नृपतिः कारयेत्तस्य रिक्थतः॥ तज्जातीयैर्नरैः सम्यग्दाहाद्याः सकलाः क्रियाः॥ स्कंदपु
राणे॥ सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकं॥ पित्रोरनुपनीतोपि विधिश्रौ मातापित्रोरौर्ध्वदेहिकं कुर्यात्॥ तथा का
त्यायनः॥ असंस्कृतेन पत्न्या च ह्यग्निदानं समंत्रकं॥ कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि॥ शंखः॥ भार्या पिंडं पतिर्दद्या १२९
द्भर्तुर्भार्या तथैव च॥ श्वश्र्वादेश्च स्नुषा चैव तदभावे तु सोदरः॥ पुत्राभावेपि दद्यादौरसः सुतः॥ और्ध्वदेहिकमप्येतु सं
स्कृता श्राद्धकारिणः॥ औरसः सुतः अनुपनीतोपि विमिथ्योदंभृती सपत्न्यश्चेति स्मृत्यर्थसारात्॥ अपुत्रायां मृतायां च पतिं कु

र्यात्सपिंडनमिति॥ गरुडपुराणेपि चेद्दद्यादौरसः पुत्रो जनन्या और्ध्वदैहिके॥ तदभावे पत्नीजः क्षेत्रजाद्यास्तथा परे॥ इ
ति कात्यायनः॥ तथा॥ बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत्॥ सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीत्॥ पु
त्रपौत्रप्रपौत्राणामभावे अन्येषामधिकारः॥ सति पुत्रे निषेधो ऋष्यशृंगेण॥ पुत्रेषु विद्यमानेषु नान्यं वै कार
येत्स्वधां॥ अनुकल्पो ह्यनुकल्प्यो ह्यपुत्रस्य भ्रातुः कुर्यात्सनाभिकः॥ स्मृत्यंतरे॥ अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भ
वेत्॥ स एव तस्य कुर्वीत पिंडदानोदकक्रियां॥ पार्वणं तेन कार्यं स्यात्पुत्रवद्भ्रातृजेन तु॥ पितृस्थाने तु तं कृत्वा
शेषं पूर्ववदाचरेत्॥ पार्वणं संन्यासिविषयं॥ धनग्रहीता वा पिंडादि कुर्यात्॥ तदुक्तं स्कंदपुराणे॥ मम त्वमेत
न्मनुष्याणां द्रविणं परिकीर्तितं॥ तद्धृतं मलमादत्ते दुर्विधां ज्ञानिनामपि॥ ऋषिभिस्तस्य निर्दिष्टा निष्कृतिः
पावनी परा॥ आदेहपतनात्तस्य कुर्यात्पिंडोदकक्रियां॥ अदायहरोपि पुत्रिकृतोपि दौहित्रः सुतो मातामहौ
स्यौत्तरं क्रियां कुर्यान्मातामहस्य शाखया इति निरूपितं प्राक्॥ तदुक्तं पराशरेण॥ दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयै
र्योति॥ तथा स्मृत्यर्थसारे॥ दौहित्रमातामहौ परस्परं दत्तः॥ इत्याद्यधिकारिणः कुर्युः॥ तथोपनयनव्रतद
र्व

टू१

ऽतो ब्रह्मचार्यपि मातापित्रुपाध्यायाचार्याणामौर्ध्वदैहिकं कुर्यान्नोपनयनव्रतान्नश्येत्॥ तदाह याज्ञवल्क्यः॥ आचा
र्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती॥ संकटान्नं च नाश्नीयान्न च तैः सह संवसेत्॥ उपनयनमात्रं कृत्वा सांगवेदाध्या
पयिता आचार्यः वेदैकदेशाध्यापयिता उपाध्यायः॥ कटान्नं सूतकान्नं॥ व्रती ब्रह्मचारी॥ व्रत्येवं उपनयननिमित्तनि
द्याचरणादिव्रतान्न भ्रश्यते अशौचेन भवति॥ व्रतसमाप्त्यनंतरमाशौचं विधेरिति मिताक्षरायां॥ तथा मा
तामहस्याप्युक्तं॥ कालादर्शे॥ मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदैहिकं॥ कु[illegible]न्मातामहस्यापि व्रती च न
स्यात्तेन व्रतादिति॥ वसिष्ठेपि ब्रह्मचारिणः कंदाहकर्मणा व्रतान्निवृत्तिरन्यत्र मातापित्रोरिति॥ अत एव
स्मृत्यर्थसारे॥ मातापित्रादिव्यतिरिक्तमृतेतकर्म करणे पुनरुपनयनं कार्यं॥ भविष्यत्पुराणे॥ व्रतस्थो
पि यदा पुत्रः पितुः कुर्यात्क्रिया नृप॥ तथा मातामहस्यापि दौहित्रः कर्तुमर्हति॥ मातापित्रादिव्यतिरिक्त १५०
विषये तु ब्रह्मचारी न कुर्यात्॥ तदुक्तं॥ न ब्रह्मचारिणः कुर्युरुदकं पतितान चेति॥ उदकमिति पिंडदानस्या
प्युपलक्षणं॥ तथा हि वसिष्ठः॥ स्त्रीबाधानोदकं कुर्युस्तेना व्रात्या विधर्मिणः॥ गर्भभर्तृद्रुहश्चैव सुरापो

ष३

श्चैव योषितः॥ इत्यादिनिषिद्धा॥ इत्यधिकारिनिर्णयः॥ अथाशौचवतां पुत्रादीनां कर्तव्यताविधिः॥ रात्रिमृतस्य रा
त्रावेव दाहः कार्यो वपनं प्रातः कुर्यात्॥ तदुक्तं स्मृतिसंग्रहे॥ रात्रौ दग्ध्वा च पिंडांतं कृत्वा वपनवर्जितं॥ वपनं ने
ष्यते रात्रौ [illegible]स्य वपनक्रिया॥ निगमे॥ संध्यायां वा तथा रात्रौ दाहो न कार्य इत्येवं परं॥ प्रथमे दाहादारभ्य दि दा३
नं दिनं प्रतियच्छ्राद्धं तन्नवश्राद्धमुच्यते॥ इत्युक्तं चंद्रिकानिबंधे॥ तदग्निप्रायेण रात्रौ दशाहपिंडोनारंभणी
यः॥ तथा॥ रात्रिमृतस्यानस्यादिनादिवा दाहेन कार्यः॥ शवं पर्युषितं नैव कुर्यात्॥ शवं रात्र्युषितं चेत्त्री[illegible] रक५
रु५ [illegible] द्वा तावद्दहेदिति स्मृत्यंतरे॥ तथा गुरौ मृते उपवसेयुः पुत्राः पत्नी चेति॥ स्मृतिः॥ महागुरुनिपाते तु आर्द्र
वस्त्रोपवीतिना॥ महागुरुः पिता॥ अथ वपनकालः॥ गंगायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते॥ आधाने सोमपाने
च वपनं सप्तसु स्मृतं॥ अत्र गुरुः पितामंत्रोपदेष्टा॥ विद्योपदेष्टा चेति॥ तथा च द्वितीयेऽहनि कर्तव्यं क्षुरकर्म प्रयत्नतः॥ म३
तृतीये पंचमे वापि सप्तमे वा प्रदानतः॥ अत्र द्वितीयाहादि विकल्पाः॥ आचारति ज्ञेके॥ चतुर्विधं तु यत्पापं
केशमाश्रित्य तिष्ठति॥ तावत्तसूतकी ज्ञेयो यावत्केशान्न मुंचति॥ आपस्तंबः॥ अनुज्ञाविनी च परिवापनमिति॥

अनुभाविनोऽल्पवयसः सपिंडाः॥ अथवा अनुपश्चाद्भवंतीत्यनुभाविनोऽल्पवयसः॥ अनुभाविनः पुत्रा इति के
चित्॥ तेषां वपनमिति॥ देवलः॥ दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्॥ तत्र त्याज्यानि वासांसि केशश्मश्रुन स्मर
खानि च॥ तथा च स्मृत्यंतरे तैलवाससां त्याग इत्युक्तं॥ अनेन वचनेन वपनस्य द्वितीयाह्नवृत्तिर्न तु विकल्पः॥ सप्तमे
वा प्रदानत इति एकादशाहात् पूर्वमित्यर्थः॥ स्मृत्यर्थसारे॥ वपनं पुत्राणां प्रथमेऽह्नि कार्यं दशमे वा॥ आद्य
दर्वाक् कस्मिंश्चिद्दिने वा ग्रामाद्बहिः कार्यं॥ नखनिकृंतनं च॥ मिताक्षरायां तु दशमेऽहनीति वाक्यमुदाहृ
त्य द्वितीयेऽहनीति वाक्यमुदाहृतं तेनाद्यावृत्तिर्निरस्ता॥ मनुना विशेषोऽप्युक्तः॥ अक्षारलवणान्नाः स्युर्निमज्जेयुश्च
ते त्र्यहं॥ मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ॥ क्षिताविति शेषः॥ याज्ञवल्क्यः॥ क्रीतलब्धाशना भूमौ
स्वपेयुरिति॥ क्रीतमयाचितं वा अशनं येषां ते तथा भवेयुः॥ अयाचिताभावे क्रीतमशनमर्थादुक्तं॥ भवंती १४१
ति मिताक्षरायां॥ क्रीतलब्धाशननियमोऽपि दिनत्रयपर्यंतं॥ स्मृत्यर्थसारे॥ अयाचिताशनेन वा
ऽन्यगृहपक्वेन द्विविधेनैव वर्तेरन् न तु स्वगृहपक्वेन॥ क्षारलवणमांसानि सूपपायसवर्ज्यं॥ तथा अधःशायिनो ब्रह्मचा

रिण इति॥ वर्णाः सिद्धाः॥ प्रस्तरे त्र्यहमनश्नंत आसीरन्निति क्रीतलब्धाशना इत्यर्थः॥ शयनार्थं तृणमयः प्रस्त
र इति॥ स्मृत्यर्थसारे॥ प्रेतमुद्दिश्य कुर्वतः संचयनादर्वाक् स्त्रीसंगमे चांद्रं॥ ऊर्ध्वं कार्यं॥ अन्येषां प्रेताशौ
चिनां पूर्वं त्रिरात्रं पश्चादुपवास इति॥ मिताक्षरायां॥ प्रारब्धे प्रेतपिंडे तु मध्ये चेत् सूतकं भवेत्॥ तथैवा
शौचपिंडांस्तु शेषान् दद्याद्यथाविधि॥ तथा शावाशौचमध्ये संनिपातेऽपि प्रेतकृत्यं कार्यं॥ अंतर्दशाहे जन्म
नाश्चात्स्यान्मरणं यदि॥ प्रेतमुद्दिश्य कर्तव्यं पिंडदानं स्वबंधुभिरिति तत्रैवोक्तं॥ अन्ये नियमाः स्मृत्यं
तरेभ्योऽवगंतव्याः॥ इत्याशौचिनां नियमाः॥ अथैकादशाहे क्रियमाणानां मासिकानां श्राद्धानां वृषोत्सर्गस्य च
निर्णयः॥ सपिंडीकरणेन प्रेतस्य पितृत्वप्राप्तिर्जायते इति॥ ततः प्राक् षोडशश्राद्धप्रतिपादनमाह॥ हरदत्तमिश्रः॥
श्राद्धानि षोडशादत्त्वा न कुर्यात् सपिंडनं॥ श्राद्धानि षोडशापाद्य विदधीत सपिंडतामिति॥ तानि षोडश मासि
कानि धानानीत्युक्तं मिताक्षरायां॥ सपिंडीकरणादर्वाक् वर्द्धिर्यच्छ्राद्धानि षोडश॥ एकोद्दिष्टविधानेन कुर्यात्
सर्वाणि तानि च॥ प्रेतैकोद्दिष्टविधानेनेति विशेषः॥ द्वादश प्रतिमास्यानि आद्यद्वादशाहं त्रिपाक्षिकं॥ ऊनषण्मासि

कंठनाष्टिकं चेति। व्यासः। द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके। श्राद्धानि षोडशैतानि संस्मृतानि म-
नीषिभिः। द्वादशो विहितमूनमासिकं। द्वादशाहेपि किंचिदूनो मासः। गालवः। ऊनषाण्मासिकं षष्ठे मा-
स्यूने ऊनमासिकं। त्रैपाक्षिकं त्रिपक्षे स्यात् नाब्दं द्वादशे तथा। गोभिलः। मरणाद्द्वादशेह्नि स्यान्मासस्यूने
प्यूनमासिकं। क्वचित्तु ऊनषण्मासिकोनाब्दिकेऽरिक्तसंज्ञि श्राद्धे इति॥ एतान्येव षोडशश्राद्धानि। जातू-
कर्ण्यः। द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा। त्रैपाक्षिकेब्दिके चेति श्राद्धान्येतानि षोडश। एकादशाहिकेनाद्येन
सह द्वादश मास्यानि। आद्यशब्देन परः। याज्ञवल्क्यः। मृतेहनि च कर्त्तव्यं प्रतिमासं तु वत्सरं। प्रतिसंवत्सरं चैवमाद्यमेका-
दशेहनि। आद्यं सवैकोद्दिष्टं प्रकृतिभूतमेकादशेहनि। स्मृत्यर्थसारे। प्रतिमासं मृताहे संवत्सरं विहितानि द्वादश। त-
था। द्वादशाहे त्रिपक्षे ऊनषण्मासे ऊनाब्दे चेति चत्वारि एवं षोडश। तत्राद्यमेकादशेह्नि क्रियते। तत्र केचन मृते-
ह्नीति आदिमासिकं। आद्यमेकादशेह्नीत्येकादशेह्नि क्रियतां श्राद्धं तदन्यदेव। प्रेतत्वविमुक्त्यर्थं श्राद्धान्तरं। न तु मासि-
कं। आद्यश्राद्धेपि कर्त्तव्य श्राद्धानामादित्वादुपपद्यते एवेत्युक्तः। तन्न युक्तं। संख्याविरोधात्। द्वादश प्रतिमास्या- १४२
षोडशेति संख्याविरोधात्। किंच। आद्यश्राद्धस्य श्राद्धान्तरत्वे मासिकव्यपदेशो न स्यात्। अस्त्वेवं सः। तस्मात् सुष्ठूक्तमाद्यमे-
कादशेह्नीति। आद्यश्राद्धमेकादशेह्नि कुर्यादित्यर्थः। अपशुचिना कर्म कर्त्तव्यमिति विधानात् दशाहाशौचिनो ब्राह्म-
णस्याद्यं श्राद्धं भवतु एकादशाहे। एवं तु क्षत्रिये द्वादशे विंशति विंशे। त्रिंशाहे त्रिंशत्तु शूद्रे क्रमादिति वचनेभ्यः सूतकात्।

षिकवर्त्तां क्षत्रियादीनामशुचित्वेन कथमाद्यमेकादशाहे संभवति। आद्यमेकादशेह्नीति स्वधाशौचनिवृत्तिकालोपलक्षणमिति वक्तव्यमि-
त्याशंक्यापरिहितवन्तः। पैठीनसिः। एकादशेह्नि क्रियमाणं श्राद्धं तत्सामान्यमुदाहृतं॥ चतुर्णामपि वर्णानां सूतकं तु दर्शयेदिति॥ सूतके
पिंडयादिस्याशयः। अथाशौचापगमे इति। सामान्येनोपक्रम्य एकोद्दिष्टविधायकविरुद्धवचनमपि दशाहाशौचविषयमिति
धरनेन क्षत्रियादीनामाशौचकालनिरूपणपरत्वमिति मितान्तरयां। तथा। आद्यमेकादशेह्नीत्यनेन नाद्योद्देशेनैकादशा-
हः कालत्वेन विधीयते। तत्र न विधौ परः। शब्दार्थद्वैविध्यायेन एकादशाहशब्दस्य सूतकनिरूपणपरत्वं कर्त्तुं न शक्यते इति वक्तुं। एका-
दशेह्नि क्रियमाणं तत्सामान्यमुदाहृतमित्यनेन चैकादशाहकालिकमेवाद्यं चानुवर्ण्य साधारण्येन विहितमाद्यं श्राद्धं। शूद्रो वा-
शुद्धो वापि कुर्यात्। अथैवैकादशाहे दाघाशौचवतः क्षत्रियादेः कथं शुद्धत्वं विप्रस्य कथमशुद्धत्वमिति तत्र प्रदर्श्यते। स्मृ-
तिवचनैः। सर्वेषामेव वर्णानां सूतके मृतके तथा। दशाहाच्छुद्धिरपवाद इति शातातपोब्रवीत्। इत्यंगिरसो वचनात् दशाहपक्षा-
श्रयेण क्षत्रादेः शुद्धत्वं। तथा। ब्राह्मणानां द्वादशेह्नि क्रिया कार्यमिति मिताक्षरोदाहृतं विष्णुवचनं सूतकनिवृत्तौ लिंगं च। तथा विशे-
विशेषेमान रिपूर्वं मृतानां तन्निमित्ताशौचमध्येपि मरणे पितुः शेषेण शुद्धिः स्यात्तदुक्तमिति नान्तरायः। मातुरग्रे प्रमीतायाम-

आशौ

प्रदोम्रियते पिता। पितुः शेषेणाशुद्धिः स्यात् मातुः कुर्यात् सपत्नीं। नित्येवं विधे विषये विज्ञोप्येकादशाहे मूचवान्। एतन्मूलमेव नास्ति
त्वाद्य श्राद्धस्यावश्य कर्त्तव्यतां शंखगौतमाद्या आहतुः। आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि। कर्तुस्तात्कालिकी शुद्धिर
शुद्धः पुनरेव सः। तस्मात्सर्ववर्णैः आद्यश्राद्धमेकादशेह्नि कर्त्तव्यमिति सिद्धं। तस्मादाद्यश्राद्धस्य वृषोत्सर्गस्य वर्त्तमानत्वे वृषोत्सर्ग
इति गरुड पुराणे। अकृत्वा तु वृषोत्सर्गं कुरुते पिंडपातनं। नोपतिष्ठति तद्दत्तं दातुः प्रेतस्य निष्फलं। पिंडपातनमाद्यश्राद्धपिं
डं। तथा। एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः। प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि। तत्रैव। पुत्रे पुत्रविद्यमाने तु नान्यो
वै कारयेद्वृषं। तथा। पुत्रो वा पितापि वापि पौत्रो वा बंधुनस्तथा। योऽऋणस्यार्थमागाच्च मन्ते कुर्याद्वृषोत्सर्गं। सोपि षोडशश्रा
द्धकं क्रियते। अन्यत्षोडशकं मध्ये द्वितीयं तार्प्य मेत्सृणु। ब्रह्मविष्णु विंशिवाद्यं च तथान्यधाद्धपूंचकं। इतिविधिर्विस्तरेव
जितो ज्ञेयः। वृषोत्सर्गविधिः स्वगृह्योक्तेति। अथाद्यश्राद्धविधिः। नवभिर्दिवसैर्दद्यान्नवपिंडान्समाहितः। दशमं १४३
पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेत्। शुचित्ववचनमपरेद्युः क्रियमाणश्राद्धार्थं ब्राह्मण निमंत्रणादि प्राप्त्यर्थमिति मि
ताक्षरायां। प्रत्यहः। प्रेतार्थं स्नातकं तेन तु ब्राह्मणान्भोजयेद्दश। आद्यश्राद्धनिमित्तं तु एकमेकादशेहनि। एकादशेहनि आ

द्यश्राद्धनिमित्तेन प्रेतमुद्दिश्य दशब्राह्मणान् एकं च एवमेकादशब्राह्मणान्भोजयेदित्यर्थः। तथा स्मृत्यंतरे। एकादशे तु विप्रे
षु प्रेतमावाह्य भोजयेत्। तत्राद्याय च शय्यादिदद्यात् आद्य मिति स्मृतं। तेषां मध्ये आद्याय प्रथमं प्रदानात्तत्पादायशय्यादि
देतशय्यादिदद्यात्। आदिशब्दात् वासोहिरण्यदास्युपानह्छत्रदक्षिणादिकं नानामुपसंग्रहः। इत्येवमाद्यं स्मृतं। अत्र विशेषः
आद्यश्राद्धं द्विजोग्नौ वा कुर्यात् पुनरपि द्विजे। आद्यश्राद्धं द्विजे कुर्यात् द्विजमाहवनीयकं। तत्वा कुर्यात्। अग्नौ वा आद्यं कुर्यात्
अग्नौ प्रेतमुद्दिश्य जुहुयादित्यर्थः। ब्राह्मणं भोजयित्वाग्नौ जुहुयात्। हुत्वा पुनरपि द्विजे। पुनरपि सपिंडीकरणे
इद्धी॥ एवं द्विरावृत्तिः॥ मत्स्य॥ एकादशे ह्नि तथा विप्रानेकादश वृतु रूत्रादें सूतकांते तु भोजयेद्युतो द्विजान्।
द्वितीये ह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेत्॥ स्मृत्यर्थसारे॥ एकादशे ह्नि एकोद्दिश ब्राह्मण भोजनं प्रेतोद्देशेन वाक्या
र्थमित्यादि विधिः॥ गोभिलः॥ ब्राह्मणान्भोजयेदाद्ये होतव्यमनले तथा॥ पुनश्च भोजयाद्द्वितीये द्विरावृत्तिर्भवे
दिति॥ ॥अथाऽनशनादि वैधमरणे॥ विधिनाऽनशनादिमृतानामाद्यश्राद्धं चतुर्थेह्नि कुर्यात्॥ शातातपः॥
वृद्धः शौच क्रियालुप्तः प्रत्याख्यात भिषक्क्रियः॥ आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः॥ तस्य

त्रिरात्रमाशौचं द्वितीयेऽस्थिसंचयः॥ तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत्॥ श्राद्धमेकादशाहि कमा
द्यमेकोद्दिष्टं॥ प्रतकल्पे॥ अशौचं यावदेवस्यात्तावत्पिंडोदकक्रिया॥ त्रिरात्रमाशौचं तत्रादौ
त्रीन् प्रदापयेत्॥ चतुरस्तु द्वितीयेऽह्नि तृतीये त्रींस्तथैव च॥ एकोद्दिष्टं तु वै श्राद्धं चतुर्थेऽहनि कारयेत्॥
अनशनाद्युपक्रम्याग्निपुराणे॥ त्रिरात्रं तत्र चाशौचं द्वितीयेऽस्थिसंचयः॥ स्नाये तूदकं कार्यं चतुर्थे श्राद्ध
माचरेत्॥ एभिर्वचनैः ... सामान्यविशेषन्यायेन चैकादशाहविहितमाद्यमेकोद्दिष्टं श्राद्धमनशनादिवैध
मृतानां चतुर्थेऽह्नि विधीयते। अत एव चाशौचापगमे सामान्येनोपक्रम्य विकल्पनाविहितमेकोद्दिष्टमस्मिन्विषयेऽपुनप
घनो सामान्येनोक्तत्वात्। नाद्यपक्षे तु श्राद्धं तस्य ... सर्गपूर्वकत्वात्तदंतत्यायेन ... सर्गमपकर्षति। न दंतत्यायेन वा
अग्राह्येऽपशौचप्रतिनिविरासादनोत्तरकाले प्रयाजानुष्ठानमाद्यो अपकर्षः तिष्ठंत्वपश्चं प्रयजंतीति। अथवाऽस्त्वस्य द्वा १४४
दशाहापकर्षे आनंदधाह्निकयोः कर्मणोरपकर्षस्तद्वदिति। एवं सकलमेकादशाहविहितं कर्म चतुर्थेऽह्नि कुर्यादिति सि
द्धं। द्वितीयेऽह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेदिति मत्स्यपुराणवचनमत्राप्यनुसंधेयं। यत्तु शंखवचनं सद्यः शौचं दातव्यं ...

...मादिक्रियामंत्रैः। अबुद्धिकाले गर्भाधानं ... मासि ... सामंतोन्नयनमिति शांखायनः। एते केचन संस्कार कर्मत्वात् ...
निगमोदेवलः। सत्त्वशंसंस्कृतानां ... संस्कृतेति। गर्भे ... कुमारेजातकर्मनामकर्मादि कुमारस्येति। तत्र। ऊ नोवापधि
कोवापि यः स्वशाखोक्तविधिः। नेयसं ... स्वशाखोक्तं यद्यजनंत ... कर्म कुर्यात्। मनुः। आर्षधर्मो
पदेशं च वेदशास्त्रविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः। इति याज्ञवल्क्यः। आहिताग्निर्यथान्यायं ...त्रिभिरग्निभिः।
अनाहिताग्निरेकेन लौकिकेनापरो जनः। अपरोऽनाहिताग्निरग्निरहितः। अनाहिताग्निकोनाहिताग्निरिति। मार्कंडेयः। आहिताग्निर्द्विजो यस्य
विधानेऽग्नि चतुष्टयं। सोपवास ... शुक्लपक्षस्य फाल्गुने। इत्याहिताग्नेर्जन्म ... द्विजधर्मोत्तरे। चत्वार ... आहिता
ग्नेः सवासुदेवः कपिलश्च ... यः समये ब्राह्मणमाहिताग्निं देवस्य ... आहिताग्निरग्निहोत्री। तैत्तिरीयः। सोऽग्नि
चतुष्टयसहितः। अनाहिताग्निरावसथ्य ... एतेनैव धर्मेणाहिताग्निं ... अनाहिताग्निः ... इत्यादिस्मृतिभिरे
कादिनामाहिताग्निदि ... वितानोऽग्नीनां विस्तारः। तत्र ... निरग्नेः मृतकं मरणमिति ... नतत्र वचनानि
संहितानि। इदानीमाहितानामनाहितानां विषयो निर्णीयते। अंगिरा। अनाहिताग्निमनठ कोनेः साम्नेः संस्कारकर्मणि। आदिः संवत्सरं दा
हान्मंतेऽस्य ... पैठीनसिः। अनग्निमतेऽकांते राशौचं हि द्विजातिषु। तदहदग्निमनो विधादि देशकालिमनेतसति। अत्र साग्नि
रग्निमान्। अग्निमान् शाद्वस्य ... मुख्यगौणा वृत्या। गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययइति। ... स्याए १०५
कानिमानावसथिको गौणः। न यस्य विरोधवचनं नास्ति तत्रास्तु नवैय वाचकः। श्राद्धाग्रा ... साग्निकइत्या
दो। यत्र विरोधवचनसद्भावः। मरणात्सूतकं ... इत्यादिकः। तत्र विरुद्धानि कार्याणि। नकल्प्यंत इति निर्णयनिश्च
यान ... मुख्यार्थो ... निमित्त ...
... ताग्नेरुक्तो नेः शुद्धिः। साग्नेर्वह्निमतश्चाहिताग्नेः संस्कार कर्मणोदाहात् शुद्धिः। इतरस्यासाग्नेः शवस्य

द्वयोः प्रवर्त्तकत्वेनेति र्णये निश्चयो न जनयेत्॥ इत्यंगिरसो निप्रायं बुधा विज्ञानेश्वरेण स्वग्रंथे मिताक्षरादौ एतद्वच
नाभिधानात् पूर्वमाहिताग्नेः संस्कारदिवसप्रभृतिसूतकं। अनाहिताग्नेर्मरणात् सूतकमित्युपक्रांतं। संचयनं चानयोर्दाह
हावा स्मृत्यर्थसार विश्वादर्श शौचदशक कालादर्श चंडुनिबंध पारिजात निर्णयामृतादि निबंधकृद्भिरिदमेव नि
र्णीतं। यथा विज्ञानेश्वरेण। स्मृत्यर्थसारे। आहिताग्नेः प्रेतकार्यं मृताहः श्राद्धं दहनादि कार्यं त्रिपक्षांतं। त्रित्रिदिने स्व
नः पक्षः त्रिपक्षः। त्रिपक्षादूर्ध्वं यत् श्राद्धं तन्मरणदिवस एवेत्यर्थः॥ अनाहिताग्नेर्मरणाहादि प्रेतकार्यं मृताहः श्रा
द्धं चायं शगृह्यस्मृतिवचनं। य एवाहिताग्नेर्धर्मः स एवौपासनिकस्येति। एवं शब्दः प्रकारसूचनार्थः। येन प्रकारेणाध ध
हिताग्नेर्दर्शपूर्णमासव्रतापि यतादेर्धर्मस्तेनैवौपासनिकस्येति। अत्र च धर्मग्रहणान् जीवदवस्था सूचिता। यतः धि दिं
र्माधर्मौ प्रकृते यावज्जीवति मानवः। परलोकगते जंतुर्नु केमुक्तं दुःकृते कृती। तत्रापि वैश्वानर्यादौ च आहिताग्नेः पुरो
डाशस्त्वनाहिताग्नेश्चरवः इति तयोर्जन्तो धर्मः तर्हि मृते किमु वक्तव्यमिति ऊर्ध्वं। दशके तु आहिताग्नेः पुनः संस्कारदेशा
हं। अनाहिताग्नेस्त्रिरात्रमिति। वसिष्ठः। अपाशौचं माघ श्राद्धं चाहिताग्नेः मरणदिनादारभ्य कुर्यादाहिताग्नेर्दहनमा
रभ्य कुर्यात् शरदः। मरणादेव कर्तव्यं संयोगो यस्य नाग्निभिः। दाहादूर्ध्वं तु कर्तव्यं यस्य वैतानिको विधिः॥ मिताक्षरायां। आ
शौचमाहिताग्नेरुपरमे संस्कारदिवसप्रभृति कार्यं। अनाहिताग्नेर्मरणदिवसप्रभृति। संचयनं तूभयोरपि संस्का
रदिवसप्रभृतीति॥ अंगिराः॥ अनग्निमत उत्क्रांतेः साग्नेः संस्कारकर्मणः॥ शुद्धिः संचयनं ॥ नंदाद्वादशमृता २४
हस्तु यथातिथिः॥ साग्निराहिताग्निः॥ स्मृत्यर्थसारे॥ अनाहिताग्नेर्मरणाहादि प्रेतकार्यं मृताहः श्राद्धं च॥ चंडुनि
बंधे॥ एकाग्नियुक्तानामुत्क्रांतिदिवसे एवानग्नेरिव कर्तव्यानीति॥ विश्वादर्शे॥ साग्नेर्दाहादितरस्य प्रयाणादिरेवेति॥
चंडुस्मृतौ॥ मृताहस्तु कर्तव्यमग्निहीनस्तु यो द्विजः॥ संस्कारादेव विज्ञेयो यस्य वैतानिको विधिरिति॥ मासिके वि

मृताहे

शेषः॥ त्रिपक्षात् पूर्वतः साग्नेर्नविद्यं संस्कारवासरे॥ ऊर्ध्वं मृतदिनोनग्नेः सर्वाण्येव मृताहतः। मृताहेन तु नासंसम्य
र्वेतसिद्धा॥ साग्नेराहिताग्नेस्त्रिपक्षात् पूर्वतः पूर्वत्र कर्तव्यं मासिकं मासिकं संस्कारवासरे दाहवासरे
भवेत्। इतराणि मृतत्॥ साग्नेराहिताग्नेस्त्रिपक्षात् पूर्वतः पूर्वत्र कर्तव्यं मासिकं मासिकं संस्कारवा
सरे दाहवासरे भवेत्॥ इतराणि मृताहदिने भवेयुरिति कालादर्शे॥ जातूकर्ण्यः॥ ऊर्ध्वं त्रिपक्षाद्य
च्छ्राद्धं मृताहन्येव तद्भवेत्॥ अधस्तु कारयेद्दाहात् आहिताग्नेर्द्विजन्मनः॥ एवं स्मृत्यर्थसारे॥ आहि
ताग्नेः प्रेतकार्यं मृताहः श्राद्धं दाहादि कार्यं त्रिपक्षांतं॥ तस्मादूर्ध्वं श्राद्धं मृताह एव॥ इति साग्निका
शौचश्राद्धनिर्णयः॥ अथ द्वादशाहादौ सपिंडीकरणे कृते सति षोडशश्राद्धानां विधानं प्रदर्श्यते॥ श्रा
द्धानि षोडशाकृत्वा नैव कुर्यात् सपिंडनमिति॥ गोभिलः॥ सपिंडनं द्वादशाहे कार्यमिति॥ व्याघ्रः॥ आनं
त्यात् कुलधर्माणां पुंसां चैवायुषः क्षयात्॥ अस्थिते च शरीरस्य द्वादशाहः प्रशस्यते॥ पैठीनसिः॥ सपिं
डीकरणं दर्वाक् कुर्याच्छ्राद्धानि षोडश॥ एकोद्दिष्टविधानेन कुर्यात् सर्वाणि तानि तु॥ गालवः॥ अर्वाक्

संवत्सरं प्रेतस्य सपिंडीकरणं षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतमः। पुनः स्वे स्वे काले कुर्यादिवं द्विरावृत्तिः। हारीतः। प्रेतसंस्कारका पूर्व
णियानि श्राद्धानि षोडश। यथाकालं तु कार्याणि नान्यथा मुच्यते नरः। प्रकृष्टेन इतो प्रेतो मृतस्तस्या संस्कारकाणि। अंगी
राः। यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं। मासिकं चोदकुंभं च देयं तस्यापि वत्सरं। मिताक्षरायां। सपिंडीकरणादू
र्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्यात् तथा कुर्यात् सतान्यपि। कात्यायनः। सपिंडीकरणादूर्ध्वं न दद्यात् प्र
तिमासिकं। एकोद्दिष्टविधानेन दद्यादित्याह शौनकः। इति पार्वणविषयः निषेधः। इत्यादिभिर्वचनैः सपिंडीकरणो
र्ध्वं अनुमासिकानां कर्त्तव्यता प्रतिपादिता। एतानि मासिकानि सपिंडीकरणात् पूर्वं अपकृष्यन्ते तान्यपि वृद्धिश्राद्धे उ
पस्थिते पुनरुपकृष्य क्रियंते इत्युक्तं तत्स्मर्यते। शाट्यायनिः। सपिंडीकरणादर्वाग् अपकृष्य कृतान्यपि। पुनरप्युपकृष्यंते
वृद्ध्युत्तरनिषेधनात्। निषेधः कात्यायनेनोक्तः। निमित्ते वृद्धितंत्रे तु मासिकानि न तंत्रयेत्। अयातयाममरणं न भ
वेत् पुनरस्य तु। अयातयामं न वा। शाट्यायनः। प्रेतश्राद्धानि शिष्टानि सपिंडीकरणं तथा। अपकृष्यापि कुर्वीत कर्त्ता नांदी
मुखं द्विजः। तथा। अंतरे चैव यो वृद्धिं प्रेतश्राद्धानि कर्षति। स श्राद्धी नरके घोरे पितृभिः सह मज्जति। अतः सपिंडीकरणो
र्ध्वं अनुमासिकमासिकानामपकर्षः कथमिति चेत् उच्यते। शाट्यायनिः। सपिंडीकरणादर्वाक् निवृत्ते वृद्धितंत्रे तु। त
था। प्रेतश्राद्धानि शिष्टानि इति यानि वचनानि। तत्र कात्यायनीयवचने मासिकानीत्युक्तं नानुमासिकानीति। तत्र स १४७
सपिंडीकरणात् पश्चादनुष्ठेयानि अनुमासिकानीति। तत्रस्तेषां नानुमासिकानां निषेधः। उत्तरवचनमपि प्रेत
श्राद्धानामेवापकर्षमाह। तस्माच्छाट्यायनिवचनं यथाकालकरणासंभवे पुनरपकर्षविधायकं। संभवे तु नापकर्षः।

अत एव गरुडपुराणे। अर्वाक् अब्दात् करणस्य तार्क्ष्य सपिंडनं यः प्रकरोति पुत्रः। तथापि मासं प्रति पिंडमेकमन्नं
सकुंभं सतिलं च दद्यात्। इति वृद्ध्युत्तरमप्यनुमासिकान्याह। तस्मान्नापकर्ष इति सिद्धं। अथोनमासिके वि
शेषः। तानि चत्वारि। ऊनमासिकं। त्रैपक्षिकं। ऊनषाण्मासिकं। ऊनाब्दिकं चेति। मरणाद्द्वादशाहे स्यान्मा
स्यूने तून मासिकं। त्रैपाक्षिकं त्ववेद्धत्ते त्रिपक्षे तदनंतरमिति त्रिविष्टपुराणोक्तं। प्रवृत्ते प्रवृत्ते। गरुडपुराणे
न्यूनषाण्मासिकं कार्यं पंचभिः सार्धमासिके। ऊनाब्दं द्वादशे तथेति गालवः।
उक्तो यं पक्षः सर्वसंमतः। अथवा ऊनशब्दश्रावणात् कियता ऊनेनेत्याह। गोभिलः। त्रि
त्रिर्वा दिवसैरूनमेकेन द्वितयेन वा। आद्यादिषु च मासेषु कुर्यात् नाब्दिकं द्विजः। पक्षां
तरमाह गोभिलः। एकद्वित्रिदिनैरूनं त्रिभागेनोनमेव वा। श्राद्धान्यूनाब्दिकादीनि
कुर्यादित्याह गौतमः। तृतीयो भागस्त्रिभागस्तेन ऊनः। विंशतिदिनेषु गतेषु कुर्यादित्यर्थः।
अथवा। मासिकान्यपि वान्यानि [illegible] अष्टा [illegible] विंशतिमे दिने। अन्यानि ऊनमासिक

कानि॥ कार्ष्णाजिनिः न्यूनान्यूनेषु मासेषु विषमाहेषु तानि वै॥ त्रैपक्षिकं त्रिपक्षे स्यान्मृताहे षष्ठितरा
तु॥ तथा मासिकानि आशौचाद्यंतरितानि उत्तरे मासि कुर्यात्॥ तदाह ऋष्यशृंगः॥ एकोद्दिष्टं तु सं
प्राप्ते यदि विघ्नः प्रजायते॥ मासेन्यस्मिन्नु तिथौ तस्यां कुर्यादंतरितं च यत्॥ आशौचाद्यंतावेवा कु
र्यात्॥ अत्र विशेषः॥ त्रिपुष्करे च नंदासु दर्शे भार्गववासरे॥ चतुर्दश्यां न कुर्वीत अत्र नानि त्रीणि व
क्षित्रे॥ द्वितीया सप्तमी द्वादशीनां नंदा तिथीनां॥ पुनर्वसू उत्तराफाल्गुनी विशाखोत्तराषाढा पूर्वानि
क्षत्राणां॥ भानुभौमशनैश्चरवाराणां च मेलने त्रिपुष्करमिति॥ कात्यायनोदर्शे॥ शेरवं सुगमं॥ गार्गि
रपि॥ नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे॥ न्यूनानी उ न कुर्वीत गृही पुत्रधनक्षयात्॥ त्रिपु
ष्करशब्दो द्विपुष्करमपि लक्षयति॥ द्वयोर्मेलने द्विपुष्करः॥ गुरुवारमेलने त्रिपुष्करयोगः॥ रत्नमा ॥१२८॥
लायां विषमचरणं धिष्ण्यं भद्रातिथिर्यदि जायते॥ सुरगुरुरविभौमपुत्राणां कंथं च न वासरे॥
मुनिभिरुदितः सोयं योगस्त्रिपुष्करसंज्ञकः॥ मृततिथावागतो यं योगो न दोषमावहति॥

तत्र श्राद्धं कुर्यात्॥ इति मासिकनिर्णयः॥ अथ संवत्सरमध्ये पतिते मलिम्लुचे एकं मासिकं
कृत्वा द्वितीये मासि शुद्धे अन्यदाधिकं कुर्यात्॥ तदाह वसिष्ठः॥ श्राद्धीयाहनि संप्राप्ते अधिमासो
भवेद्यदि॥ श्राद्धद्वयं प्रकुर्वीत एवं कुर्वन्न मुह्यति॥ श्राद्धद्वयमिति प्रेतश्राद्धद्वयं अधिमासोत्तरमास
योरिति वेदितव्यं॥ विशेषो मलमासप्रकरण एव वक्ष्यते॥ कृते च लल्लद्विवेदेन ग्रंथे निर्णयदीपके॥
उक्तोतितः समारभ्य मासिकोतकनिर्णयः॥ ॥अथ सहगमनप्रशंसावाक्यदर्शनपूर्वकं तदूर्ध्व
दैहिकविषयो निर्णयः॥ तत्र मनुः॥ आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा॥ मृते म्रियेत या नारी
सा स्त्री ज्ञेया पतिव्रता॥ हारीतः॥ मृते भर्त्तरि या नारी समारोहेद्धुताशनं॥ सारुंधती समाचारा स्वर्गलोके
महीयते॥ तथा॥ तथा॥ ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः॥ पुनात्यविधवा नारी तमादाय
मृता तु या॥ अंगिराः॥ व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्॥ तद्वदुद्धृत्य सा नारी तेनैव सह मो
दते॥ प्रेतकौल्ये॥ अग्निर्दहति गात्राणि आत्मानं नैव पीडयेत्॥ दह्यते ध्मायमानानां धातूनां च

यथा मलः॥ तथा नारी दहेद्देहं हुताशे ह्यमृतोपमे। दिव्यादौ दिव्यदेहस्तु शुद्धो भवति यः पु
मान्॥ तथा सा पतिसंयुक्ता दह्यते न कदाचन॥ शंखः॥ दिव्यवर्षप्रमाणेन तिस्रः कोट्योऽर्द्ध
कोटयः। तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति॥ मृते भर्तरि या नारी पतिं समनुगच्छति। सा सा
ऽरुंधतीसमाचारा स्वर्गलोके महीयते। तथा। लक्ष्मीं सुतान्परित्यज्य मातापित्रोस्तथैव च॥ मृतं
पतिमनुव्रज्य सा चिरं सुखमाप्नुयात्॥ इत्यादि पुराणादिषु प्रशंसा श्रूयते॥ तदकरणे प्रत्यवा
यमपि॥ एवं कृते नारी धर्मोऽथ पतिसंगमं। प्रतिजन्म निष्ठुरवाग्दुर्भगा चाप्रियवादिनी॥ वल्गुली गृहगोधा वा गोधा वा द्वि
मुखा भवेत्॥ अनेन इदं सहगमनं मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वेति विकल्पेन मपि सर्वजातिस्त्रीणां पतिव्रतानां प्रश
स्तमाम्नातं न शूद्रस्य सर्वपापक्षयदं मोक्षदं चेति। स्मृत्यर्थसारेऽपि। प्रशस्तत्वाद्दृष्टं यमेव या सर्वसाधारणोऽयं धर्मः आ चंडालं १५९
यावत्। स्मृत्यर्थसारे तु विशेषः। तथान्वारोहणं गर्भिण्यां निषिद्धं। ब्राह्मण्या गर्भिण्या ब्रह्मसत्यासमं। क्षत्रियादिना तित्रिग
र्भिण्या क्षत्रजातीनीवध एवेत्युक्तं। विष्णुना पत्यन्वारोहणं प्रशस्तं। पुत्रपौत्रादिकं त्यक्त्वा स्वपतिं याधिरोहति। स्वर्गं जये

तां चोभौ तौ कुले स्त्रियं निरजं तनौ। हत्वा पापान्यनेकानि निर्जरत्वो हमति स्तुतसा। प्रक्षालयति सर्वाणि या स्वं पतिमनुव्रजेत्। अस्यान्वारो
हणस्य सर्वस्त्रीसाधारणेऽपि यद्ब्राह्मण्या निषेधवचनं। सहानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्। यास्त्री ब्राह्मणजातीया मृ
तं पतिमनुव्रजेत्। सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्। तदिदं पृथक्चित्यान्वारोहणे निषेधपरं। उशनाः। पृथक्चितिं समा
रुह्य न विप्रा गंतुमर्हति। अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृतः। एतदेवोक्तं स्मृत्यर्थसारे। सवर्णायाः पत्या सह एकचिता
रोहणमेव न पृथक्चित्यारोहणं कार्यं। पादिज्ञाते तु ब्राह्मण्याः अपि पृथक्चित्यारोहणमुक्तं। यथा। देशांतरमृते पत्यौ ब्राह्म
ण्या न दहिते भिः। नवेदसहानुगमनमन्यासां पादुकादिभिः। पादुकावस्त्रादिना मशरीरगं त्वेपितद्भूतत्वेपिन तुल्यत्वात्। त
था। स्मृत्यर्थसारे। क्षत्रियादिस्त्रिया भर्तृदेशांतरमरणे पृथक्चित्यारोहणं कार्यं। असवर्णायाः पृथक्चित्यारोहणमेव। आगरुड
पुराणे। दूरस्था पि च या नारी मृतं श्रुत्वा तथा पतिं। शनैस्स्वयं वनं गत्वा प्रतीक्ष्य चादिश्याद्युक्तं। ततः संपिंडमात्राय प्रविशेच्च हुताश
नं। तस्याश्च न तु णाका यद्वृद्धोत्सर्गादिका क्रिया। अंतराले मृतेने तस्मिन्नूनोष्येक दत्वमागतः। इति। तथा। यास्त्री सवर्णा सं श्रद्धा मृ
तं पतिमनुव्रजेत्। सा मृता स्वर्गमाप्नोति वर्षाणां सर्वसंख्यया। तिस्रः कोट्यर्द्धकोटिं च प्राकृ। संश्रद्धेति वचनात् रजोदोषदुष्टा

चतुर्थेऽह्नि कुर्यात्। तदुक्तं छन्दोगकल्पे। कृताशौचासमाप्तौ चतुर्थेऽह्नि पतिव्रता। तस्याश्चतुर्दिने कार्यं वृषोत्सर्गादिसूतौ चतुर्था
धान्यान दर्शकृतायाः पत्न्याश्चाप्यविधं दैवमरणे ससंकल्पेन सहगमनाय तावद्भर्तृमरणदिनप्रभृत्येव परिगणय्य तया पिंडदाना
दि कुर्यात्। यस्मिन्वा कश्चेद्भर्तृस्थापितचितायां नारायाः अपि च। द्वादशाहातिक्रमादन्वारोहणे विशेषं वक्ष्यामः। अथ पतिनिर्णयः। मृते भ
र्तरि या नारी आज्ञयैव परित्यजेत्। न ... सहमनस्याः अग्निं दद्यात्सपिंडनां। अग्निं चितानामिं। अनेन ... कल्पोक्तेन व
चनेनाग्निं सपिंडनयोर्भर्त्रा सहैक्याभिधानात् सपिंडनात्पूर्वं विहितानां दशाहपिंडादिश्राद्धानामप्येकशं कर्तव्यताम् अन्वा
रोहणेन स्त्रियां मरणे सति तानि पृथगिति तत्रैवोक्तं। पतिपत्न्योः सहैकत्वं कृताशौचाधिरोहति। पुत्रेणैव पृथक् श्राद्धं स। पि
डं पतिना सह। एकत्वं तु सपिंडनांतु दुत्तरत्रवेदितव्यं। ततः सपिंडनात्पूर्वं विहितस्यैकोद्दिष्टस्य पृथगभिधानात् पृथक् श्रा
द्धमित्येकवचनमविवक्षितं। अहं समाप्तीतिवत्। दर्शनान्नर्धयुः प्रातः सवने ग्रहान्गृह्णातीति दर्शनात्। नवदत्तादि। १५०
तदुपक्रम्य ... कल्पे। एकपाकं प्रकुर्वीत पिंडान्दद्यात्पृथक् पृथक्। एकादशाहं वृषोत्सर्गं पृथक् श्राद्धानि षोडश। घटादिपददा
नानि दिमहादानानि यानि च। वर्षं यावत्पृथक् कुर्याद्भृहिरेवं भवेत्तयोः। स्मृत्यर्थसारे। अन्वारोहणं करिष्यामीति संक

ल्प पतिं नमस्कृत्य चितामारुह्य सर्वप्रयोगं कारयेत्। यद्वा सर्वप्रयोगं तेन दह्यमाने भर्तरि तत्र त्वाग्निं प्रविशेदित्युपक्रम्य
दशाहदिनेषु पिंडश्राद्धादौ पाकैक्यैककर्तृकैक्यं चेति चोक्तं। पिंडैक्यमिति नोक्तं। सर्वत्र पिंडादिदाने योग्यः पुत्रो दद्यात्। तथा चिता
... नारा मोहाद्वा विप्रश्च जितात्प्राजापत्यं चरेदिति चोक्तं। एवमन्वारोहणे सपिंडीकरणपर्यंतं सर्वं पृथगेवेति सिद्धं। सपिं
डनमपि पत्न्याः सपिंडनं कृत्वा तेन सह सपिंडनं कुर्यात्। मृते या नु मृता नाथं सा तेन सह पिंडनं। अहनि स्वर्गवासं च या व्र
जेत् संज्ञकं। पत्न्याश्चैकैकं तर्यसं सपिंडीकरणं स्त्रियाः। इत्यस्मिन्विषये प्रेतकल्पोक्तत्वात्। अथान्वारोहणे विषये अत्याद्यौ
श्राद्धे द्वावपि समस्येको देयः। पिंड इति लौगाक्षिणोक्तं। मृताहनि समासेन पिंडनिर्वपणं पृथक्। नवश्राद्धं च दंपत्योः अ
न्वारोहणे एव च। मृताहनि द्वयोर्दंपत्योरुद्दिश्चैव समासतः। एक एव पिंडो दातव्यः। यथा। अमुकगोत्रौ अमुकदेव देवि
अमुकशर्माणौ वन्ने ... एतद्वां पिंड इत्येवमूहनीयं। नवश्राद्धं पृथगितिवचनः। एतदन्वारोहण एव
नवाना। अत्र मृताहग्रहणं सपिंडीकरणोपलक्षणं। नवश्राद्धग्रहणं सपिंडीकरणांतोपलक्षणं। अन्यथा मृताहनीति परिसं
ख्यायां सर्वत्र पृथक्त्वापत्तिरिति सुस्थ स्यात्। तथा द्वयोः समासेन पिंडनिर्वपणं तथा ... नामप्येकचितारूढानां स्व

र्णीनां द्विव्याद्युद्देशेन द्विपितृकश्राद्धवदेक एव पिंडो देयः॥ सपिंडीकरणोत्तरमिति पूर्ववत्॥ तथा
गोत्रां अमुकी देवि दा अमुकदेवि दा अमुकशर्मणः अवने निग्ध्वं पेयुष्मान त्रानुवः पिंड एवं योजनीयं
यो॥ यत्तु केचित्॥ मृताहनि समासेन पिंडनिर्वपणं पृथक्॥ नवश्राद्धं तु दंपत्योरन्वारोहण एवेति
लौगाक्षिवचनं अन्वारोहणे न स्त्रिया मरणे सति नवश्राद्धं पृथक्॥ तद्व्यतिरिक्तदशाहादीनां
मृताहवत् समासेन पिंडनिर्वपणमित्यभिप्रायेण व्याख्यातं यत्रात्र लिखितं॥ अत्र मृताहनीति विशे
षोपादानात् निषिद्धे देवे पृथगेव श्राद्धं कुर्यान्न समासेनेवगम्यते। किंच। मृताहनि समासेन कुर्यादिति वि
शेषाभिधानादेव सांवत्सरिकव्यतिरिक्तनवश्राद्धषोडशश्राद्धसपिंडीकरणगयाष्टकादिश्राद्धेषु वचनांतरै
श्च पृथग्विहितेषु पृथक्कर्तव्यतायां प्राप्तायां नवश्राद्धं पृथगिति परिसंख्यया नवश्राद्धस्यैव पृथगभिधानात्। १५२
नवश्राद्धव्यतिरिक्ते षोडशश्राद्धादिषु सांवत्सरिकवदेव समासेनैव विधानमिति निरूपितं। एतदयुक्तं। पत्य
न्वारोहेणे मृतानां सर्वेषामेकस्मिन् दिने इति विवक्षितं। तदा पत्युरन्वारोहेणे मरणं न। किंतु पूर्वं नैतासंग
पत्यु

तं स्यात्॥ ततः स्त्रीणामन्वारोहणे सति पूर्वं मृतस्य पत्युरहनि दंपत्योरित्येतद्युक्तं॥ अन्वारो
हणे सति समासेन पिंडनिर्वपणमित्युक्तौ तिथिभेदे पि समासः सिध्यति वैपरीत्यं तु कुतः॥
द्वयोर्दंपत्योर्भेदात् श्राद्धद्वयं प्रसक्तं॥ तत्रैव देवतात्वं समस्यते श्राद्धद्वैपं च समस्यते॥ अग्नौ
करणीयोश्च सहोद्देशः सह प्रदानं च। द्विपितृके तु पृथक् निर्देशः सह प्रदानं च॥ एवं देवता
त्वे देयधा समासस्तथा तिथिभेदे पि समासोस्मादेव वचनात्॥ नवश्राद्धं तु प्रेतश्राद्धोपलक्ष
णं॥ सपिंडनांतं॥ यदाह गरुडपुराणे॥ एकपाकं प्रकुर्वीत पिंडान् दद्यात् पृथक् पृथक्॥ ए
कादशं दशोत्सर्गे पृथक् श्राद्धानि षोडश। त्यादिना नवर्द्ध श्राद्धविषयत्वेनैव परिसंख्या शेधिता॥
मृताहनीति सपिंडीकरणोत्तरोपलक्षणं॥ यतः॥ पुत्रेणैव पृथक् श्राद्धं सपिंडं पतिना सहेति॥ स
पिंडनोत्तरं॥ पतिपत्न्योः सहैकत्वं त्रिपुरुषस्थानेषु वै पृथक्॥ कन्यादाने तथा यज्ञे पिंडसंयोजने त
थेति विष्णुवचनेन त्रिष्वेव पृथक्त्वाभिधानात् अन्यत्र समासेन नवश्राद्धतर्पणादिकमिति सि

द्दं॥ तस्मात्सपिंडनात्पूर्वं सर्वं पृथगेवेति निर्णयः॥ ॥अथ भर्तृमरणानंतरं चिरकालव्यव
धानेप्यनुगमनेन मृताया अपि पत्न्या विशेषो निरूप्यते ब्रह्मपुराणे॥ देशांतरमृते पत्यौ सा
धं ध्वी तत्पादुकाद्वयं॥ निधायोरसि संशुद्धा प्रविशेज्जातवेदसं॥ ऋग्वेदवादात्साध्वी स्त्री न भ
वेदात्मघातिनी॥ त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रवत्॥ तस्यास्त्र्यहाशौच धर्मेणौर्ध्वदैहि
कं कुर्यात्॥ शास्त्रवदिति भर्तृसमकालमरणवदेकाहादिकादीनीति॥ यत्तु व्यासवचनं॥ या समा
रोहणं कुर्यात्भर्तुश्चित्यां पतिव्रता॥ मृताहनि तु संप्राप्ते पृथक्पिंडे नियोजयेत्॥ प्रत्यब्दं च नव
श्राद्धं युगपत्तु समाचरेदिति॥ तदिदं मृताहनि पृथक्पिंडश्राद्धविधानं द्विजातीयस्त्रीविषयं॥
भर्तुश्चित्यां भर्तृमृताहनि नियमेयः॥ विजातीयत्वेन एकचित्यारोहणनिषेधनात्॥ अपरजस्वला ॥२५४२॥
या रजोदोषयुक्ता या अपि सहगमनप्रकारः॥ स्मृत्यंतरे॥ यदा स्त्रिया मृदक्यायां पतिः प्राणान्प
रित्यजेत्॥ द्रोणमेकं तंदुलानामवहन्याद्धि शुद्धये॥ द्रोणप्र[illegible]माणं तु॥ पलद्वयं तु प्रसृतं द्विगुणं

पलप्रमाणं टांक ५ मि हूत् कनिष्ठं पैसे भार
पैसे ३॥।

प्रस्था:

कु

कुडवं स्मृतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ चतुर्भिराढकैर्द्रोण इत्येतद्द्रोणलक्षणं॥
मुसलाभिघातैस्तद्दस्य स्रवते योनिमंडलात्॥ विरजस्का मन्यमाना स्वे चिते तद्दुरुत्क्रमं॥ दश
शौचं प्रकुर्वीत पंचमत्रिकयापृथक्॥ त्रिंशद्द्विंशद्दश पंच गावो दत्वा व्यहः क्रमात्॥ विप्रा
णां वचनं लब्ध्वा समारोहे हुताशनं॥ नारीणां सरजस्कानां नियं शुद्धिरुदाहृता॥ सरजस्कापि
तदुक्तप्रायश्चित्तं चरणेन तदैव समारोहणं कुर्यात्॥ अथवा चतुर्थेह्नि रजोनिवृत्तौ शिष्टा
चाराविरुद्धमार्गेण कुर्यादिति॥ तिथौ हुताशं या समारूढा चतुर्थेह्नि पतिव्रता॥ तस्या भ
र्तृदिने कार्यं वृषोत्सर्गादिसूतकमिति॥ तथा॥ अन्वष्टकासु यच्छ्राद्धं यच्छ्राद्धं वृद्धिहेतुकं॥ पि
तुः पृथग्विधातव्यं स्त्रीपुंपिंडे सपिंडने इति गारुडात्॥ इति सहगमननिर्णयः॥ अथैकस्मि
न्नहनि पितृपुत्रादीनां मरणे दहनादौ विशेषः स्मृत्यर्थसारात्॥ पितापुत्रयोः सवर्णयोः
समानधर्मयोः कपालाग्निनादाह्ययोः दाहः सहैव उदकादिकं पितृपूर्वं पृथगेव॥ तथा

न्नर्दणां सवर्णानां समानधर्मिणां कपालाग्निदाह्यानां सह वा दाहः। उदकपिंडादिकं ज्येष्ठपूर्वं
पृथगेव। तथा युवबालानां स्त्रीबालानां निखनने चैवं। भिन्नजातीयानां भ्रातॄणां पिता पुत्राणां
सपत्नीनां च दहनादि सर्वं पृथगेव तथा तत्रैव। स्त्रीपुरुषमरणे एकस्मिन्नहनि दहनकाले
प्राप्ते सवर्णानां समानधर्मिणां पत्न्या सह दहनं कृत्वा उदकपिंडादिकं पतिपूर्वं पृथक् कार्यं।
सपिंडनं तु पत्युः पूर्वं कृत्वा पत्न्या सह सापिंड्यं कार्यं। तथा। एकचित्यां समारूढौ दंपती निधनं गतौ
तौ। पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथक्। निधनं गतौ नान्वारोहणमार्गेण मृतावित्याशयः
ओदनं च पृथगिति नवश्राद्धादि पृथगर्थं मन्त्रमोदनं तत्पृथगिति कुत्रचिदुक्तं। प्रेतकल्पेऽस्योत्तरार्द्धे तु एकपाके
प्रकुर्वीत पिंडान् दद्यात् पृथक् पृथगिति। तथा। पाकैकत्वेन प्रतिस्वाणं ममैषां तु विगर्हितमिति चेत्। तत्रैकपाकेन नि १५३
त्यपाकेन वेति शिष्टाचारः प्रमाणं। यच्चोक्तं चन्द्रिकायां सहदाहविषये अन्वारोहणे समानधर्मत्वं शंकितं
तदयुक्तं। तत्र मृतानां निहदयोर्दंपत्योः समासेन पिंडनिर्वपणमुक्तं गोभिलादिवचनेन। अन्वारोहणे समयेति

तेदेपि भर्तुर्मृतानंतरमेव श्राद्धिकमिति निरूपितं प्राक्। अत्र न बुद्धिस्सर्वमन्वारोहणे धर्मकं सहदहनं किंतु काकतालीयेन प्राप्तं। तस्मादत्र सो
हदहने निषिद्धे देयमते देपि प्रत्यारिकुं पृथक् पृथगिति नान्वारोहणे समानधर्मकमिति। तथा। पत्न्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रि
याः। तथा ज्वलादि त्रिभिस्त्रिभिः कार्यं सपिंडीकरणं स्त्रियाः। तथा पितामह्या समं मातुः पितुः सह पितामहैः। सपिंडीकरणं कार्यमिति तात्पर्य
मतं ममेत्यादिवाक्यैर्विकल्पेन पत्न्या सह सापिंड्यं यापि मृतानां निसमासेन पिंडनिर्वपणमिति नाशंकनीयं। सहगमनबुद्ध्यान्वा
रणाभावात्। किंच मातुः पूर्वमरणे सामिति सहदहने न चाकिंचित्कत्वं। अतो पि पृथक् पृथगाश्राद्धिकमिति न पिंडादौ समासो इति
संघातमरणे निर्णयः। ।अथ सूतिकायां वा रजस्वलायां वा मृतिर्भवति तदा शुद्धिं कृत्वा दाहादिसंस्कारं कुर्यात्। शुद्धिप्रकारश्चो
क्तो मिताक्षरायां। सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं ततः क्षिपेत्। पुण्यर्भिरभिमंत्र्यापो वा
चा शुद्धिं लभेत्ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि। तथा। शुद्धिं गत्वापोमंत्रियान्विर्वमि देव्यानिरेव च। अन्यैश्चवारुणैर्मं
त्रैः स्नाप्य विधिवद्दहेदिति स्मृत्यर्थसारे। वाचा शास्त्रं नवचनेन। तस्य प्रायश्चित्तरूपत्वात्। प्रायश्चित्तं तु त्रिदिनादर्वाक् त्र्यहं
ऊर्ध्वं षड्दिनाद्वाग वा द्व्यहं। तदूर्ध्वमेकाहं। तदुक्तं गोविंदराजेन स्मृत्यंतरात्। सूतिकायाः प्रसाधु विरल्लानां मरणे गतां। त्रि

दशाहस्साधारणं द्वितीयं वा कार्यं। प्रसूतिका यदा नारी अस्नात्वा प्रेततां गता। अष्टकृच्छ्रेण शुद्धिः स्याद्वसिष्ठवचनं यथा॥

णदूनदशदिनादर्वाक् त्रिषष्टिकृच्छ्रेण शुध्यतीति। नत्र वचनानि। सूतिकाले यदा साध्वी विशुद्धा नामरणं गता। त्रिवर्षपरिपर्यन्तं कृच्छ्
षेणकृच्छ्रेण सर्वदा। प्राजापत्य १० एतत्प्रथमत्र्यहविषये। तथा। प्रसूतिका यदा नारी रजसा च परिप्लुता। म्रियते तु च या
नारी द्विवर्षं कृच्छ्रमाचरेत्। प्राजापत्य २० एतच्च पूर्वत्र्यहादूर्ध्वं षड्दिनविषयं। तथा। सूतिकाले यदा साध्वी अस्ना
ता प्रेततां गता। अष्टकृच्छ्रेण शुध्येत व्यासस्य वचनं यथा। प्रा० ३० एतद्दशदिनोर्ध्वं दशाहपर्यन्तं तथा दशाहादूर्ध्वं। प्र
सूतिका यदा नारी प्राणैश्चैव परित्यजेत्। मासमेकावधिश्चैव रात्रिंशत्कृच्छ्रैर्विशुध्यति। प्रा० ३०। इति सूतिकामरणे निर्ण
यः। रजस्वलायास्तु विशेषः। पञ्चभिः कलशैः सम्यक् पञ्चगव्यं ... स्नापयेत्। वस्त्रान्तरावृतां दहे
त्। तदुक्तं ... । पञ्चभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकं। अत्रापि
ब्राह्मणवचनं कार्यमिति ... । प्रायश्चित्तं तु ... त्रिंशत्कृच्छ्रैर्विशुध्यति प्राजापत्यानि षट्त्रि १५४
शद्... शुद्धिरुक्ता मनीषिभिरिति स्मृत्यर्थसारे। रजस्वलां मृतां प्रक्षाल्य पञ्चगव्यैः स्नापयित्वा वस्त्रान्तरावृतां
दहेत्। ब्राह्मणवचनं न ब्रूते। यद्वा। सूतिकां रजस्वलां च प्रक्षाल्य स्नापयित्वा काष्ठवद्दहेत्। ब्राह्मणवचनं न ब्रूया

अस्त्री निर्विधिना दहेत्। इति रजस्वलामृतौ दाहनिर्णयः॥ ॥अथ गर्भस्रावे विशेषः। चतुर्थे मासि गर्भस्रावे
तदवस्थायां निवृत्तायां दाहार्थं रजस्वलावच्छुद्धिः कार्या। गर्भस्य द्रवरूपत्वेन रजोविकारत्वात्। पञ्चममासि
षष्ठे गर्भपाते सति निवृत्तायां दाहयोग्यतार्थं सूतिकावच्छुद्धिः। गर्भस्य कठिनत्वेन प्रसवविकारत्वात्
पाते सूतकविधानात् प्रसवविकारत्वात्। आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः। तथा। पाते मातु
र्यथामासं पित्रादीनां दिनत्रयमिति। अथ सगर्भामरणे विशेषः। गोविन्दराजनिबन्धे। गुर्विणीमरणे कु
क्षिं भित्त्वा शल्यं समुद्धरेत्। ततः शल्यं पृथक्कृत्वा क्षितौ क्षिपेद्यमुधातजो। तथा। सशल्या या मृता या तु
कुक्षिं भित्त्वा तु समुद्धरेत्। दहने च ततः शल्ये प्रायश्चित्तं समाचरेत्। तथा। यदा गर्भवती नारी सश
ल्या संस्थिता यदि। कुक्षौ भित्त्वा ततः शल्यं निर्हरेद्यदि जीवितं। शल्यं गर्भसंस्थितां मृता। भूमौ तं नि
क्षिपेत्तं तु प्रायश्चित्तं तु ततः परं। त्रयस्त्रिंशत्तु कृच्छ्रस्तु मुच्यते शल्यदोषतः। अथ गर्भदहने तु दाहं
कुर्वतां प्रायश्चित्तमुक्तं स्वायंभुवमनुना। सगर्भादहने तु ... वर्णजं वधपातकं। प्रायश्चित्तं चरित्वा
तु मुच्यन्ति पापकर्मिणः। भ्रूणहत्यापतिश्चैव मुनिः स्वायंभुवोऽब्रवीत्। तथा। अन्तर्गर्भमृते स्त्रीलां ...
... गर्भेण निष्कृतिः। ... त्रिरब्दं तत्कृच्छ्रमाचरेत्। इति सगर्भादाहे प्रायश्चित्तं। दाहनिर्णयः॥

३।प्रा० ५।प्रा०

श्च। अथ निंदितमार्गप्रवृत्तानां पाषंडीप्रभृतीनां दाहादौ विशेषः। पाषंडीप्रभृतीनां पुत्राद्यधिकारिभिर
दितदाहोदकदानादिकं कार्यं। तदाह याज्ञवल्क्यः। पाषंड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादि
काः। सुराप्य आत्मघातिन्यो नाशौचोदकभाजनाः। पाषंडी वेदबाह्यलिंगधारी। अनाश्रिताः
सत्यधिकारे अनाश्रमिणः। कामगाः कुलटाः। आदिग्रहणात् स्वर्गभ्रूणघातिन्यो गृह्यंते।
सुराप्य इति लिंगमविवक्षितं। अनुपादेयगतत्वात्। शेषं सुगमं। आशौचाद्यौर्ध्वदैहिकस्य ते भाजनानि न
भवंति। तेषां दाहादिकार्यमित्येवं परं प्रायश्चित्तं कृत्वा कार्यमिति वक्ष्यति। तथा मरणविशेषाद
प्याशौचमाहांगिराः। चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पाप
कर्मिणां। उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते। नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति। अयं च
दहनादिनिषेधो बुद्धिपूर्वोद्बंधनादिना चंडालादीन् हंतुं गतस्तैर्मारितस्तद्विषयः। अबुद्धिपूर्वं चंडालादि
भ्यो मरणे तु तदैव दाहादिविधानं वक्ष्यते। मनुः। वृथासंकरजातानां प्रव्रज्यासु च तिष्ठतां। आत्म १५५
नस्त्यागिनां चैव निवर्त्तेतोदकक्रिया। आत्मनस्त्यागिनामिति विषोद्बंधनादिभिरविहितमार्गेण
ये आत्मानं आत्मानं व्यापादयंति ते आत्मत्यागिनस्तेषामाशौचं न कर्त्तव्यं। तदुक्तं मिताक्षरायां।

हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां। गोग्रहणं शृंगिदंष्ट्र्याद्युपलक्षणं। विप्र इति कैमुत्येनांत्यजोपलक्ष
णं। आत्मघातिग्रहणं पाषंड्यादिपतितमात्रोपलक्षणं। तेषामन्वक्षमनुगतं सद्यः शौचं न पुनर्दशाहादिकं। एतेषां पाषं
ड्यादीनां शरीरं गंगातोये क्षिपेत्। तथा। आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया। तेषामपि तथा गंगातोये सं
स्थापनं हितमिति स्मरणात्। एतेषां निषिद्धमपि दाहोदकदानादिकं संवत्सरादूर्ध्वमनुज्ञातं षट्त्रिंशन्मते। गो
ब्राह्मणहतानां च पतितानां तथैव च। ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकं। तदपि विष्णुबलिपूर्वकं कुर्यात्। तदु
क्तं याज्ञवल्क्यछागलेयाभ्यां। नारायणबलिः कार्यो लोकगर्हाभियान्नरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः
एतदेतेषां पाषंड्यादीनां कालांतरे दाहोदकदानादिविधानमविज्ञक प्रायश्चित्ती समर्थपुत्राद्यधिकारिविषयं। अप्र
तेषामविज्ञकाः प्रायश्चित्तसमर्थाः पुत्राद्यधिकारिणः संचिते चेत्तदानीमेव कुर्युरिति स्मृत्यर्थसारे। स्पष्टमन्यत्। प्राय
श्चित्तं चांद्रायणद्वयं तप्तकृच्छ्रचतुष्कं च कृत्वा। यद्वा। त्रिंशत्कृच्छ्रान् कृत्वा। यद्वा योग्यं सर्वप्रायश्चित्तं कृत्वा तदेव द
हनाद्यौर्ध्वदैहिकं कुर्युः। एतद्बुद्धिपूर्वं विषादिना मरणविषयं। तदाह गौतमः। प्रायोनाशकशस्त्राग्निविषोदकोद्बं
धनप्रपतनैश्चेच्छतामिति। प्रायो महाप्रस्थानं। प्रपतनं गिरिशृंगादिभ्यः। अत्रेच्छतामिति विशेषणोपादानात् अबु
द्धिपूर्वं विषशस्त्रादिभ्यो मृतानां बलात्कारेण चांडालादिभिर्मारितानां दाहानामेवाशौचादिकं कुर्युरेव दोषो नास्ती
त्युक्तमंगिरसा। अथ कश्चित्प्रमादेन म्रियतेऽग्न्युदकादिभिः। तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया। अस्पृश्या
स्पर्शाद्यवैधमरणनिमित्तं प्रायश्चित्तं कृत्वेति शेषः। प्रायश्चित्तं तु जलाद्यकृतनैश्च वा विषशस्त्रादिहताश्चैव। एषु षट्

श्रीगणेशाय नमः

मुनिमित्तेषु त्रिंशत्कृच्छ्रं विशोधनमिति गोविंदराजात्। स्मृत्यर्थसारे तु चंडालगोब्राह्मणपशुदंष्ट्रिसर्पाग्न्युदकादि
भिः प्रमादात् मरणे तु चांद्रं तप्तकृच्छ्रद्वयं च कृत्वा। यद्वा पंचदश कृच्छ्रान् कृत्वा विधिना दहनाद्याशौचं सर्वं का
र्यमेव। अत्र स्मृत्यंतरे विशेषः। चंडालेन हता ये च अग्निदाहविवर्जिताः। अलभ्ये च शरीरे तु कारयेत्प्रतिमां कु
शैः। विद्यमाने शरीरे तु अस्थीनि विधिना दहेत्। अस्पर्शं कृत दाहाद्ये प्रायश्चित्तविधिं चरेत्॥ चांद्रायणद्वयं चै
व तप्तकृच्छ्रद्वयं तथा। सांतपनं तथा कृच्छ्रं चरित्वा यैवं प्रकल्पयेत् इति। अथो चांद्रायणे कार्याः षट् कार्यास्तप्तकृच्छ्र
के। द्वौ तु सांतपने कार्यौ प्रत्याम्नायानुसारितः। कायाः प्राजापत्याः इति चांडालादिहते निर्णयः। अथानुष्ठानासमर्थ
जीर्णवानप्रस्थादीनां तु विधितोऽग्न्युदकादिना मरणे फलविशेषः प्रतिपादितो विष्णुना। समाः सहस्राणि च सप्त
वै जले दशैकमग्नौ पतने च षोडश। महाहवे षष्टिरशीतिरागवे गोग्रहे अनाशने भारत चाक्षया गतिः। तथा च शाता
तपः। वृद्धः शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः। इत्यादि। एतेषामौ
र्ध्वदैहिकविषयो विचारो निरूपितो माभिह्न प्रकरणे। ॥ अथाहिताग्नेर्विधविप्राहिहितस्य मरणे विशेषः। यथा
।नाशौचं नोदकं नाश्रु न दाहाद्यंतकर्म च। ब्रह्मदंडहतानां च न कुर्यात्कटधारणं। ब्रह्मदंडहता ब्राह्मणादिहताः
यमस्मृत्युक्तोऽयं दाहनिषेध आहिताग्निविषयो न भवेत्। कुतः। आहिताग्निमग्निभिर्दहेदिति यज्ञपात्रैश्चेत्येतन्न १५६
श्रुतिविहिताग्नियज्ञपात्रादिप्रतिपत्तिलोपप्रसंगात्। श्रुतिस्मृत्योर्विरोधे श्रुतेः प्राबल्याच्चा समस्तं वितानं प्रक्षि
पेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमाने वृथा मृते। सनेनांगिरसः स्मृतिवचनेन वृथा मृतस्य
ते वृथा वैदिकमार्गदरित्याज्यान्यमार्गाश्रयणात् मृते। अतश्चंडालादिहताहिताग्निसंबंधिनां यज्ञपात्रमप्सु प्र

क्षेपादिलक्षणप्रतिपत्त्यंतरविधानादयं स्मार्तोऽपि दाहादिनिषेधश्चंडालादिहताहिताग्निविषये न प्रवर्तत इति नाशौ
कनीयं। अथवा द्वितीया व्याहिताग्नौ पापकर्मणि स्मार्तोऽदाहनिषेधः। ब्राह्मणाहिताग्निदुर्मृतिविषये कृतेश्चरिता
र्थत्वं। अतो ब्राह्मणं यः पाकपंक्तित्स्वाग्निभिर्दहेदित्याशयेनाह। पराशरः। चंडालेन श्वपाकेन गोभिर्विप्रैर्ह
तो यदि। आहिताग्निर्मृतो विप्रो विशेषेणात्मघातकः। दहेत्तं ब्राह्मणं प्रेतं लौकाग्नौ मंत्रवर्जितं। दग्धास्थीनि निगृह्य तु
वक्षीरेण क्षालयेत्ततः। स्वाग्निभिः स्वस्य विधिना पृथग्दहनं पुनर्दहेदिति। एतत्पुनर्दाहविधानं मत्वं न निर्बि
शाचरणे प्रेतप्रतिविषयाभिप्रायं। यद्वाग्निपत्नीसंनिधानागमनाशक्यदूरदेशांतरमृतिविषयं। अ
ग्नीनां सान्निध्ये तु दुर्मरणयोग्यं प्रायश्चित्तं कृत्वाऽग्निभिर्वेददहनं कार्यं स्वशाखाविधिना। स्मृत्य
र्थसारे। शक्तो भक्तः पुत्रः पित्रादेः पापिनः सर्वाभिनाशुद्धिमिच्छेत्प्रायश्चित्तप्रकरणोक्तं प्रायश्चित्तानां
मन्यतमयोग्यं कृत्वा तदानीं शुद्धिं संपाद्य दहनादिकं कुर्यात्। इति निर्णयः। तथा। प्रवासस्थमृतानां तु प्रा
यश्चित्तं कथं भवेत्। प्राजापत्यास्तु षट्त्रिंशत् शुद्धिकामनीषिभिः। अथ यद्यपि सर्वसपिंडविषयमाशौ
चं पृथगध्ये निर्णेष्यते तथापि संवत्सरे तीते पित्रोराशौचं पुत्राणां स्यादिति प्रतिपादनार्थमत्रोच्यते। तेन सपिंडमृ
ति श्रवणे न त्रिमित्ताशौचं सपिंडानां न स्यात् दाह। वृद्धवसिष्ठः। मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा
अहस्तु नवमादर्वाक् ऊर्ध्वं दत्वोदकं शुचिः। इदं सपिंडानां मतानाशौचं कालादूर्ध्वं ब्राह्मणादीनां सर्वेषां वर्णा

नां उपनयनादूर्ध्वं स्त्रीणां विवाहादूर्ध्वं भवतीति स्मृत्यर्थसारे। मनुः। संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति। संव
त्सरे इत्येयदि प्रोषितः सपिंडमरणं श्रुतवान् स्यात् तदा सचैलस्नानेनैव दिवसे स्नात्वोदकं दत्वा शुचिः स्यात्। स्पर
्शशुचित्वाभिधानं मातापितृव्यतिरिक्तविषयं। तद्विषये श्रवणमात्रादेवाशौचवान् स्यात्। तदुक्तं पैठीन
सिना। पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्। स्मृत्यंतरे। महागुरुनिपाते
तु आर्द्रवस्त्रोपवीतिना। अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं यथाविधि। महागुरुः पिता। तदानीं प्रेतकार्यं पिंडादिकं कुर्यात् कुमारभो
जनं यथाविधीति। यद्यन्येन केनाप्यधिकारिणा विधिना दाहादिकं न कृतं। तदा स्वयं दाहादि [illegible] र्वकं कुर्यात् [illegible] यात्। नेत्वा
र्द्रवस्त्रोपवीतमात्रमिति। पितृपत्न्यामपि मातृव्यतिरिक्तायां स्मृत्यंतरे विशेषो दर्शितः। पितृपत्न्यामतीतायां मातृव
र्जं द्विजोत्तमाः। संवत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत्। एवमेवोक्तं स्मृत्यर्थसारे। मातापित्रोर्मरणे दशाहादू
र्ध्वमपि दूरदेशेऽपि संवत्सरादूर्ध्वमपि पुत्रः श्रुत्वा मरणदिनमारभ्य दशाहादिकं यथावर्णमाशौचं कुर्यात्। उद
कपिंडादिकं च। महागुरुमरणे दूरदेशेऽतीतेऽब्देऽपि आर्द्रवस्त्रोपवीतिना तथैवाशौचादिकं कार्यं। स्त्रीपुंसयोः प
रस्परं चैवं। सवर्णासु समवर्णासु पत्नीषु चैवं। देशांतरे कालांतरे च हीनवर्णाया मातुः सपत्न्याः मरणे पुत्रस्य त्रिरात्रं
हीनवर्णसपत्नीषु चैवं। संवत्सरे व्यतीते तु पितृपत्न्योः परस्परं चैवं। इदं चाशौचं सर्ववर्णसमं। तथा। देशांतरमृतानां स
पिंडानामाशौचकालादूर्ध्वं श्रुते स्नानमाशौचं न भवति। तदुक्तं। देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ। मृते स्नानं १५७
तेन शुध्यंति गर्भस्रावे च गोत्रिणः। मनुः। देशांतरमृतस्थे च पृथक्पिंडेन संस्थिते। सवासा जलमाप्लुत्य सद्य ए
व विशुध्यतीति। देशांतरमनेकधोक्तं बृहस्पतिः। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतरमु

च्यते। देशांतरं वदंत्येके षष्टियोजनमायतं। चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च। स्मृत्यर्थसारे तु पुराणतीर्थक
ल्पोक्तानेकप्रकारदेशांतरनिरूपणं बृहस्पतेः अनयोर्महानद्यंतरं यत्र इत्यादिवचनयोरर्थो निरूपितः। मासाशौ
चिनोः शूद्रस्य षष्टियोजने देशांतरं। वैश्यस्य चत्वारिंशद्योजने। क्षत्रियस्य चतुर्विंशतियोजने इति। ब्राह्मणस्य
विंशतियोजने देशांतर इति पक्षांतरं चोक्तं। एता यनियोग्यतया व्यवस्थिता नीति केचित्। देशकालदुर्गमार्गप्रयासोच्चन
या सर्वेषामविशेषेण भवंतीत्यन्ये। आशौचे च यथा पक्षांतरेण विशेष इति। तथा भाषादेशौ विशेषः। महागिरिर्व्यवधानं।
महानदीव्यवधानमिति द्वादशाहौ चतुर्योजनानि त्रीणि देशांतराणि तानि यमाम्नकानि। तानि त्रिरात्रादिविषयाण्यपि
भवंति। विषयश्चोक्तस्तत्रैवास्माभिः पूर्वतरग्रंथे। तद्देशं त्रिधा विभज्य आद्यस्थमे मापभागे त्रिरात्रं ततो दूरभागे प
क्षिणी। ततो दूरभागे त्वेकाहः स्यात्। एवं देशकालादिप्रयासो [illegible] अयत्र न्याशौचं तदेव ग्राह्यं। अथवा महानद्यव्यव धा
नात् तथा। भाषाभेदमात्रं गिरिव्यवधानं नदीव्यवधानानि चत्वारि देशांतराणि स्मृतानि। एवं न्यूनान्यपि देशांतरा
णि उक्तानि तानि त्रिरात्रादिविषयाणि भवंति पूर्ववत्। एवं दूरदेशांतरस्थे मृते त्वाशौचकालादूर्ध्वं श्रुते सर्वेषामपि
ज्ञातीनां सचैलं स्नानं। न त्रिरात्रादि। इति निरूपितं स्मृत्यर्थसारे। इदं सर्ववर्णसमं। अथ देशांतरात् सपिंडमरणे दशा मा
गतः सपिंडमृतिं शृणोति तदा देशांतरस्थिते न मृतिश्रुते श्रवणमात्र एव त्रिरात्रं स्यादित्यादि सूतकीत्वं भवेत्। अन्य
था गृहस्थे प्रोषिते यश्च कश्चिद्विम्रीयते गृहे प्रत्यागतस्तत्र ज्ञात्वा नातिदूरं गृहे यदा। आशौचं ग्रहणं तस्य न द्व्या
दिस्तथा भवेत्। तथा दशाहातिक्रांते देशांतरात्प्रत्यागतस्य ज्ञानातिवेलं गृही। त्रिरात्रं सूतकं तस्य न तद्भस्य कर्हिचित् इति वच

स्यो

न्यासंगता निष्फलाः। योजनप्रमाणमुक्तं पुराणांतरे। तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयस्त्रयः। प्रमाणमंगुलस्योक्तं
वितस्तिर्द्वादशांगुला। वितस्ति द्विगुणारत्निस्तत्तः किष्कुस्ततो धनुः। धनुःसहस्रे द्वे क्रोशश्चतुःक्रोशं तु योजनं। इति
योजनप्रमाणं। अथास्थिप्रक्षेपविधिः। अस्थीनि गंगादितीर्थे प्रक्षिपेदित्युक्तं। तद्विधिः स्मृत्यंतरे। स्नात्वा ततः
पंचगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैर्विमिश्र्य। ततस्तन्मृत्पिंडपुटे निधाय पश्यन् दिशं प्रेतगणोपगूढां। नमो
स्तु धर्माय वदन् प्रविश्य जलं स मे प्रीत इति क्षिपेच्च। उत्थाय भास्वंतमवेक्ष्य सूर्यं सदक्षिणां विप्रमुखाय दद्यात्।
मंत्रांतरं। यावदस्थि लवहीयानि अस्मिन्नंतीर्थे जलं तिष्ठेत् तावत्कल्पसहस्राणि वैकुंठे वसतो मृतः। इत्यस्थिप्रक्षे
पः। इति पित्रोराशौचादिनिर्णयः। अथ पुनःसंस्कारार्थं कालादिकं निरूप्यते। तत्र संवत्सराद्यर्धमुत्तरायणं का
लः श्रेयान्। तत्रापि नंदा त्रयोदशी चतुर्दशी दिनक्षयं च वर्जयेत्। शुक्रशनैश्चरवारौ वर्ज्यौ। नक्षत्रेषु भरणीक्त
त्तिकाश्लेषामघामूलधनिष्ठादिपंचकं त्रिपुष्कराणि सर्वथा वर्ज्यानि। व्यतीपाते वैधृते परिघे विष्टिकरणे चतु
र्थीमघाद्वादशस्थे चंद्रे चातिदोषः। रोहिणीपुनर्वसूत्तरात्रयचित्राविशाखानुराधापूर्वाषाढोत्तराषाढादिनि
षिद्धत्रिपुष्कराणि चैषु दुष्टानि सति संभवे वर्ज्यानि शिष्टानि ग्राह्याणि। सर्वथा दिनशुद्ध्यभावे अतिदुष्टं अमा
वा युगादिमन्वादिसंक्रांत्यमावास्यासु प्रेतकार्ये किमपि न शोध्यमिति स्मृत्यर्थसारे। तथा आशौचदिनमध्ये पु १५८
नःसंस्कारे तु पुनर्नक्षत्रादि न संभवे शोध्यं। साक्षादेकादशाहे किंचिदपि नैव शोध्यं। पुनः स्कंदसंस्कारविधिस्तावत्
मिताक्षरायां। महापातकोपहितमरणे शरीरं न लभ्यते तदा अस्थिभिः प्रतिकृतिं कृत्वा तेषामप्यलाभे पर्णशरैः

न्यसि

शौनकोक्तमार्गेण प्रतिकृतिं कृत्वा संस्कारः कार्यः स्मृत्यंतरात्। अस्थीनि चेन्न लभ्येत प्रोषितस्याग्निहोत्रिणः। प
लाशानां च वृंतानां षष्ठ्यधिकशतत्रयं। ता[illegible]स्थाने कृत्वे त्यर्थं निशेषः। शांखायनः। शरीरे दह्यमाने पु
त्रीणि षष्टिशतानि पलाशवृंतानि तेषामावापस्थानं। चत्वारिंशच्छिरस्थाने ग्रीवायां दश सा तु। वंसयोर्बाह्वोः
शतमुरसि त्रिंशत् जठरे विंशतिः षड्वृषणयोः शिश्ने चत्वारि ऊर्वोः शतं त्रिंशज्जानुजंघासु ष्टीवतोः पादांगुलीषु
विंशतिरेवं चत्वारि षष्टिशतानि भवंति पुरुषाकृतिं कृत्वा ऊर्णसूत्रैः परिवेष्ट्य यवचूर्णैः जलपिष्टैः सपिंडाभ्या
ग्निभिः संस्कुर्वंतीति। आशौचं चात्र दशाहिकमेव। आहिताग्निश्चेत्प्रवसन् म्रियेत पुनःसंस्कारं कृत्वा शववच्छौ
चमिति वसिष्ठस्मरणात्। स्मृत्यर्थसारे। आहिताग्निश्चेत्प्रवसन् म्रियेत पुनःसंस्कारे प्रत्यक्षशववद्दाहादिकं सं
पूर्णाशौचं यथावर्णं कार्यं। यथा। दाहाद्यर्थं प्रकर्तव्यमेष वैतानिको विधिरिति शंखस्मरणात्। आहिताग्निविषये। त निद
स्मिन् दशरात्रं त्र्यहमिति दशके। तस्मादाहिताग्नेराशौचं माघश॥ आद्यं चद्दाहप्रभृतीति निर्णयः। अनाहिताग्नेः प्रेत
तिविधानमेतदेव। स्वल्पकाले विशेषः। अनाहिताग्नेः पुनःसंस्कारे त्रिरात्रमिति वसिष्ठः। सुदिते ज्ञाते जन्मनि श्रेष
दिप्य स्वर्गापवर्गाय लोकाय स्वाहेत्येतत्कालसंबांधवैः। एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्।
स्मृत्यर्थसारे। अनाहिताग्नेः पुनःसंस्कारस्तत्सूतकमध्ये चेत्तत्तत्सूतकशेषेण शुद्धिः। अतीते सूतके पु
नःसंस्कारे तु सर्वमगृहीताशौचस्य पुत्रस्य पत्न्याश्च दशाहाशौचं। गृहीताशौचस्य पुत्रस्य पत्न्याश्च त्रिरात्रं। पत्नीपु
नःसंस्कारे पत्युश्चैवं। सपत्नीमिथश्चैवं। अगृहीताशौचानां सपिंडानां त्रिरात्रं। गृहीताशौचिनां पुनस्तेषां सापिंडानां

नां पुनराशौचं नास्ति। त्रिरात्राशौचे पिंडोदकदानप्रकारो निरूपितो आद्यश्राद्धप्रकरणे। इति पुनःसंस्कारः। अथ पुन
र्दाहे प्रायश्चित्तं। प्रत्यक्षशवसंस्कारे पुनःसंस्कारे च कर्तव्ये ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टास्पृश्यास्पृश्य
मरणखट्वामरणबंधमरणादिषु सप्त त्रीन् कृच्छ्रान् कृत्वा द्वादश कृच्छ्रान् वा दश कृच्छ्रान् कृत्वा प्रायश्चित्तं निमि
त्तानुसारेण कृत्वा दहेत् विप्रवचनं गृहीत्वेति। तथा दहनकर्तापि किंचिदात्मनः शुद्ध्यर्थं कुर्यात्। प्रेतस्यात्मनश्च शु
द्धिमनुत्पाद्य कृतं नोपतिष्ठति उभयोर्नरकं ध्रुवमिति स्मृत्यर्थसारे। तथा। प्रवासस्थमृतानां तु प्रायश्चित्तं क
थं भवेत्। प्राजापत्यैस्त्र्यब्दैः(?) षट्त्रिंशच्छुद्धिकामं मनीषिभिः। दुर्मरणनिमित्तं प्रायश्चित्तमेवं कृत्वास्नेहादिना
चेदूर्ध्वदैहिकं कुर्यात्तदा कर्तुर्दोषः। पुत्रैरुक्तमाम्नायोक्त्वा त्रिमुदकं स्नानं स्पर्शनं वहनं क्रियां रज्जुच्छेदाश्रु
पातं च तप्तकृच्छ्रेण शुध्यति। अबुद्धिपूर्वेप्येवं वर्त्तते। एषामन्यतमं प्रेतं यो वहेत दहेत वा। कटोदकक्रियां कृत्वा
कृच्छ्रं सांतपनं चरेत्। एषामात्मघातकृतामपि। अतस्तेषां प्रायश्चित्तं कृत्वा शुद्धिर्दाहः कार्यः। इति दुर्मरणे दा
हनिर्णयः। अथ साग्नेः सूतकविचारः। आहिताग्नेर्दाहात्सूतकमुक्तं। मरणादेव कर्तव्यं संयोगो यस्य नाग्नि
भिः। दाहादूर्ध्वं प्रकर्तव्यमेष वैतानिको विधिः। तथासति साग्नेर्देशांतरेणपराधेन कालांतरेणाग्निप्राप्तौ स १५९
त्यां दाहे सति तत्सन्निधाने स्थितानां पुत्रादिसपिंडानां मरणनिमित्तं सूतकं भवेन्न भवेद्वेति विचार्यते। विगतं तु
विदेशस्थं शृणुयाद्यो ह्यनिर्दशं। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्। तथा। प्रोषिते कालशेषः स्यात्
शेषे त्र्यहमेव वा। अशेषे दशाहातिक्रांते मासत्रये त्रिरात्रं स्यादित्यनेन समानार्थेन तेन देशांतरमृ

म४

तं श्रुत्वाऽग्नीन्वै वैखानसे यतौ। मृते स्नानेन शुध्यंति इत्यनेन देशांतरस्थितानां अहमपि न भवति तदुक्तं माहिताग्नौ
पितरि प्रेते देशांतरमृते तत्सुतादीनां मासंस्कारात्संप्राप्यादिकमजोपो नास्ति। तदिदं विधिवद्दहनाभावेन तद्दहक
स्यापि योग्यताभावात् उत्क्रांतिदशाहातिक्रमाच्च विधिवत्संस्कारार्थमस्ति तत्रोकापरं। यत्तु पितृमरणे अवश्य
देव प्रेतकार्यं कर्तव्यमिति वचनं तदस्थितप्रतीकारकृतविषयं। अनग्निमत उत्क्रांते राशौचं हि द्विजातिषु। दाहाग्नि
मतो विधानात् विदेशस्थे मृते सतीति। विदेशस्थे मृते आहिताग्नौ त्रेताग्निसन्निधानाभावेन वैधदहनाभावे सति स
न्निहितस्थितैः पुत्रभ्रातृसपिंडैः उत्क्रांतिदशाहमध्ये मातृभ्रातृपितृव्यादीनामागतं प्रत्याब्दिकं कर्तव्यं नवेति।
अपवासन्निधानस्थितैरन्यैरस्तोपितृक्षयाहादिश्राद्धे उपवेशनीया नवेति। उपवेशनं तु लोकविगीतत्वान्नाहरणीयं
यद्यप्यविगीतं तथापि मधुपर्के पश्वालंभनवत्। लोकविद्विष्टत्वान्नानुष्ठेयं। मनुः। अस्वर्ग्यं लोकविद्विष्टं ध
र्म्यमप्याचरेन्न तु। किंच इदमाशौचं मरणनिमित्तं दाहनिमित्तं वा। दाहनिमित्ते तु सान्नौ मृते आशौचं दाहादात् मि
इति। अथ पितृक्षयाहे ब्राह्मणभोजनकालपर्यंतं दाहो न कार्य इति कश्चिद्वदेत्। इत्यादिलोके तु पदार्थतस्या
न्मरणनिमित्तं चेदुत्क्रांतिदशाहे श्राद्धं। तस्मादुत्क्रांतिदशाहापरिहारेण साग्निकनिमित्तत्वे नाधिकाशौचवि
धानमिति। अतो अनग्निमत उत्क्रांते साग्नेः संस्कारकर्मणा शुद्धिरित्येतद्यथाकथंचिद्दाधिकाशौचविधिपरं
व्याख्येयं। इति निर्णयः। अथ देशांतरमृते साग्नौ असंनिधानागतपत्नीमरणे विशेषः। देशांतरगते प्राप्ते यजमाने मृ
ते सति। दाहार्थं रक्षिते वह्नौ पत्नी यदि म्रियेत हेमंता। तत्पाशुतेन कर्तव्यं तयोर्दाहे तु कागतिः। अत्रोच्यते। यजमान

स्यगृहार्थं इच्छितेऽग्नौ यदि गृहे पत्नीमरणमुदेति। तदाग्न्योरन्यतरेणैव तत्पत्नीं दहेदिति संशयः। जैमिनिः। विरोधि
स्फलतरोत्पन्ने सर्वोत्पन्नं तु दुर्बलं। जैमिनिमुनिराहैवं न्यायशास्त्रसमन्वितं उत्तरोत्पन्नमन्त्ये मरणं। सर्वोत्पन्नात्ति
द्गृह्यविरोधि। अतः प्रबलत्वादुत्तरं स्यादिति। तथा। पौर्वापर्ये पूर्वदौर्बल्यमिति द्वादशाध्यायसूत्रे उत्तरं प्रबल
मित्यतिपादितं शबरस्वामिभिः। न्याये तु उत्तरत्र मणिमंत्रादिबाधकप्रत्निधाने सर्वाग्ने दाहकशक्तिर्बाध्यत इ
ति। ननु ये पुरोदंचोदृभाद्दैकिणाग्न्यानूस्तृणीयात्। तथा। अथ स्नानसमिधं धारयन् उपरि पूदेवेभ्यो धार
यति। इत्यादिप्रोक्षितमन्त्रताग्निहोत्रहोमविधिना होमे क्रीयमाणे सति यजमानस्वं बधिनोऽग्नयः सपत्न्या इति
पत्न्यां अपरो धर्षंका। तत्रोत्तरं। प्रवासप्रतविधिना क्रीयमाणेऽग्निहोमके। तत्रापि पत्नीसंविधास्यादनालंबुकां
विना। उभयोरसमक्षं चेद्धुतमप्यहुतं भवेदिति वचनात्। सविधसंनिधानं। सविधस्तनोऽसमयादिति पाणि
निस्मरणात्। अनालंबुकां। रजस्वलां। तथा चमितान्तरायां। यस्य व्रत्येहनि पत्न्यनालंबुका स्यात् तमुपकल्पय
न्येति। किंच। नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतं। तथा। पत्नीसमामति क्रामेत् यजमानोऽग्निरे यदि। अ
होमात्पुनरागच्छेत्पुनराधानमस्ति। तथा। आदधीयातामिति द्विवचनदर्शनादित्यादि श्रुतिस्मृतिवचनपर्यालो १६०
चनया पत्नीयजमानयोराधानाग्निषु तुल्योऽधिकार इति गम्यते। तथा। सति पत्नीमरणे समये यद्यस्त्वाग्नि
पितुरागच्छेत्तु नस्तद्दाहसहः। अथ कठशाखायां। मुमूर्षुः पुनराद्धाति तैः शरीरं संस्कृत्य अरूढीनि विधृत
प्रथममाधानाग्निः पात्रैश्च यथावत्पुनः संस्कार इति। एतच्च गृहे अग्निहोत्रसद्भावविषयं। पत्न्यासहाग्निहोत्रे

दग्धे पश्चादागतानामस्थ्नां पुनः संस्कारविधिना लौकिकाग्निना दहेत्। अगतिकत्वादिति। तथा। अथ यत्रैवैरग्निभिर्यजमानं संस्का
पयंति देवरथो वा अग्नय इति श्रुतिः। यजमानमिति दंपत्योर्व्यासोक्तकर्तृकत्वाभिप्रायेणैकवचनं। यथाग्नीषोमयोर्देवता
त्वं। अतः पूर्वमृतानां पत्नीनामग्निभिर्दहेदिति श्रुतिस्मृतिसिद्धं। अग्नयो यजमानस्यापि देवरथत्वं कुर्वंति। अग्निहोत्रकर्म
जनिता पूर्वस्य विद्यमानत्वात्। सर्वकर्मा पूर्वं कर्त्तारिति श्रुति तेनापूर्वेण शरीरान्तरे स्वर्गः स्यात्। कौशितकिः। स एते
न देवरथेन स्वर्गं लोकमेति सुकृतां यत्र लोक इति। सुकृतां पुण्यवतां लोकः स्वर्गो निरंतरं सुखं। तदुक्तं। यन्न दुःखेन संभि
न्नं न च ग्रस्तमनेकधा। अभिलाषोपनीतं च यत्सुखं स्वर्गपदास्पदं। अत्र विशेषः। मातृमृताशौचमध्ये पूर्वं मृतानि पितुरस्थी
न्यागच्छेयुस्तदा मातुराशौचान्ते सपिंडनात् प्राक् पितुर्दाहादि सपिंडनांतं कृत्वा मातुः सपिंडनं कुर्यात्। अथ पत्नीं तनं मरणं चे
द्भूयते तदा पितुराशौचस्य प्रबलत्वात्पुनस्तदान्तं पितुर्दाहादि कुर्यात्। पिंडोदकदानं तु पित्रे पूर्वं। लौगाक्षिः। पितर्युपरते पु
त्रो मातुः श्राद्धान्निवर्त्तते। पत्न्यां दहने विशेषः। कारिका। पत्नी चेद्विधवा भूत्वा प्रम्रियेत कदाचन। तदा श्रौताग्नि विशेष
स्त्वसंघातमरणे अर्ध्वदैहिकनिर्णये वक्ष्यते। इति निर्णयः। अथ कालांतरमृतायां पत्न्यां दहने विशेषः। कारिका। पत्नी चे
द्विविधवा भूत्वा प्रम्रियेत कदाचन। तदा श्रौताग्निशून्यत्वान्निर्मंथेनैव दह्यते। निर्मंथः किंचिदुच्छितेनारणिकाद्येनैव
र्था। पुरुषस्य तु संन्यासादिगत्वाद्दहनाभावः संभाव्यते। इति पत्नीदहनविधिः। अथ गर्भादिरजस्वलनपर्यंतं स्तनकी॥

तदाशौचं द्विविधं ॥ सूतकं मृतकं च । प्रसूतिनिमित्तं सूतकं । मृतिनिमित्तं मृतकं शावमिति ॥ आशौचेन कुलत्रयमुच्यते । सू
तकाधिकारिणः सपिंडाः समानोदकाश्च ॥ यतः प्रभृति सीतान्न विशेषः स कूटस्थस्तमारभ्य गणिताः सप्त पुरुषाः सपिंडाः ॥ ऊर्ध्वं
समानोदकाः ॥ बृहन्मनुः ॥ सपिंडता तु पुरुषे सप्तमे विनिवर्त्तते ॥ सप्तमे अतिक्रांते इत्यर्थः ॥ समानोदकभावस्तु निवर्त्तेताचतु
र्दशात् ॥ जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते ॥ मनुः ॥ दशाहं शावमाशौचं सपिंडेषु विधीयते ॥ जननेप्येवमे
वं स्यात् निपुणां शुद्धिमिच्छतामिति ॥ शावे शावनिमित्तं ॥ यत्र सपिंडानां दशाहं तत्र समानोदकानां त्र्यहं ॥ जननेप्येवं ॥ मिता
क्षरायां ॥ गर्भस्रावे यावंतो गर्भे षण्मासाः स्युस्तत्समसंख्या निशाः शुद्धेः कारणं ॥ एतच्च स्त्रिया एव ॥ गर्भस्रावे मासतु
ल्या रात्रयः स्त्रीणां ॥ स्नानमात्रमेव पुरुषस्येति वसिष्ठस्मरणात् ॥ आचतुर्थात् स्रावः । पंचमषष्ठयोः पातः ॥ ऊर्ध्वं प्रसूति
रिति तु स्मृत्यर्थसारे । आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः ॥ अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥ मरी
चिः ॥ स्रावे मातुस्त्रिरात्रं स्यात् सपिंडाशौचवर्जनं ॥ पाते मातुर्यथामासं पित्रादीनां दिनत्रयं ॥ पित्रादिसपिंडा
नां त्रिरात्रं ॥ गर्भनाश प्रयुक्ताशौचं सर्ववर्णसामं ॥ वसिष्ठः ॥ ऊनद्विवार्षिके प्रेते गर्भपतने वा सपिंडानां त्रिरात्रमाशौ १६
चं ॥ यत्तु गर्भपाते सद्यः शौचविधानं ॥ सद्यः शौचं सपिंडानां गर्भस्य पतने सतीति वचने ॥ तत्तु सप्तमासात्परतो द्रवक
र्भपतनं विदितव्यमिति विज्ञानेश्वरेण व्याख्यातं ॥ पितुः प्रथममासादारभ्य स्नानं भवति ॥ अतः षण्मासादूर्ध्वं सू

म)

तकविधिर्दशरात्रमेवामिताक्षरा ॥ सप्तममासप्रभृति जातमृते मृतजाते वा सपिंडानां दशाहमिति ॥ हारीतस्मरणात् ॥
मृतजाते तु ॥ पारस्कारः ॥ गर्भे यदि विपत्तिः स्यात् दशाहं सूतकं भवेत् ॥ सपिंडानां प्रसवनिमित्तस्य विद्यमानत्वात् ॥ प्र
सवनिमित्तं दशाहं सपिंडानां ॥ समानोदकानां त्रिरात्रं ॥ जननिमित्ते अस्पृश्यत्वं मातुरेव ॥ न पितुः पुत्रस्य स्नानानंतरम
स्पृश्यत्वं नास्ति ॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ॥ माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति मनुस्मरणात् ॥
स्नानमपि शीतलजलेन ॥ यत्तु वचनं ॥ जाते मृते मृतजाते वा कुलस्य सद्यः शौचमिति ॥ तच्छिशुमरण निमित्तस्नानादु
त्तरं ॥ प्रसवनिमित्ताशौचं भवत्येव ॥ यत्तु ॥ जीवन् जातो यदि प्रेयात् सद्य एव विशुध्यतीति तच्छिन्नानि प्राय ॥ यज्ञे मिनिवर्त्त
नं ॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं ॥ छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते ॥ अस्यार्थः ॥ नालच्छेदनादू
र्ध्वं शिशुमरणे सूतकं दशाहं ॥ नालच्छेदनात्पूर्वं शिशुमरणे त्रिरात्रं ॥ स्मृत्यर्थसारे ॥ नालच्छेदनात्पूर्वं शिशुमरणे
जनननिमित्ताशौचं सर्वेषां पित्रादिसपिंडानां त्रिरात्रं ॥ मरणनिमित्ते सद्यः शुद्धिः ॥ बृहन्मनुः ॥ जीवन् जातो यदि
मृतः स्यात्ततः सूतक एव तु ॥ सूतके कुलमातुः पित्रादीनां त्रिरात्रकं ॥ यत्तु ॥ बृहस्पतेरुक्ते वचनं ॥ मुहूर्त्तं जीवितो बा
लः पंचत्वं यदि गच्छति ॥ मातुः शुद्धिर्दशाहेन सद्यः शौचास्तु गोत्रिणः ॥ मुहूर्त्तमिति कालाध्वनोरिति द्वितीया ॥ मुहूर्त्त
मध्ये मृते त्रिरात्रं ॥ ऊर्ध्वं तु दशरात्रं ॥ प्राक् छेदात् ॥ एतदनुरोधेन नालच्छेदनकालोपि मुहूर्त्तमध्य एव ॥ नालस्य

गर्भच्छेदनपर्यंतं निपातात्॥ मुहूर्तादूर्ध्वं छिन्ने त्र्याहं त्रिदिनं दशरात्रं गोत्रिणां सद्यः शुद्धिरग्निहोत्रार्थम्॥ तत्रेयं व्यव
स्थामिताक्षरायामुक्ता॥ जननानंतरं नाभिवर्धनात्प्राक् तु पित्रादीनां जनननिमित्ताशौचं दिनत्रयं॥ सद्यः शौचं त्व
ग्निहोत्राद्यर्थम्॥ अग्निहोत्राद्यर्थं स्नानोपस्पर्शनात्तत्कालं शौचमिति शंखस्मरणात्॥ ततो दशाहमरणे॥ पारस्करः॥
अंतःसूतके चेद्दोत्थानादाशौचं सूतकवदिति॥ उत्थानात् सूतिकायां दशरात्रमिति यावत्॥ सूतकवदिति मरणनि
मित्तोदकदानरहितं॥ बृहन्मनुः॥ दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः। शावाशौचं न कर्तव्यं सूत्याशौचं विधी
यते। अंतर्दशाहोपरतस्य सूतकावधिरेवाशौचमिति स्मृत्यंतरात्। अंतर्दशाहे यदि शिशुः परमस्तदानप्रेताशौ
चं। यदि तत्र सपिंडजननं तदा सूतकमपि न कार्यं किंतु एवाशौचेन शुद्धिरिति। यच्चोक्तं। माता शुध्येद्दशाहेनेति त
त्संव्यवहारयोग्यतामात्रं। अदृष्टार्थे कर्मणि। पैठीनसिः। सूतिकां पुत्रवतीं विंशतिरात्रेण मासेन स्त्रीजननीमिति। एत
द्विंशतिरात्राद्यभिधानं सूतिदशाहातिरिक्तं। यतः पैठीनसिः। अस्पर्शा निदशदिनानीति। स्पर्शा निर्विंशतिदिना
नि॥ अतएव दशकर्म मासं पुंत्रस्य वेणुमातुः परत्रैतद्दशाहाधिकमिति। लोकेपि मासिकं स्नानं सूतिकायाः प्रतिसिद्धिः १६२
तथा। अपरत्र कन्याजन्मनि एतन्मासत्रयं दशाहाधिकं चत्वारिंशद्दिनानि। मारः। प्रथमे दिवसे षष्ठे दशमे चैव
सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। यस्मिन् दिने कुमारजन्म तद्दिनं नष्टं दुष्येत तत्र तन्निमित्तं हेमश्राद्धानि

कुर्यात्॥ इति दशाहसूतकनिर्णयः॥ ॥ अथ बालस्य जातमात्रादारभ्योपनयनपर्यंतं मृते संस्कारविधिः सूतकं निर्णीयते
॥ नाम्नः प्राक् तदपैति सूतकवशादिति दशके। एकादशेऽहनि नामेति योगीश्वरः। ततः प्राक् दशाहमध्ये मृते जन्मसूतकवशादूम
रणनिमित्तं शावं गच्छति। बृहन्मनुः। दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः। शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते॥
आचूडाकरणान्मृते सद्यः शौचमेव। शंखः। आचूडाकरणात् सद्यः शौचमिति। सपइति मातापितृव्यतिरिक्तविषयं। तयोस्तु
दशाहं। पैठीनसिः। गर्भस्थे प्रेते मातुर्दशाहं। जाते वृभयोः। मृते नाम्नि सोदराणां चेति। याज्ञवल्क्यः। ऊनद्विवर्ष उभयोः सूतकं मातुरे
वहि। अस्पृश्यत्वं मातुरेव दशाहमध्ये। ततो दशरात्रमुभयोरित्यर्थः। पारस्करः। ऊनद्विवर्षे प्रेते मातापित्रोराशौचमेकेतरेषा
मेकरात्रं त्रिरात्रं चेति। अत्रान्तःसूतके चेत्तत उत्थानादाशौचं सूतकवदिति। अत्रोत्थानादिति दशरात्रं सूतकवदित्युदक
दानरहितमिति मिताक्षरायामाख्यातं। संग्रहे। अदंतजातमरणे पित्रोरेकाहमिष्यते। दंतजाते त्रिरात्रं स्याद् यदि स्यातां तु निर्गु
णौ इति वचनात्त्रिरात्रं। कश्यपः। बालानामदंतजातानां त्रिरात्रेण शुध्यतीति तथा। बैजिकादभिसंबंधादनुरुंध्यादघं त्र्यह
मिति। बैजिकादभिसंबंधादित्युक्तं। तेन संबंधे अतएव निर्गुणयोर्मातापित्रोरुपनयनपर्यंतं त्रिरात्रमेव। तथा चानौरसेषु पु
त्रेषु विशेषः। प्रजापतिना विहितं त्रिरात्रमुक्तं। अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेण
तत्पितेति। चंद्रनिबंधे। अनौरसेषु पुत्रेषु जातेषु मृतेषु च। त्रिरात्रमिति विज्ञेयं बैजिकादभिसंबंधादित्येव बालानां जन्मवि
तं। स्वैरिण्यादिपुत्रविषयं स्वस्थापितं च। तस्मात् परा या तस्याः पुत्रे संस्थिते पैंग्योक्तं दशरात्रं पित्रोः सोदराणां च स्यादेवेति सिद्धं। मि
ताक्षरायामपि त्रिरात्राशौचं पक्तृत्वपाधिकं यजितया योजितः। न मुख्यधर्मपत्नीजातापत्यसंबंधितया चेति। तत्रोक्तं नि

आं ६ की ३

पुण्यतया विलोकनीयं ॥ सपिण्डानां तु नामकरणोर्ध्वं दन्तेभ्यः प्राक् अदन्तेऽग्निसंस्कारे सद्यः शुद्धिः ॥ कृतेऽग्निसंस्कारे एकरा-
त्रं स्मृत्यंतरे ॥ अदंतजाते तनये शिशौ गर्भच्युते तथा ॥ सपिंडानां च सर्वेषामेकरात्रमशौचकं ॥ अदंतजातेत्यस्य व्याख्या येन
जः ॥ अजातदंत जात इत्यर्थः ॥ याज्ञवल्क्योपि ॥ आदंतजननात्सद्य आचौलान्नैशिकी स्मृता ॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः व ३
परं ॥ कृतेऽग्निसंस्कारे ऊनद्विवर्षादूर्ध्वं त्रिरात्रं ॥ यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः ॥ दाहयित्वा तथाप्येनं आशौचं त्र्य-
हमाचरेत् ॥ इति वचनात् ॥ यत्तु विष्णुना ऊनत्रिवर्षे मृते शुद्धिर्नैशिकी तेनैवाभिहितं ॥ न हि न्यून त्रिवर्षस्य दंता तु
भावा ५ त्पत्तिः संभवति तस्मात् द्वाहादर्वाग् ... वस्था ॥ ... मिति सर्ववाक्यस्य एवमेवोक्तं ॥ स्मृत्यर्थसारे ॥ दंतजननादूर्ध्वं त्रि-
वर्षपर्यंतमकृतचौलस्य मरणे खननं दहनं वा कार्यं ॥ खनने एकाहमाशौचं ॥ दहने त्रिरात्रं ॥ त्रैवार्षिके चौलकालादूर्ध्व-
मसंस्कारेपि त्रिरात्रं ॥ चूडाशब्देन सर्वत्र तृतीयवार्षिके कालावच्छेदो लक्षणया ॥ यत्तु ऊनद्विवर्षस्य संस्काराभावेपि त्रिरात्रमुक्तं
तु ॥ अरण्ये काष्ठवत्त्यक्त्वा क्षिपेत्तु त्र्यहमेव चेति ॥ तद्येषां कुले प्रथमवर्ष एवातीते चूडानियमस्तेषां देवाद्यनुकूलकाला-
तिक्रमे बोद्धव्यं ॥ चूडाकालः प्रथमे वर्षे तृतीये पंचमे वर्षे स्मृतिचोदितः ॥ नामकरणादूर्ध्वमग्निदानादिकमपि विकल्पि-
नकुर्यात् ॥ मनुः ॥ नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया ॥ जातदंतस्य वा कुर्यान्नाम्नि वापि कृते सति ॥ अत्रोद- १६२
कदानस्याग्निदानस्य एवं कृत्वा उदकदानमग्निदानस्याप्युपलक्षणं ॥ तूष्णीमेवोदकं कुर्यात् तूष्णीं संस्कारमेव चेति
लौगाक्षिः ॥ ऊनद्विवार्षिकस्य निखननमेवोक्तमलं नाम ॥ ऊनद्विवार्षिकं प्रेतं घृताक्तं ... वि ॥ यमगाथां गाय-
मानो यमसूक्तमनुस्मरन् ॥ तथा ॥ ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ॥ ऊने अपरिपूर्णे द्विवर्षे यस्य स ऊनद्विव-

ध्रे १ ऊँ निखनेन्नकवि २

ता ८

र्षः ॥ तं प्रेतं निखनेत् रमावत्रर्तं कृत्वा निदध्यात् न पुनर्दहेदित्यर्थः ॥ तथा ॥ प्रथमे वर्षे कृतचौलस्याग्निसंस्कारे सत्यहोरात्रं वि-
ष्णुः ॥ दंतजाते त्वकृतचूडे त्वहोरात्रेण शुद्धिरिति ॥ अकृतचूडस्योनद्विवर्षस्य दाहो न श्रेयान् ॥ ऊर्ध्वं श्रेयान् ॥ अनतीतो नाद्वि-
वर्षस्तु प्रेतो यत्रापि दृश्यते ॥ अतिमोहात् ... देशस्य धर्ममार्दवात् इति वचनात् ॥ कृतचूडस्य संस्कारे त्रिरा-
त्रं च सर्वदा नियतं ॥ अत एव प्रथमे वर्षे कृतचूडस्य चूडाकरणानंतरं मृताग्निसंस्कारस्यावश्यकत्वात् त्रिरात्रमेव
॥ ऊनद्विवर्षे गर्भपतने वा सपिंडानां त्रिरात्रमेवेति वासिष्ठस्मरणात् ॥ वर्षत्रयादूर्ध्वमकृतचूडस्यापि संस्का-
रनियतत्वात् त्रिरात्रमाशौचं ॥ उपनयनादूर्ध्वं सर्वेषां ब्राह्मणादीनां दशरात्रादिकमिति ॥ मरीचिः ॥ मौंजीबंध-
नाद्विप्रः क्षत्रियश्च धनुर्धरात् ॥ आप्रचौलोद्गमाद्वैश्यः शूद्रो वस्त्रद्वयोद्ग्रहात् ॥ मौंजीबंधनं धनुर्धरणानंतरं ॥ वा-
सर्वदिन एवाद्यशौचं मौंज्यादिकं च शूद्रः कुर्यात् ॥ इति वयोवस्थानाशौचं ॥ ॥ अथ स्त्रीणां वयोवस्थाशौचं ॥ अत्र तु चूडा-
यां तु कन्यायां सद्यः शौचं विधीयते इत्यापस्तंबः ॥ कन्यास्वाकृतिरात्र्युत्तरादि दिनदशकं च ॥ चूडाकर्मत्रिकुलाचारतो ध्यनो ॥ चू-
डाकर्मकालोर्ध्वं वाग्दानादर्वाक् अहोरात्रं ॥ अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति याज्ञवल्क्यवचनात् ॥ कृतचूडासु
वाग्दानात् प्रागहोरात्रं विशुद्धिकारणं सपिंडानां ॥ मातापित्रोस्त्रैपेयो ... दशरात्रं च दत्तानां त्रिपुरुषा विहाय
॥ पैतृपवाक्यस्यापत्यमात्रे प्रवृत्तत्वात् ॥ सापिंड्यं कन्यानां त्रिपुरुषपर्यंतमेव ॥ अदत्तानां तु कन्यानां त्रिपुरुषा विज्ञाय

नइति वासिष्ठस्मरणात्। पुरुषशब्दनिष्पत्तिः। पूरयनीति पुरुषः। पूरणं तु अपत्यमात्रेण भवति। अत्र समाहारे द्विगुसमासे स
ति त्रिपुरुषी। एवं सति पूरणत्वान्यतिरेकेण स्त्रीविषयाणां स्मृतिर्भवति। अतः कन्याप्रसूतौ कन्यापितामहसंततेः। स
पिंडता। ऊर्ध्वं समानोदकेति वसिष्ठस्मरणात्। आत्मपुत्रपितृभ्रातृपितृव्यस्य प्रसूयते। दशाहं सूतकं तेषामन्येषां
तु त्रिरात्रकमिति। कात्यायनोऽब्रवीत्। वाग्दत्तायामविवाहितायां पतिपितृपक्षयोरुभयोस्त्रिरात्रं। मरीचिः। वारिपूर्वं प्र
दत्तानु यानैव प्रतिपादिता। असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतं। दृशकं। दानेच्यहं चोभयोरिति। वाग्दत्ते संप्र
पदीं विहितायामित्यर्थः। दशवर्षादूर्ध्वं रजस्वलेत्युच्यते। नद्वस्थायामविवाहितायां पितृकुलस्य कुलस्य जातीति विहितं पारि
प्रणें सूतकं। तथा। अष्टवर्षा भवेद्गौरी नववर्षा तु नग्निका। दशवर्षा भवेत्कन्या अतऊर्ध्वं रजस्वला। जातककर्म तु संभवे पितृकुल
स्येति। दशके। विवाहादूर्ध्वं विशेषेणाविशेषोदर्शितः। संस्कृतासु स्त्रीषु नाशौचं पितृपक्षके। तत्प्रसवमरणे चेत्पितृगृहे
स्यातां तदैकरात्रं त्रिरात्रं चेति। प्रसवे एकाहः। मरणे त्रिरात्रं। स्मृत्यर्थसारे। मातापितृगृहे व्यूढायाः पुत्र्याः प्रसवे मा
तापित्रादिकानामेकाहमाशौचं। तत्र तस्याः मरणे तु त्रिरात्रं। गृहांतरमरणे मातापित्रोरेव। ग्रामांतरमरणे पक्षि १६४
णी। तथा मातापितृमरणे सपिंडेषु व्यूढपुत्र्यास्त्रिरात्रं। यथा। पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत्। त्रिरात्रेणैव शु
द्धिः स्यादित्याह भगवान्यमः। बौधायनः। ऊढस्त्रीणां पित्रोरुपरमे त्रिरात्रं। विवाहदशेतु परिणतस्त्रीणां पितृमातृम

रणे त्रिरात्रमाशौचं॥ इति वयोवस्थाशौचं सर्ववर्णसाधारणं॥ तथा॥ अविशेषेण वर्णानामर्वाक्संस्कारात्पिंडवर्जं वृतादेयमिति॥ इति
पिंडोदकदानविधिः॥ समानोदकशौचमित्यादि वर्णविशेषानुक्त्वा साधारणं॥ तथा॥ अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः। त्रिरा
त्रात्तु भवेच्छुद्धिः कन्यास्वह्ना विधीयते इत्यंगिरसो वचनस्यायमर्थः॥ संस्कारकर्मोपनयनं॥ ततोऽर्वाक् अविशेषेण आदंतजननात्
इत्यादि विशेषव्यतिरेकेण त्र्यहाच्छुद्धिः। कन्यायास्तु विवाहादर्वागह्ना। दिवसेन शुद्धिः। यत्तउक्तं। वैवाहिको विधिः स्त्रीणामौप
नायनिकः स्मृतः। अत्रापि चूडाकरणादर्वाक् सद्यः। दानेत्र्यहमिति विशेषव्यतिरेकेण त्र्यहाच्छुद्धिः सपिंडानां। पितृमातृविषयं
पैंगयोक्तं दशरात्रमिति निर्णयः। अथ समानोदकानामाशौचकालविधिः। । जन्मनावधितः सप्तपुरुषपर्यंतं सपिंडाः। ऊ
र्ध्वं समानोदका इति प्रागुक्तं। सपिंडता तु सप्तमे पुरुषे विनिवर्तते। सप्तमे अतिक्रांते। गौतमः। पिंडनिवृत्तिः सप्तमे पंचमे वेति। स
प्तमे पितृकुले पिंडनिवृत्तिः। पंचमे मातृकुल इति विवेक्तव्यं। त्रिरात्रं दशरात्रं वाशावमाशौचमाप्नोति। यथाशावं तथा जनना
शौचमपि त्रिरात्रं। चेति मन्वादिभिरुक्तं। तत्र समानोदकरूपभेदप्रदर्शनार्थं। तथाहि। जन्मन्येकादशाहं तु त्रिरात्राच्छुद्धिरि
त्यनेनाशावस्पर्शे विशुद्धं ह्यनित्यहात्तु दकदापिन इत्यादियाज्ञवल्क्येन त्रिरात्रदशरात्रयोः समानोदकसपिंडविषयत्वेन व्यवस्थात्व
ा। जनने मरणे वा शौचे सपिंडानां दशाहे समानोदकानां त्र्यहमिति। तथा। दशाहं शावमाशौचं सपिंडेषु विधीयते अर्वाक्संच
यनादस्थ्नां त्र्यहमेकाहएव चेति दशाहसंबंधिनां न्यूनन्यूनतरभेदचतुष्टयदर्शनात्समानोदकानामपि न्यूनन्यूनतराशौच

त्र्यहात्के वेत्या ॥ तथाहि ॥ यस्य सपिंडविषये दशाहेन शुद्धिस्तस्य समानोदकविषये त्र्यहेन शुद्धिः ॥ त्र्यहात्तूदकदायिन इति वचनात् ॥
चतुरहः संबंधेन पक्षिण्या शुद्धिः ॥ पंचमे षष्ठे सपिंडैर्योनिसंबंधे इति गौतमस्मरणात् ॥ एकाहः संबंधेन सद्यः शौचं ॥ यथा ॥ बाले
देशांतरस्थे च पृथक्पिंडे च संस्थिते ॥ सवासा जलमाप्लुत्य सद्य एव विशुद्ध्यतीति मनुवचनात् ॥ त्र्यहः संबंधेनैका
४८ हेन शुद्धिरित्यनुद्वाक्यमिति ॥ दशाहे संबंधिनां नेदं चतुर्थे यदर्शनादेतेषु दिवाक्यमत्र द्रष्टव्योऽत एव मिताक्षरायां स
मानोदकविषयाख्यसंकोचि चिता शौचकल्पाः ॥ पक्षिण्येकाहः सद्यः शौचरूपाः स्मृत्यंतरद्रष्टव्या इति ॥ इयं च व्यवस्था
समानोदकापरमे द्रष्टव्या ॥ दशके तु विशेषोक्तो विज्ञानेश्वरेण ॥ उत्पन्ने त्रिदिनं मृते पुनरप्याहदूर्ध्वं समानोदके इति
॥ समानोदके उत्पन्ने जाते त्रिदिनं उत्पन्नयनाद्दूर्ध्वं मृते त्रिदिनमिति वदतेनत्सूक्ष्मं चिंत ॥ जातमात्रः शिशुस्तावद्या
वदष्टौ समा धृतास्तत्र गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शक इति वचनात् ॥ यथा सपिंडानामा दंतजननात् सद्य इत्युक्ते
नदंतात् प्राक् सद्यः शुद्धिः तथा समानोदकानां मौंजीव्रतात् सद्यो घट इति ॥ मौंजीबंधनात् पूर्वं मृते ॥ यच्चोक्तं नचूडो
वेजनन दंतस्तु संस्थितः ॥ दाहयीत्वा ततः नो मा शौचं त्र्यहमाचरेदिति स सपिंडविषये त्र्यहसंबंधे सति समानोदक १६५
आशौचाभावप्रतिपादनात् ॥ अतिक्रांताशौचं कुतः सपिंडानां ॥ एवं चानशनादिनामृतविषये सपिंडैस्त्र्यहाशौचक्रियमा
णे समानोदके न एकाहः कार्यः ॥ यथा सपिंडविषये त्र्यहसंबंधेन त्र्यहादूर्ध्वमेकाहेन शुद्धिरित्युक्तं स्मृतिकरंडिकायां ॥

स्मृत्यंतरे ॥ यत्र शुद्धिः सपिंडानां त्रिरात्रान्मृतिजन्मनोः ॥ समानोदकभावानामहोरात्रेण सा भवेत् ॥ तद्वदितिजन्मनि सपिंडानाम
तिक्रांताशौचं नास्ति ॥ नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति देवलवचनात् ॥ निर्दशे पुत्रजनने श्रुते पितुः स्नानमस्त्येव ॥ श्रु
त्वा पुत्रस्य जन्म चेति वचनात् ॥ तथा उपनीतोपरमे एव ॥ अतिकालजं अतिक्रांताशौचं भवतीति व्याघ्रः ॥ जन्माशौचमनुपनीत
मृताशौचं चातिक्रांतं नास्ति ॥ तुर्ये मिताक्षरायां ॥ इति समानोदकाशौचं ॥ अथानुपनीतमृते निर्णयः ॥ प्रेतकल्पे ॥ गर्भे
नष्टे क्रिया नास्ति दुग्धं देयं शिशौ मृते ॥ परं च पायसं क्षीरं दद्याद्बालविपत्तितः ॥ यज्ञोपजीवते बालस्तद्धि प्राय प्रदीयते ॥ किं
चित्समानवयसे सत्कृत्यान्नं यथाविधि भक्ष्यं भोज्यं च दातव्यं तथा चैसुरवभक्षिका ॥ तद्वस्त्राणि च देयानि सोपानत्कानि तत्समे ॥
शिशुरा दंतजननाद्बालस्याद्यावदा शिखः ॥ कथ्यते सर्वशास्त्रेषु कुमारो मौंजिबंधनात् ॥ ततः पूर्वमिति ॥ अन्यथा ॥ विशेषः स्मृ
तिसारे ॥ चूडाकर्मणि संजाते विपत्तिश्च यदा भवेत् ॥ तत्र दाहः प्रकर्तव्यः उदकं तत्र निश्चलं ॥ व्रतकाले प्रकर्तव्यं वृषस्यैवसमु
त्सर्जनं बुधैः ॥ आ धानि षोडशदत्वा सपिंडिकरणं विनेति ॥ प्रथमवर्षे एव कृतचूडस्य दाहः ॥ तद्विषये आशौचनिर्णयश्च
निरूपितः प्राक् बालसंस्कारनिर्णये ॥ वृषोत्सर्गादिकं तु पंचवर्षात्पूर्वं भवेत् ॥ यतो गरुडपुराणे ॥ मृतश्चेत्पंचमे वर्षे अव्रतः
सव्रतोऽपि वा ॥ पूर्वोक्तमेव कर्तव्यं भूमी हते दशपिंडकं ॥ जन्मतः पंचवर्षाणि उक्ते क्रमसंख्यातं ॥ पंचवर्षाधिके बाले विपत्तिर्य
दि जायते ॥ वृषोत्सर्गादिकं कर्म कर्तव्यमुदकं ततः ॥ आहत्य हनि सं प्राप्ते कुर्याद्वाद्यानि षोडशा ॥ उदकुंभप्रदानं च उपद

नानियानि चा। यद्दानादियत्किंचित्पंचवर्षाधिके यदा। आचारतिलके। पंचमे वर्षे संस्कारं कुर्यादुदकतर्पणं। तथा पिंड
प्रदातव्यः सपिंडीकरणं विना। इत्यनुपनीतमृते निर्णयः॥ कन्ये चलद्विवेदेनयं पे निर्णय दीपके। विशेषे निर्णयो येनः स्व
गोत्राशौच निर्णयः। ।अथ सपिंडीकरणकालो विधिश्च। नद्दकरणे पुत्राणाममशुचित्वमुक्तं देवलेन। ।पितरौ ह्मिते
४ यस्य देहस्तस्याशुचिर्भवेत्। न दैवं नापि पित्र्यं च यावत्पूर्णो न वत्सरः। स्नानं चैव महादानं स्वाध्याय श्वाग्नि तर्प
प्रथमादेन कर्तव्यं महागुरुनिपातने। इत्यत्र तेन सपिंडनश्राद्धे यं निषेधः। येन कस्ये। मृते पितर्य द्दमध्ये त्वनुपन्ने
मातृकी क्रिया। अपमातृ विपत्तिः स्यात्। पितृकार्यं न लुप्यते। अद्दमध्ये सपिंडीकरणात्प्राक् इत्यर्थः। तथा। तीर्थश्रा
द्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकं। अब्दमध्ये न कुर्वीत महागुरुविपत्तिषु। तथा। भिक्षुर्भिक्षां न गृह्णाति यावत्कुर्या
त्सपिंडनं। सगोत्रेष्वशुचिस्तावद्यावत्पिंडान्न मेजयेत्। इत्यादिवाक्यैः सपिंडनश्राद्धाभावे पुत्राणामशुचित्वं प्रतिपादि
तं। अतो शुचित्वनिवृत्तिर्विनात्मकस्य सपिंडनस्य कालो अभिधीयंते। कात्यायनः। अथ सपिंडीकरणं संवत्सरे द्वादशे
त्रिपक्षे वा यदह्नि वृद्धिरापद्येत द्वादशाहे वेति। आश्वलायनः। अथ सपिंडीकरणं संवत्सरांते द्वादशाहे वेति। बौधाय ६६
नः। अथ सपिंडीकरणं संवत्सरे द्वादशे त्रिपक्षे वा यदह्नि वा वृद्धिरापद्यतेति। त्रिभिरूनपक्षस्त्रिपक्षो द्वादशाहस्तत्रापि
[illegible] संवत्सरे द्वादशेह्नि षष्ठे वा त्रिपक्षे वा त्रिमासि वा। एकादशे पि वा मासि मंगलं स्यादुपस्थितं। षष्ठे वेति षष्ठे मा
सि। यर्थ मंगलमुपस्थितमिति यदि विवाहादि श्राद्धं ततः प्राक्सपिंडनं कुर्यात्। कालादर्शे। एकादशे द्वादशे ह्नि त्रि